R S V L
00983
178/XVII
983

# Rashtriya Sanskrit Vidyapeetha Library

TIRUPATI - 517 507 (A.P.)

Acc. No. ________________ Call No. ________________

This book should be returned on or before the date last marked below or otherwise fines will be levied at the rate of 0-15 Ps. per day.

| DUE DATE OF RETURN | DUE DATE OF RETURN | DUE DATE OF RETURN |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |

983

RC

0983

Registered No. M 23[illegible]

Book XVII ॥ श्रीः ॥ No. [illegible] 2.

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां स[illegible]
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छ[illegible]

पु. १७] कलि ५०४४ } [illegible]-कन्या [illegible]
,, तुला शा[illegible]
आहृत्य

# The UDYANA PATRIKA.

A

SANSKRIT MONTHLY.

September } 1943
October }

983

For the rate of subscription please see inside.

# UDYANA PATRIKA.


Annual Subscription  Re. One only.
Do. With Sanskrit Supplement  Rs. 2—0—0


## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।


मुद्रणकरः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.


## विषयाः ॥

शास्त्रानुबन्धः—


कुवलयानन्दः । [बुधरञ्जनीसमेतः] ६५—७२

1 मेनका ।
2 सुभाषितनीवी ।
3 संस्कृतग्रन्थजातम् ।
4 वाहि वातेति श्लोके विशेषः ।
5 वाल्मीकिसेवा ।
6 पुस्तकपरामर्शः ।

अन्यधर्मसम्बन्धनिमित्तेन अन्यस्य अन्यतादात्म्यसम्भावनमुत्प्रेक्षा ।

'सर्वातिशायिसौन्दर्यं शङ्के सत्यवतो मुखम् ।
येन सा सुमुखी बाला गाय(सावि)त्री तरलीकृता ॥'

इत्यत्र गाय(सावि)त्रीहृदयतरलीकारकत्वप्रयुक्तसर्वातिशायिसौन्दर्यवत्त्वसम्भावनायाम[ति]व्याप्तेः । न चान्यधर्मसम्बन्धप्रयुक्तत्वं विशेषणम् । तेन स्वधर्मप्रयुक्तसम्भावनायां तत्र नातिप्रसङ्ग इति वाच्यम् । एवमपि —

'विरक्तसन्ध्यापरुषं १ पुरस्ताद्यतो रजः पार्थिवमुज्जिहीते ।
शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ॥'

इत्यत्र ससैन्यं प्रत्युद्गन्तरि अन्यत्र दृष्टेन तादृशरेणूत्थापकत्वेन वस्तुसत्प्रत्युद्गतत्वसम्भावनायामतिव्याप्तेरित्यत आह—अन्येति । आद्यन्तावन्यशब्दौ विषयिपरौ । मध्यमस्तु विषयपरः । निमित्ततादात्म्यशब्दौ स्पष्टार्थौ । अन्यस्येति । विषयतायां षष्ठी । तथा च विषयिधर्मसम्बन्धप्रयुक्तविषयधर्मिकविषयित्वसम्भावना उत्प्रेक्षेत्यर्थः । एवं च उक्तोदाहरणे विषयित्वसम्भावनाभावान्नातिप्रसङ्ग इति भावः । सम्भावनापदेन—

'नरसिंह महीपाल विज्ञस्त्वां मकरध्वजम् ।
मार्गणास्तव सञ्जाताः कथं सुमनसोऽन्यथा ॥

इत्यनुमानव्युदासः । [न च]

'स्तनाभिरामस्तबकां नूनं सीतेति वल्लरीम् ।
सम्भावयन् रघुपतिः धावति स्म दिदृक्षया ॥'

इति भ्रान्तिमत्यतिप्रसङ्ग इति वाच्यम् । तृतीयान्यपदस्यान्यत्वेनावगतविषय(यि)परत्वाश्रयणेनाहार्यसम्भावनायां पर्यवसानात् । न चैवमपि—

२ 'अस्मद्विक्रमचेष्टितानि निखिलत्रैलोक्यहेलाजय-

---

१ रघुवंशे 'सन्ध्याकपिशम्' इति पाठो दृश्यते ।

२ अस्मत् त्वत्किङ्करीणां अस्माकं सकाशात् । भवतःप्रख्यातवीर्यस्य रावणस्य तव । भूमेः सुता सीता । 'स्निग्धा' इत्यतः परमक्षरद्वयं त्रुटितम् । 'त्वयि' इति पूरितम् । नि. सा. चित्रमीमांसायां 'मयि' इति दृश्यते । तत्रार्थौचित्यं चिन्त्यम् ।

सा च वस्तुहेतुफलात्मतागोचरत्वेन त्रिविधा। तत्र वस्तुनः कस्यचि-द्वस्त्वन्तरतादात्म्यसम्भावना प्रथमा स्वरूपोत्प्रेक्षेत्युच्यते। अहेतोर्हेतु-भावेनाफलस्य फलत्वेनोत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षेत्युच्यते। तत्र आद्या स्वरूपोत्प्रेक्षा उक्तविषया अनुक्तविषया चेति द्विविधा।

---

प्रह्वीभूतसुरासुराणि भवतो भूपेः सुता शृण्वती।
पत्यौ रोषकषायितेन मनसा स्निग्धा [त्वयि] स्थास्यति
स्त्रीणां प्रेम यदुत्तरोत्तरगुणग्रामस्पृहाचञ्चलम् ॥'

इत्यत्र चाञ्चल्यसहचारितया दृष्टेन स्त्रीत्वेन चाञ्चल्यसम्भावनायामतिप्रसङ्ग इति वाच्यम्। धर्मस्य उपमायामिव सहृदयहृदयाह्लादिनो विवक्षितत्वात्, स्त्रीत्वस्य तत्राप्रयोजकत्वादिति संक्षेपः। वस्तुहेतुफलात्मनेत्यत्र विषयत्वं तृतीयार्थ इत्याशयेन विभजते सा चेति। अत्र वस्तुपदं हेतुफलत्वेन विवक्षितव्यातिरिक्तवस्तुपरम्। नातो विभागव्याघातः। अथ विभक्तानां विशेषलक्षणान्याह—तत्रेत्यादिना। वस्त्वन्तरेति। हेतुफलव्यतिरिक्तवस्त्व-न्तरेत्यर्थः। अत्र विशेषलक्षणत्रयेऽपि अन्यधर्मसम्बन्धेनेति बोद्धव्यम्। लक्षणकारिकोत्तरार्धं व्याचष्टे—तत्रेति। त्रिविधास्वित्यर्थः। आद्येति मूलोपादानम्। स्वरूपेति विवरणम्। उक्तविषयेति। ननु हेतु-फलोत्प्रेक्षयोरिवात्रापि सिद्धासिद्धविषयत्वकृतमेव विभागोऽस्तु, किमनेन विक-ल्पेनेति चेन्नैवम्। विषयस्यासिद्धत्वे उत्प्रेक्षाया निरालम्बनत्वापातात्। एवं तर्हि हेतुफलोत्प्रेक्षयोः कथं तथा विभाग इति चेदाकर्ण्यतामवधानेन। हेतू(तुफलो)त्प्रेक्षासु अतद्धेतुके तद्धेतुकत्वोत्प्रेक्षा। पि (?) ए (अ)तत्फलके तत्फलकत्वोत्प्रेक्षा। नत्वहेतोः हेतुभावेन अफलस्य फलभावेन उत्प्रेक्षेति। 'रक्तौ तवांघ्री' 'मध्यः किं' इत्यादिहेतुफलोत्प्रेक्षोदाहरणेषु विक्षेपणहेतुक-रक्तत्वाश्रयौ अंघ्री कुचधृतिफलकबन्धनाश्रयो मध्य इत्यादिबोधस्य सर्वसिद्ध-त्वात्। चित्रमीमांसायां तथैव प्रपञ्चितत्वाच्च। अहेतोर्हेतुभावेनेत्यादि-ग्रन्थो हेतुफलोत्प्रेक्षाव्यवहारश्च 'अदग्धदहन'न्यायेन प्राप्ताप्राप्तविवेककृतो वसेयः। दध्यादिविधिव्यपदेशवत्। एवं च अन्ततः सिद्धयोरेव हेतुफलयोः पर्यवस्था(सा)स्यन्त्यपि तद्धेतुफलकत्वोत्प्रेक्षा प्रथमापातप्रतीति-

**परे हेतुफलोत्प्रेक्षे सिद्धविषया असिद्धविषया चेति प्रत्येकं द्विविधे। एवं षण्णामुत्प्रेक्षाणां धूमस्तोमेत्यादीनि क्रमेणोदाहरणानि। रजनीमुखे सर्वत्र विसृत्वरस्य तमसो नैल्यदृष्टिप्रतिरोधकत्वादिधर्मसम्ब-**

---

वेलायां, अतद्धेतुफलक[त्व]मवलम्बमाना प्रतिष्ठितेति च प्रतिभातीति न तस्या निरालम्बनत्वम्। न ह्येवं स्वरूपोत्प्रेक्षायां सम्भवतीति युक्त एवायं विभाग इति दिक्।

**परे** इति मूलोपादानम्। हेत्विति विवरणम्। सिद्धेति। ननु स्वरूपोत्प्रेक्षायामिवात्रापि उक्तानुक्तविषयत्वकृत एव विभागोऽस्त्विति चेन्न। हेतोः फलस्य वा अनुक्तौ हेतुफलोत्प्रेक्षात्वासिद्धेरिदं सहेतुकं सफलमित्यादिक्रमेण सामान्येनोपादानस्य चमत्काराजनकत्वाच्च विशेषतो विषयोक्तेरावश्यकत्वेन तथा विभागस्यासम्भवात्। एवं तर्हि स्वरूपोत्प्रेक्षायां कथं तथा विभाग इति चेत्तत्र प्रकरणादिसहकृतविषयिणो विषयलाभस्यातिशयोक्त्यादाविव सम्भवेन विषयोक्तेः सर्वत्रा[ना]वश्यकत्वादिति विपश्चितो विदुः। **षण्णा**मिति। यद्यप्युत्प्रेक्षाः षण्णवतिरिति केचित्। चतुरुत्तरशतमित्यन्ये। तथापि तेषामपि भेदानामुक्तेष्वन्तर्भावात्, बालदुरवगाहत्वात्।

विषयिण उत्प्रेक्षायां जातिगुणाद्यात्मना विभागविधा।
याऽदर्शि नैव शोभा तयोपमायामिवोपमानस्य॥
तदभावेऽलङ्काराः सम्भवमात्रेण न विभागम्।
अर्हन्तीतरथा स्यात्तद्विषयोऽप्येवमेव हि विभक्तः॥

इत्यादिना प्रपञ्चेन चित्रमीमांसायां दूषितत्वाच्च इह तेषामुपेक्षेति भावः। **इत्यादीनी**ति। षडर्थानीति शेषः। तेन उदाहरणाधिक्यप्रयुक्तक्रमभङ्गचोद्यस्य नावकाशः। लक्ष्ये लक्षणं सङ्गमयति—**रजनी**त्यादिना। चलनैकस्वभावधूमतादात्म्यघटनाय **विसृत्वरस्ये**ति। निशीथे तमसो विश्रान्त्या प्रसरणासम्भवाद्रजनीमुख इति। **तमस** इति विषयतायां षष्ठी तादात्म्यसम्भावनेत्यत्र सम्बध्यते। नैल्यदृष्टिप्रतिरोधकत्वादिधर्मसम्बन्धेन नैल्यदृष्टिप्रतिरोधकत्वाद्यन्यधर्मसम्बन्धेनेत्यर्थः। अत्र आदिपदेन व्यापित्व-

न्धेन गम्यमानेन निमित्तेन सद्यःप्रियविघटितसर्वदेशास्थितकोकाङ्गना-हृदुपगतप्रज्वलिष्यद्विरहानलधूमस्तोमतादात्म्यसम्भावना स्वरूपोत्प्रेक्षा। तमसो विषयस्योपादानादुक्तविषया। तमोव्यापनस्य नभःप्रभृति भूपर्यन्तसकलवस्तुसान्द्रमलिनीकरणेन निमित्तेन तमःकर्तृकलेपन-तादात्म्योत्प्रेक्षा नभःकर्तृकाञ्जनवर्षणतादात्म्योत्प्रेक्षा चानुक्तविषया स्वरूपोत्प्रेक्षा। उभयत्रापि विषयभूततमोव्यापनस्य अनुपादानात्। नन्वत्र तमसो व्यापनेन निमित्तेन लेपनकर्तृतादात्म्योत्प्रेक्षा, नभसो

---

संग्रहः। ननु स नोपात्त इत्यत आह—**गम्यमानेति**। तथा च उपमाया-मिव उत्प्रेक्षायामपि धर्मानुपादानम्(नम)पि सम्भवतीति भावः। धूमस्तो-मोपपादनाय प्रज्वलिष्यदिति। तत्रापि हेतुः सद्यः प्रियविघटितेति। जग-द्व्यापिनि तमसि परिमितप्रदेशवर्तिधूमस्तोमसम्भावनानुपपत्तिपरिहाराय सर्व-देशास्थितेति कोकाङ्गनाविशेषणम्। तथाच तद्विरहाग्निधूमस्तोमसम्भवा-न्नानुपपत्तिरिति भावः। मतान्तरे वक्ष्यमाणधर्मोत्प्रेक्षाव्युदासाय तादा-त्म्येति। तत्रापि विशेषमुपपादयति **तमस इति**। **नभःप्रभृतीति**। अत्र प्रभृतिपदं आरम्भादि(-वधि)परम्। पर्यन्तपदं तु अवसानावधि-परम्। नभःप्रभृति। इदं मलिनीकरणं(ण)क्रियाविशेषणम्। एव-मुत्तरमपि। यद्यपि लेपनसम्भावनायां सकलवस्तुसान्द्रमलिनीकरणमेव प्रयोजकं न तु तत्र प्रकृतविशेषणद्वयापेक्षा। तथापि अञ्जनवर्षणसम्भा-वनानुरोधादिदमुक्तम्। **मलिनीकरणेति**। यद्यपि तमोव्यापने मलि-नीकरणमसिद्धमेव। तथाऽपि रजनीमुखे ता(सौ)रालोकक्षयेण वस्तूनां विस्पष्टप्रकाशो विरुद्धयते। तन्निरोधनसमये च मलिनीकरणमिव प्रतीयत इत्युपचारादुक्तम्। नह्युत्प्रेक्षायां धर्मस्य अनुयायित्वनियमः। किन्तु उपमायां धर्मसाधारण्यनिर्वाहकानां सर्वेषामत्राभ्युपगमादिति भावः। **उभ-यत्रापीति**। तमःकर्तृकलेपनतादात्म्योत्प्रेक्षायां, नभःकर्तृकाञ्जनवर्षण-तादात्म्योत्प्रेक्षायां चेत्यर्थः। अमू(र्त)स्य नभसः प्रसरणरूपव्यापनासम्भवा-दुभयत्रापि तमोव्यापनमेव विषय इति भावः। **व्यापनेनेति**। लेपापि

भूपर्यन्तं गाढनीलिमव्याप्तत्वेन निमित्तेनाञ्जनवर्षणकर्तृतादात्म्योत्प्रेक्षा वेति उत्प्रेक्षाद्वयमुक्तविषयमेवास्तु । मैवम् । लिम्पति वर्षतीत्याख्यातयोः कर्तृवाचकत्वेऽपि भावप्रधानमाख्यातमिति स्मृतेर्धात्वर्थक्रियाया एव प्राधान्येन तदुपसर्जनत्वेनान्वितस्य कर्तुरुत्प्रेक्षणीयतया

---

हि लेप्यं वस्तु हस्तादिद्वारा व्याप्नोतीति भावः । नभसि व्यापनासम्भवादाह—भूपर्यन्तमिति । गाढेति । अञ्जनवर्षितापि हि तत्सम्बन्धान्नीलिमव्याप्तो भवतीति भावः । यद्यप्यत्राप्युभयत्र सकलवस्तुमान्द्यमलिनीकरणमेव निमित्तं सम्भवति । तथापि तदपेक्षयैववस्तु(-तस्य सु)ज्ञानत्वमभिसन्धायैतदुक्तं कर्तृतादात्म्येयोः । तमः लेपनकर्त्रीव, नभः अञ्जनवर्षणकर्त्रीवेत्युत्प्रेक्षा सम्भवतीत्यर्थः । आख्यातयोः कर्तरि शक्तत्वादिति भावः । उक्तविषयमेवेति । लेपनाञ्जनवर्षणकर्तृतादात्म्योत्प्रेक्षाविषययोः तमोनभसोरुपात्तत्वादिति भावः । तथा च विभागानुपपत्तिरिति हृदयम् । अत्र एवकारेण विषयोत्प्रेक्षे (विषयो)पादानकृतोत्प्रेक्षासौकर्यं व्यज्यते । इत्याख्यातयोरिति । इत्यत्राख्यातयोरित्यर्थः । भावेति । भावो धात्वर्थः प्रधानं विशेष्यं यस्य यज्जन्यप्रतीतेः तद्भावप्रधानम् । धात्वर्थविशेष्यकप्रतीतिजनकमित्यर्थः । आख्यातं आख्यातान्तम् । स्मृतेरिति । याज्ञ(स्क)स्मृतेरित्यर्थः । धात्वर्थेति । धातुवाच्यभूतक्रियाया इत्यर्थः । अत्र एवकारेण कर्तृप्राधान्यव्यवच्छेदः । अत एवाह—तदित्यादि । उत्प्रेक्षणीयतया उत्प्रेक्षाविषयितया । अन्यत्र उत्प्रेक्षाविषये । अन्वयासम्भवादिति । स्वविशेष्यान्वयविश्रान्तसंरम्भत्वेन निराकांक्षत्वादिति भावः । न च नैयायिकमत इव कर्तृविशेष्यकबोध एवाभ्युपगम्यते । न तु वैयाकरणस्मृतिरनुरुध्यत इति वाच्यम् । तथा सत्याख्यात[स्य]कृतिवाचकत्वाभ्युपगमापत्त्या त्वदभिमतकर्तृतादात्म्योत्प्रेक्षाव्याघातात् । न केवलमाख्यातस्य क्रियाप्राधान्यं वैयाकरणाभ्युपगतम् । किन्तु आलङ्कारिकसम्प्रदायपरं[परागतं]

अन्यत्रान्वयासंभवात्। अत एवाख्यातार्थस्य कर्तुः क्रियोपसर्जनत्वेनान्यत्रान्वयासम्भवादेव हेतोस्तस्योपमायामुपमानतयाऽन्वयोऽपि दण्डिना निराकृतः—"कर्ता यद्युपमानं स्यान्न्यग्भूतोऽसौ क्रियापदे।

---

चेत्यप्याह—अत एवेति। तस्यैव विवरणं हेतोरित्यन्तम्। तस्याख्यातार्थस्य कर्तुः। उपमायामिति। उदाहरणयोरिवशब्दश्रवणाल्लेपनवर्षणकर्तृभ्यां तमोनभसोरुपमाशङ्कासम्भवादिति। अन्वयोऽपीति। अपिरुत्प्रेक्षणीयतयाऽन्वयसमुच्चयार्थः। तदेव दर्शयति कर्तेति। यदि यद्यपीत्यर्थः। तथापीति शेषः। यद्यपितथाप्योरविनाभावात्। तथा च कर्तापि उपमानं स्यादिति शङ्काप्रकाशनम्। तथापि न्यग्भूत इत्यादि समाधानमिति योजना। यद्वा आख्यातवाच्य इति शेषः। तथा च कर्ता यद्याख्यातवाच्यः तर्ह्युपमानं स्यादिति शङ्का। अथ वा कर्तोपमानं स्यादिति यदि न यतः न्यग्भूत इत्यादि। न्यग्भूतः विशेषणीभूतः। क्रियापदे आख्यातान्तपदे। स्वक्रियासाधनव्यग्रः स्वविशेष्यभूतक्रियान्वयमात्रविश्रान्तसंरम्भः। नालं न समर्थः। व्यपेक्षितुम्। आकांक्षितुम्। भृत्यस्य राजसेवाव्यतिरिक्तव्यापारावकाशविरहोऽत्र दृष्टान्तः। नन्वेवमपि तमोव्यापनस्य तत्कर्तृकलेपननभःकर्तृकाञ्जनवर्षणाभ्यां प्रधानभूताभ्यामुपमास्त्विति। चशब्द(-अस्तु। इवशब्द)स्वारस्यभङ्गे प्रमाणाभावात्। न च 'वर्षतीवाञ्जनं नभ' इत्यत्र अञ्जनवर्षणमात्रस्य उपमानताहस्य अतिरिच्यमानं नभःकर्तृकत्वविशेषणमन्यथाऽनुपपद्यमानं तादात्म्यसम्भावनायामिवशब्दाव(ब्दमवस्थाप)यतीति वाच्यम्। एवमपि 'लिम्पतीव तमोऽङ्गानी'त्यत्र उपमाया दुर्वारत्वात्। न चा[न]न्यथासिद्धोत्तरवाक्यैकरूप्यादत्रापि उत्प्रेक्षैवाश्रीयत इति वाच्यम्। उपक्रमगतेवशब्दस्वारस्यानुरोधेन वैरूप्यस्य सोढव्यत्वात्। 'असत्पुरुषसेवेव दृष्टिर्निष्फलतां गते'त्युत्तरार्धगतोपमानुरोधाच्च। अन्यथा तत्राप्युत्प्रेक्षापत्तेः। न चेष्टापत्तिः। अनुभवविरोधात्। उपमोत्प्रेक्षासंसृष्टित्वेन ग्रन्थकृता ग्रन्थान्ते उदाहरणविरोधाच्च। मैवम्। तमोव्यापनस्यानुपात्तस्य

**स्वक्रियासाधनव्यग्रो नालमन्यद्व्यपेक्षितु''मिति । केचित्तु—तमो-**

---

उपमेयत्वं न सम्भवति । धर्मोपमेययोरनुपादाने ह्युपमा निरालम्बना स्यात् । न हि चन्द्र इवेत्युपमा भवति । तमोनभसोर्विषयत्वे तु तयोरुपात्तत्वेन एतत्परिहारासम्भवात् दण्डिनः प्रकारान्तरानुसरणमिति दिक् । सर्वस्वकारमतमाह—**केचित्त्विति । तमोनभसोरिति** । उपात्तयोरिति शेषः । अत एव उत्तरत्र 'येषां तूपात्तयो'रिति वक्ष्यति । तत्कर्तृकेति । यद्यपि तमोगतत्वेन लेपनक्रियाकर्तृत्वेन उत्प्रेक्षेत्येव सर्वस्वे स्थितम्१ तथापि कर्तृत्वोत्प्रेक्षापक्षस्य दूषितत्वात् तस्याप्यत्रैव तात्पर्यमित्येवं अनुभाषितम् ।

ननु द्रव्ययोः तमोनभसोः लेपनवर्षणरूपक्रियायां तादात्म्यसम्भावना अनुपपन्नेत्यत आह—**धर्मेति** । धर्मत्वेन लेपनवर्षणोत्प्रेक्षेत्यर्थः । अत्र च व्यापनादि गम्यमानं निमित्तमिति भावः । अस्मिन् पक्षे अन्यधर्मसम्बन्धेति सामान्यलक्षणे अन्यतादात्म्यशब्दः विषयावृत्तित्वेनावगतधर्मपरः । स च धर्मपरः (धर्मः) क्वचित्तादात्म्यं क्वचिदन्यः । नातोऽत्र अव्याप्तिः । अत्र व्यापनस्य विषयत्वे निमित्तमप्यन्यदन्वेष्टव्यं स्यादिति महान् क्लेशः । किञ्च विषयस्य गम्यमानत्वं चायुक्तम् । तस्योत्प्रेक्षाधारत्वेन प्रस्तुतस्य अभिधातुमुचितत्वात् । व्यापनस्य विषयत्वे च तदभावात् । तस्मात् धर्मोत्प्रेक्षापक्ष एव साधुरिति सर्वस्वकाराशयः । स्पष्टं चैतद्ग्रन्थदृशाम् । अत्र तमोनभसोः विषयत्वेन कर्तृत्वेन च वारद्वयमन्वयक्लेशः । तथा धर्म्युत्प्रेक्षा साधर्म्यप्रयुक्ता । धर्मोत्प्रेक्षा तु तत्सह-

---

**१ "अत्र लेपनवर्षणक्रिये तमोनभोगतत्वेनोत्प्रेक्ष्येते" इति सर्वस्वे निर्णयसागरीये ५८ पुटे प्रथममुच्यते । उपरि तु 'अत्र तमोगतत्वेन लेपनक्रियाकर्तृत्वोत्प्रेक्षायाम्' इति (६३ पुटे) ।**

नभसोर्विषययोस्तत्कर्तृकलेपनवर्षणस्वरूपधर्मोत्प्रेक्षेत्याहुः । तन्मते स्वरूपोत्प्रेक्षायां धर्म्युत्प्रेक्षा धर्मोत्प्रेक्षा चेत्येवं द्वैविध्यं द्रष्टव्यम् । चरणयोः स्वतः सिद्धे रक्तिमनि वस्तुतो विक्षेपणं न हेतुरिति अहेतोस्तस्य हेतुत्वेन सम्भावना हेतूत्प्रेक्षा । विक्षेपणस्य विषयस्य स्वत्वात्

---

चारितधर्मप्रयुक्तेत्यननुगमः । न च तयोरन्यतरत्वेनानुगतिः । प्रकारान्तरस्या(स्य) सम्भवे तस्यागति[कगति]मूलस्यानाश्रयणीयत्वादित्यस्वरसमाहुः स्म । [तत्] मन्दम् । तमोनभसोः विषयकोटिमात्रप्रवेशाभ्युपगमेन कर्तृकोटिप्रवेशानभ्युपगमात् । सामान्यतः एककर्तृकलेपनादिरेवोत्प्रेक्षणीयत्वात् । [तत्-]कर्तृकेति ग्रन्थस्तु पर्यवसितार्थप्रदर्शनपरः । अत एव सर्वत्र 'तमोगतत्वेन लेपनक्रियाकर्तृत्वोत्प्रेक्षाया'मिति विषयकोटिप्रवेशमात्रं दर्शितम् । अन्यधर्मसम्बन्धपदेन सम्भावनीयधर्मसमानाधिकरणधर्मसम्बन्धस्यैव विवक्षितत्वेन अ[न]नुगमाभावात् । विषयधर्मोभयानुपादानक्लेशस्य मतान्तरेऽपि सत्त्वाच्च । तस्मादिदमत्र दूषणम् । उत्प्रेक्षा अध्यवसानप्रधानेति सम्प्रदायविदां मतभे(म् । अभे)दप्रधानेति च । अत एव उत्प्रेक्षासूत्रमवतारयता तेनैवोक्तम् "एवम्—अभेदप्राधान्ये आरोपगर्भानलङ्कारान् लक्षयित्वा अध्यवसानगर्भान् लक्षयती"ति । अध्यवसायोऽपि तत्रैव निरुक्तः "विषयनिगरणेन अभेदप्रतिपत्तिः विषयिणोऽध्यवसायः" इति । न च अभेदप्राधान्यं तद्घटिताध्यवसायप्राधान्यं चेत्युभयमपि धर्मिणि धर्मोत्प्रेक्षापक्षे सङ्गच्छत इति पूर्वोत्तरत्य(-र-) ग्रन्थसम्प्रदायाविरोध एवेति विपश्चितो विदांकुर्वन्तु । नन्वेतन्मते स्वरूपोत्प्रेक्षायामपि सर्वत्र विषयोपपादननियमो(मेनो)क्तानुक्तविषयत्वकृतद्वैविध्याभावेन उत्प्रेक्षाषाड्विध्यभङ्गापत्तिरित्यत आह—तन्मत इति । धर्म्युत्प्रेक्षा धर्मिणि धर्म्यन्तरतादात्म्योत्प्रेक्षा । धर्मोत्प्रेक्षादि(तु)धर्मिणि धर्मसंसर्गोत्प्रेक्षा । "रक्तौ तवांघ्री" इत्यत्र हेतूत्प्रेक्षामुपपादयति **चरणयो**रित्यादिना । तत्रापि विशेषमुपपादयति **विक्षेपण**स्येति । नन्वत्र सम्भावनाप्रयोजकधर्मो नोपात्त इति स दुरवधार इति चेन्न । तत्पूर्ववर्तित्वस्यैव तथात्वात् । वस्तुतस्तु कार्यतया अभिमतजातीयं

त्वादृशी स्नुषा किं मे आगच्छेत् । पापाया मम किमसमीचीनं चिरस्थायि न भवेत् । जरतीं मां स यमः किं न नयेत् । भद्रे जाता-महारयाम । अत्र त्वामहारयाम । इतः एकनिमेषमात्रमपि सजीवा वयं भविष्याम इति मास्म मन्यथाः ।” इति प्रलपन्ती उत्कम्प्यो-त्कम्प्य रुदती अनलोपरि जतुद्रावमद्रवत् । तद्दर्शिनः साम्बशिव-कृष्णरङ्गराजुप्रभृतयः सर्वेऽपि ‘हा’ इत्याक्रुश्य रोदितुमारभन्त । सा वैद्यशालेत्येतदेव ते विसस्मरुः । स महान् ध्वनिः दीर्घदूरमश्रूयत ।

अनन्तरे निमेषे महाभिषक् हूणः ‘किमिदं किमिदं’ इति वदन् अन्तःप्रविश्य तेषां रोदनस्य झटिति पूर्णविराममदात् । अथापि उपमाण्डलिकस्य तस्मिन् पुरे मुख्याधिकारित्वात् तदीयां दुःख-करीं विपदं मत्वा च भिषक् तेषामुपालम्भमकुर्वन् उपमाण्डलि-काय वन्दनमकरोत् । साम्बशिवोऽपि भिषजे वन्दनं कृत्वा स्व-पत्नया गतिः कथमवसास्यतीति पप्रच्छ । हूणः निकामकरुणे ध्वनौ ‘आर्य, भवत आपतितां विपदं प्रति अहं भृशं विषण्णोऽस्मि । भवत्पत्नया देहस्थितिः अत्यन्तमप्रत्ययदायिनी वर्तते । चोरा मौर्ख्येण बहुषु स्थलेषु प्रहृतवन्तः । तेन वक्षसि द्वे अस्थिनी भग्ने तुन्ने वर्तेते । वक्षो विकीर्य शस्त्रं कृत्वा तयोर्निपुणमुद्धरणं चेन्न भवेत् भवद्गृहिण्या जीवनं कठिनम् । अद्य सायङ्कालस्यान्तः स्मृतिमहं प्रत्यानेष्यामि । वक्षो विकीर्य अन्तःप्रदेशं समीकृत्य पुनः सीवनं न सुकरं कर्म । तत्र अल्पेऽपि स्खलिते सद्यो मरणसम्भवो निश्चितः । अपायकरं तत् कर्म न सर्वेषां कर्तुमर्हम् । कृतहस्तै-र्निपुणैरेव तत् कारयितव्यम् । भूतार्थनिह्नवे न फलमस्ति । तस्य दुष्करस्य कार्यस्य करणे न मम तावान् परिचयः । अत्र मम अधस्तात् स्थिता व्रणचिकित्सका अजच्छेदनस्यैव योग्याः । सा-पायस्य तस्य कार्यस्य तेष्वर्पणं आपदे भवेत् । मद्रे ‘पुरशैवाके’ डाक्टर् विलिअंस् इति नामधेयवान् हूणः कश्चिदस्ति । सोऽस्मिन् विषये समुत्तीर्णो मेधावी । अन्यान् बहूनुपेत्य वृथा काल-विलम्बो न कार्यः । सपदि यदि तस्य सकाशं नयेत स क्षणेन स्वस्थां करिष्यति । परं तु स बहुवित्तापेक्षणशीलः । अस्मै कर्मणे सः अवरं त्रीणि शतानि रूप्याण्यपेक्षेत । तस्मै कञ्चन लेखं विलिख्य अहं ददामि । तस्य तत्र प्रापणे सोऽभ्यधिकां श्रद्धां कुर्वन् इदं कर्म

निर्वर्तयेत् । द्वे शते रूप्याणि गृह्णीयात्' इत्यवदत् । तथैव करिष्यत इति साम्बशिवोऽभ्युपागच्छत् । अनुपदं भिषक् 'साधु । सार्धं सप्तसु घण्टासु प्रतिष्ठमाने शकटे अत्रैव गच्छत । गमनकाले अहं लेखं दास्यामि । न युष्माभिरत्र स्थित्वा कणाया अतिसङ्कुलनं कार्यम् । आसायं बहिरवतिष्ठध्वम् ।' इति सावष्टम्भमभिधाय अपरतो जगाम । पश्चात् सेवकः कश्चिदागत्य "स्वामिनः दयां कृत्वा बहिरागता भवत । कवाटं पिधातव्यम्" इति समास्त्वमुवाच । चत्वारोऽपि अर्धमनसा बहिरागच्छन् । सपदि कवाटमपि घटितं पिहितमासीत् ।

बहिर्निवेशिते कस्मिंश्चित् विश्फलके साम्बशिवः श्रान्त उपविष्टोऽभवत् । कनकाम्बा धरायामुपविष्टा भित्तौ साचीबभूव । कृष्णो रङ्गराजुश्च कियति दूरे अतिष्ठताम् । येऽपि पादनाडीपर्यन्तं किंभाषणीयमित्यजानन्तः पर्युत्सुका व्यामुह्य संलीना अभवन् । अकुतोभयः साम्बशिवो निश्चेष्टः स्वकीयेन महिम्ना हीनः एकेनैव दिनेन साधारणमनुष्यः परिणतो महतः क्लेशस्य दुःखस्य च पात्रीभूय अवसन्नः 'परदेशि'वत् यदुपविष्ट आसीत् तद्दर्शिनो रङ्गराजोर्मनः प्रविव्यथे । तस्य हृदयादुज्जृम्भिताभिर्नानावृत्तिभिः तदीये नेत्रवर्त्मनी ओष्ठौ इत्यादीनि वातप्रचलच्चूतपल्लवकल्पमचलन् । साम्बशिवः कनकाम्बा च बहूनि दिनानि नाभुक्षातामिति तयोर्विकृतआकार एव लघु प्रादर्शयत् । रङ्गराजुः कनकाम्बामभिवीक्ष्य सप्रश्रयं "वृद्धाम्ब, कच्चिन्मद्रे जाता कुशलिनी" इति आन्तरणाभिमानेन पप्रच्छ । महता प्रेम्णा तेन कृतः प्रश्नः तयोर्महति दुःखे पर्यवास्यत् । कतिचन नाडिकास्तिरोहिता मद्रस्मृतिः तयोर्मनसि सद्यःपरावर्तत । पूर्वदिनवृत्ता विषया यावन्तोऽपि तदानीमेव चक्षुषोः पुरस्ताद् वर्तमाना इव अभान् । तथैव विस्मृतदेहौ दृषद्बभूवतुः । स्वप्रश्नस्य उत्तरविरहं दृष्टवान् रङ्गराजुः मद्रे कन्यायाः स्थितिरपि न समीचीनेति अभ्यूहति स्म । तयोर्मुखम्लानिं अपरिमितमवसादं च दृष्टवान् सद्गुणशाली स सेवकः तौ अकृतभोजनावित्येतत्कृष्णाय चेष्टामूलमदर्शयत् । कृष्णः 'पाट्टि, यूयं दन्तधावनमपि नाकार्ष्टेतीव ह्यस्ति । गृहं तावद् वयं गत्वा नन्वागच्छेम । आसायं खलु अस्मान् अन्तर्न मोक्ष्यन्ति । अत्र किं वयं करिष्यामः' इत्यब्रवीत् । तावुभौ तदा आहारं स्वदेहं लोकं च विस्मृत्य स्वर्णाम्बां मेनका वरा-

ङ्स्वामी एषां त्रयाणां रूपाण्येव मनसि धारयन्तावास्ताम् । रङ्ग-राजुप्रश्नस्य कृष्णोपक्षेपस्य च पादनाड्यवधि किमप्युत्तरं नालभ्यत । ततः कनकाम्बा झटिति प्रत्यागतप्रज्ञं साम्बशिवमभिवीक्ष्य 'किमरे। तव करे कियत् धनमवशिष्टमस्ति' इत्याह । स स्वमास्त्रिकास्थं धन-मादाय गणयित्वा ८७-५-० रूप्याणि सन्तीत्यवदत् । सपदि कनकाम्बा 'सम्यक् । अद्य अस्माकं शकटारोहणाय त्रीणि शता-न्यपि वा किल रूप्याण्यपेक्ष्यन्ते । तस्य को मार्गः।' इति । उन्नमित-मूर्धा साम्बशिवः सपदि अवनम्य आलोचनामकरोत् । तृतीये दिन तस्य गृहे स्थितं धनं भूषणानि वस्त्राणि वस्तूनि इत्यादीना-मर्घं विंशतेः सहस्राणामुपरि भवेत् । तावन्तोऽप्यर्थाः परिमो-षिभिरपहृता अभूवन् । तत्पितृकाले स्थितं क्षेत्रगृहादिकं विक्रीय तत एव तेन विद्याग्रहणस्य कृतत्वात् तस्य प्राचीनं वित्तं यत्किमपि नासीत् । अपि तु कस्मिंश्चन 'जीवाधारनिधौ' (Life Insurance Fund) स वित्तं निदधान आसीत् । तस्य पञ्चाशति वयस्सु भवत्सु, त्रिंशत् सहस्राणि रूप्याणि ततो लभ्येरन् । न तु तदा तस्य तावद्वय आसीत् । तस्मान्निधेः आवश्यककार्यनिमित्तं किमप्यल्पं वित्तं ऋणमादातुं तस्याधिकारोऽवर्तत । किन्तु तन्नि-धिनिर्वाहकैस्तस्मै दत्तस्य पत्रस्य वस्त्वन्तरैः सह चोरितत्वात् तदाधीकृत्य ऋणग्रहणमप्यशक्यमभूत् । तस्मात् साम्बशिवार्यस्य तदानीन्तनमर्घं ८७-५-० रूप्याण्येव । तावदल्पे काले स्वस्य दरिद्रे ष्वपि दरिद्रभूततां दृष्ट्वा 'आः। निर्धनःशव' इति यदुच्यते तदिदानीं सम्यग् ज्ञातम् । 'अवित्तानामयं लोको नास्ति । अभक्तानामसौ लोको नास्ति' इति वदन् हि परमज्ञानी । तदुक्तं न कदाचिन्मिथ्या स्यात् ।" इति चिन्तयन् दीनोऽवसन्नोऽभवत् । अपि तु वस्तुतः तस्य स्थितिर्न तथा केवला। कनकाम्बायाः तस्याः पित्रा यौतकत्वेन दत्तं क्षेत्रं गृहं चावर्तत। तदुभयं अष्टसहस्राणि रूप्याण्यर्हेत्। किन्तु ते द्वे चेङ्गल्पट्टु-अस्य पश्चिमायां दिशि पञ्चदशशिलादूरे स्थिते दिवाचौर्यपाक'ग्रामे अवर्तेताम् । अस्वकीयत्वात् साम्बशिवस्य तत्स्मृतिर्नाजायत । आत्मना कर्तव्यं प्रति कनकाम्बाया मनसि प्रागेव निर्णयो निष्पन्नः। स्वक्षेत्रस्य गृहस्य च तस्यां त्वरायां विक्रे-तुमशक्यत्वेऽपि ते आधीकृत्य वा सहस्रं रूप्याणि गृहीत्वा स्वकी-

यावश्यकर्तव्यकर्मसम्बन्धिव्ययहेतो रक्षणीयानीति सा निश्चिकाय । साम्बाशिवः पुनः तदस्मरन् अन्यस्य कस्यचित् सकाशात् 'हस्तकृणं' किं आदीयतामित्यचिन्तयत् । तस्य रूप्यप्रदानप्रवृत्तियोग्यो न कश्चिदृदृश्यत । तस्यां स्थितौ तस्य तदीयश्वशुरस्मृतिरभवत् । स तञ्जापुरस्य उत्तरतः पञ्चषासु शिलासु स्थिते तिल्लैस्थानग्रामे स्थितः कश्चन वैदिकब्राह्मणः । तस्य पुत्रः कृष्णः चिरकालं एषां गृहे ववृध इति हि विदितो विषयः । तस्मिन् वैदिके क्षेत्राणि विना अर्थात्मना भूषात्मना च द्विसहस्रीरूप्यार्हं स्थितं स्वं साम्बशिवकृष्णप्रभृतीनां सर्वेषां विदितम् । सामान्यतः स्वपुत्र्यां स्वर्णाम्बायां तस्य तावदान्तरं प्रेम अवर्ततेति न स तदवधि प्रदर्शितवान् । पुत्रीगृहात् किमपि वस्तु तदा तदा अपहर्तुं अवहित आसीदित्येतद् विना तस्यां जातु प्रीत्या कामपि वार्तामवददित्येतदपि स नाजानात् । अथापि स्वपुत्र्या आपतितायां प्राणापायवत्यां तस्यां महत्यामापदि सोऽवश्यं अनुकम्पां करिष्यतीति मन्यमानः साम्बशिवः कृष्णं प्रति 'किमरे । इमं वृत्तान्तं प्रति कञ्चित् तिल्लैस्थानाय अलेखीः' इत्यपृच्छत् । 'आम् । सद्यः प्रस्थाय आगन्तव्यमिति लेखं विलिख्य केनचिन्मनुष्येण ह्य एव प्रैषयम् । किमपि सोऽद्यापि नागच्छति । कामे अहं साक्षाद् गत्वा तमप्यानयन् चत्वारि शतानि पञ्च वा लभ्यानि रूप्याणि च आदाय आगच्छामि' इत्याह स्म । साम्बशिवः तत्र वस्तुतः प्रत्ययमकरोत् । कनकाम्बायाः तस्य वृद्धस्य गुणः सम्यग् विदितः । तस्मिन् आपत्काले अर्थव्ययः स्यादिति मत्वैव स नागच्छदिति कनकाम्बा तर्कयामास । अथापि सा स्वकीयं मनो न प्राकाशयत् । दैववशेन यदि तस्माद् रूप्यं लब्धं स्यात् स्वर्णाम्बायाश्चिकित्सा तत एव अविलम्बेन कर्तुं शक्येति मत्वैव सा मौनमाश्रयत् । तावुभावपि स्वकृतं प्रस्तावमन्वमोदिषातामिति मनितवान् कृष्णः 'गत्वा प्रत्यागमिष्यामी'ति कथयित्वा बहिर्गत्वा अश्वशकटं कञ्चन उपसंविधाय त्वरितो जगाम । सपदि रङ्गराजुः 'वृद्धाम्ब स्वामिनो भृशं श्रान्ताः सन्ति । अत्र वयं तूष्णीमेव हि आसिष्यामहे । गृहान् गत्वा ननु पूजां निर्वर्त्य आगच्छन्तु । स्वामिनो बुभुक्षां न सहेरन् अम्ब' इति सद्रवं मृदु बभाषे । तदाकर्णितवत्याः कनकाम्बाया मनस्यपि 'इतः साम्बशिवस्य क्षुधितस्य वर्तनमयुक्तम्' इत्यभात् । 'साधु । वयं गृहं गत्वा प्रत्यागच्छेम । अश्वशकटमानय' इत्यब्रवीत् । अनन्तरे निमेषे शकट आगत्य अतिष्ठत् । त्रयोऽपि तत्रारुह्य गृहमगच्छन् ।

राज्यभोगसक्तस्य हि कदाचिद्दुःखमप्यवर्जनीयं भवेत् । मशकस्य तु न किञ्चिदपि दुःखावकाशः । 'मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः' इति ह्युच्यते । उच्यते हि—'राजिलो राजवद्भाति स्वैः सुखैः सुखहेतुभिः । इति नैषधेऽपि । अत्र चानुशासनिकपर्वगतः कीटोपाख्यानवृत्तान्तोऽप्यनुस्मारितः । व्यासमहर्षिः कदाचिदरण्ये विचरन् शकटागमनमार्गगतं शकटशब्दं श्रुत्वाऽतिवेगेन धावन्तं कञ्चन कीटं पश्यन् पप्रच्छ । 'कीट सन्त्रस्तरूपोऽसि त्वरितश्चैव लक्ष्यसे । क्व धावसि तदाचक्ष्व कुतस्ते भयमागत'मिति । अथ च 'शकटस्यास्य महतो घोषं श्रुत्वा भयं मम । तस्मादतिक्रमाम्येष भयादस्मात्सुदारुणात् ॥ दुःखं हि मृत्युर्भूतानां जीवितं च सुदुर्लभम् ॥' इति कीटेन प्रत्युक्तस्य व्यासस्य वचनम् 'इत्युक्तः स तु तं प्राह कुतः कीट सुखं तव । मरणं ते सुखं मन्ये तिर्यग्योनौ तु वर्तसे' इत्यादिकं श्रुत्वा पुनः कीटः प्राह 'सर्वत्र निरतो जीवः इतश्चापि सुखं मम । चिन्तयामि महाप्राज्ञ तस्मादिच्छामि जीवितुम् ॥ इहापि विषयः सर्वो यथादेहं प्रवर्तित'इति । अतः समानविषयभोगत्वमेव कीटनृपयोरिति पर्यवसितम् । तथा च निर्विशङ्कमेव सर्वदा गायतोऽपि मशकस्य सदा दुःख्यतोऽपि राज्ञः शास्त्रवेद्यं निखिलजनसम्मतं च तारतम्यं सम्यगवगम्यमेवेति । यद्वा किन्नरपतेः कुबेरस्य 'किन्नरेशो वैश्रवणः' इत्यमरः । क इव को वाऽनर्थ इति । 'निद्रारसं न लभते महतां निधीनां रक्षापिशाच इव संप्रति राजराजः' इत्युक्तरीत्या कुबेरस्य सदा चिन्तादुःखं, मशकस्य तु तत्र नेति कुबेरसाम्यं भवेत् किमित्यर्थः । एतेन प्रथमोक्त श्लोकार्थे चटकगरुडयोः अलसागहस्तयोः मशककिन्नरयोश्च यत्किञ्चिदंशसाम्यमात्रेण तत्तुल्यतयाद्भावनस्य तदंशेऽपि पुष्कलसाम्याभावात् अधस्तनश्लोकैरेव निरस्तप्रायतया पुनश्च तच्छङ्कानुन्मेष इति परास्तम् । यत्किञ्चिदप्रधानांशेऽप्यपुष्कलसाम्यमात्रस्याप्रयोजकत्वेऽपि मुख्यतमभोगाद्यंशेऽत्यस्या (न्तसा)म्यस्य तौल्यप्रयोजकत्वात्तन्निरसनफलत्वमुक्तार्थस्य भवेदिति न किञ्चिदपहीनमिति । तदेवमेतादृशोदाहरण-

गणैः सत्सन्तानप्रसूतैः ज्ञानगुणांशेऽत्यन्तसमानस्यापि पुरुषस्यावरवंशोद्भवस्य न तैः सह समानपट्टारोपः परीक्षकपारिषत्सम्मत इत्यर्थः सूचितो भवति । अयमेवार्थो रहस्यत्रयसारादिष्वपि विपुलमुपपादितः । शिखरिणीवृत्तम् । 'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी' इति तल्लक्षणात् ॥ ११ ॥

निमीलयतु लोचने न हि तिरस्कृतो भास्करः
श्रवः स्थगयतु स्थिरं परभृतः किमु व्याकुलति ।
स्वयं भ्रमतु बालिशो न खलु बम्भ्रमीति क्षितिः
कदर्थयतु मुष्टिभिः कथय किं नभः क्षुभ्यते ॥ १२ ॥

ननु वयं नाभ्युपगच्छाम एव परश्शतजल्पनेऽपि जात्यादिप्रयुक्तमुत्कर्षापकर्षादिकम् । अन्यपलापस्त्वकिञ्चित्कर एवास्माकमित्याशङ्क्य त्वदन्यसर्वजनविदितेऽतिप्रसिद्धे वस्तुनि त्वदभ्युपगमोऽनावश्यक एव । यतोऽयं विषयो न सामान्यजनदुरूहः । येन 'बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः । अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषित'मित्यादिनिर्वेदस्य 'प्रमाणतन्त्राः सन्तीति कुतो वेदार्थसंग्रहः' इत्यादिसमाधानस्य वावकाशः स्यात् । प्रकृतविषयस्य तु सर्वेऽपि बोद्धार एव । परं तु त्वमेक एव मत्सरान्नाभ्युपैषि । भ्राम्यसि वा अभिनिवेशात् । तच्च अकिञ्चित्करमेव । महाजनपरिग्रहादित्येतमर्थमप्रस्तुतप्रशंसया समर्थयति (निमीलयत्विति) । कश्चित् सूर्यतेजासहनः बालिशः मूर्खः 'मूर्खवैधेयबालिशाः' इत्यमरः । स च दृढपूर्वश्रुतत्वात् तद्दर्शनाद्यसूयया स्वनयने नितरां मीलयतु गाढं मीलयत्वित्यर्थः । स च निरर्थक एवेति भावः । तत्र हेतुमाह (नहीति) । हि यस्मात् कारणात् भास्करः निखिलजगज्ज्योतिष्करः सूर्यः न तिरस्कृतः नाच्छादितः । जगतामिति शेषः । एकजननयननिमीलनमात्रेण निखिलजगद्व्याप्ततेजोराशिसमुत्सारिततमस्काण्डस्याखण्डमार्ताण्डमण्डलस्यापार्थभावं को वा महाजनः कथयेदित्यर्थः । सुप्रसिद्धे विषयेऽनभ्युपगन्तुरेवाचातुर्यपर्यवसानस्य निखिलपरीक्षकसम्मतत्वादिति भावः । यद्वा—'सम्मीलने नयनयोर्न हि किञ्चिदस्ती'त्यत्रेव निमीलनमत्रासूयाप्रद्वेषभूम्ना मरणरूपमपि

भवेत् । तथा चैतदस्तमयमात्रान्न सूर्यास्तमयो भवतीति लोकोक्तिरपि अत्रावेदितेति बोद्धव्यम् ।

नन्वत्र स्वनयननिमीलनेऽपि तदीयातपादेस्त्वगिन्द्रियवेद्यतया नात्यन्ततः सूर्यप्रतीतितिरोधानमित्यतो दृष्टान्तान्तरमनुसरति (श्रव) इति । कश्चित् पिकद्वेषी बालिशः तदीयशब्दश्रवणप्रद्वेषात् श्रवः स्वीयं कर्णयुगळं स्थिरं दृढतरं स्थगयतु हस्ताभ्यामाच्छादयतु । तथापि परभृतः कोकिलः ध्वांक्षाति किमु काकवदाचरति किमित्यर्थः । न तु कदापि पिकः काकवच्छब्दायेत । न वा जनास्तं काकतुल्यतया विदन्तीत्यर्थः । 'काकानां कोकिलानां च सीमाभेदः कथं भवेत् । यदि विश्वसृजा साक्षात् न कृता कर्णशष्कुली' ति श्लोकस्य त्वदीयकर्णशष्कुली न विषयतापदमश्निरे हति । किन्तु परीक्षकाणामेवेति भावः । परभृतशब्देन यथा परैः काकैर्जन्मप्रभृति भृतत्वेऽपि तदीयजातियोगो न सम्भवति । तथा तदीयाचारसंक्रमोऽपि सुतरामित्यर्थोऽपि ध्वनितः । ननु श्रवणपिधानमपि पिककाकयोर्वैषम्यपरिज्ञानस्यैवोपयोगि न तु साम्यज्ञानस्येत्यतः स्वभ्रान्तिस्थलमुदाहरति (स्वयमिति)। बालिशः बालो मूढो वा । 'शिशावज्ञे च बालिशः' इत्यमरः । स्वयं भ्रमतु भूभ्रमणसिद्ध्यर्थं स्वदेहं परिभ्रामयतु । यद्वा– स्वदेहभ्रमणसमये भूभ्रमणमपि भ्रमतु । भूमिर्भ्राम्यतीति स्वयमन्यथा प्रतिपद्यतामित्यर्थः । तथाऽपि क्षितिः न खलु बम्भ्रमीति न भ्राम्यत्येव हीत्यर्थः । अत्र च 'भ्रान्तैः क्लृप्तं त्रिलोकीभ्रमणमिह तथा मेदिनीभ्रान्तिपाता'विति श्लोकार्थोऽपि ज्ञापितः । व्याख्यातं च तत्र स्वयं भ्राम्यन्तो हि बाला भुवं भ्राम्यन्तीमभिमन्यन्त इति । भूभ्रमणवादस्तु श्रुत्यादिविरोधात् , भगोळभ्रमणेऽपि , गणितविरोधाभावात् गणितशास्त्रप्रवर्तकैरार्यभटादिभिरेव 'भपञ्जरः सग्रहो भ्रमती' ति उक्तत्वाच्चाप्रामाणिक एवेति भावः । यदि च सूर्यसिद्धान्तादौ भूभ्रमणवादोऽप्यनुमन्यते । तथाऽपि एतादृशविलक्षणबालभूभ्रमणस्य न कैश्चिदपि सिद्धान्तिभिरभ्युपगमः सेत्स्यति । भूमेरघो-

त्तरभावेन भ्रमणस्य कैश्चिदभ्युपगतत्वेऽपि भ्रान्तबालप्रादक्षिण्येन तद्भ्रमणस्य सर्वलोकविरुद्धत्वात् । ननु च स्वयं भ्राम्यतो भूभ्रमणादिभ्रान्तिमात्रमपि दुरपलपम् । तत्र च प्रामाण्याप्रामाण्यविवेकोऽपि विवादपदमेवेत्यतः दृष्टान्तान्तरमाह (कदर्थयत्विति] । कदर्थशब्दात् तत्करोतीति णिच् । गगनं क्षोभयामीति कश्चिद्बालिशः तदुपरि मुष्टिप्रहारैर्वृथा परिश्राम्यतु । अनेन गगनं क्षुभ्यत्र किं क्षोभं प्राप्नोति किमित्यर्थः । कथय । पादत्रयार्थेषु यत्किञ्चित्प्रतिवचनवदत्रापि यत्किञ्चित्प्रतिवचनसम्भवे तत् कथयेत्यर्थः । सर्वेऽप्युक्तदृष्टान्ताः प्रतिवचनानर्हा एवेति भावः । नन्वत्र भास्करतिरस्करणादीनां सर्वजनदुष्कराणां प्रसक्तिविरहेणैव न प्रतिषेधसम्भवः । यत्किञ्चिदितरसुकरस्यान्यैरशक्यत्वकथने हि दोषलेशः परामृशे(?)दिति चेदत्रोच्यते । दृढमुष्टितया स्वाभ्युपगतं सर्वथाऽप्यपरित्यजतो गृहीतग्राहिणः कस्यचित् स्वानभ्युपगममात्रेण वतुस्वरूपासिद्धिमभिमन्यमानस्य तद्भ्रान्तिनिवृत्त्यर्थं सूर्याद्यनभ्युपगन्तारं कञ्चन वादिनं परिकल्प्य तदनभ्युपगममात्रेण यथा सर्वलोकप्रसिद्धसुप्रकाशसूर्यतेजसोऽसिद्धिकथनं न शक्यते सम्भावयितुम् । तद्वदेवैतदपीति दृष्टान्तकथनमात्रपरत्वान्न दोषः । वस्तुस्वरूपस्यैवंविधत्वेऽपि कविचातुर्यादत्र प्रसक्तवस्तुनोऽपि प्रसक्तिः श्लेषादिमहिम्ना निवेशित इति तत्रत्यक्षेपार्थकशब्दजातपरित्यागेन तदितरपदगुम्भमात्रसमाक्षया प्रतीयत एव । तथा ह्यत्र श्रीकृष्णपरतया कश्चिदर्थः । बालिशः कश्चन शिशुरूपो भगवान् लोचने निमीलयतु । नेत्रबन्धनादिलीलासमये तत्तद्बालनेत्रच्छादनवत् सूर्यचन्द्ररूपे स्वनयने अपि निमीलयतु । तेन भास्करस्तिरस्कृत एव । न तु पुनश्चक्रादिविधानमप्यपेक्षते सूर्यतिरस्कारः । अपि तु पक्षद्वयमेळनमात्र एव सूर्यास्तमयो भवेत् । सूर्यतिरस्काराच्च चन्द्रतिरस्कारोऽप्यर्थसिद्ध एव । सूर्यप्रकाशसंक्रमादेव चन्द्रतेजोऽभिवृद्धेरुक्तत्वादिति भावः । एकलोचनपिधानमात्रेण भगवतः सूर्यास्तमयो भवेत् । त्वं तु लोचनद्वयमपि निमीलय । किं भवेत् सूर्यास्तमय इति द्विवचना-

10

॥ श्रीः ॥

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशछेध:खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु १७.] कलि ५०४४ } स्वभानु-कन्या साधारण { [सं १.
,, तुला शास्त्रानुबन्ध ,, १.
आहत्य २.

## संस्कृतग्रन्थजातम् ॥

(धर्मशास्त्रम् । अनुवृत्तम्)

न परं उक्तविधधर्मशास्त्रमित्येतावतैव । अपि तु विषयप्रतिपादनेषु काव्यशोभातिशायिना सौन्दर्येणापि अयं मनुस्मृतिग्रन्थः अखिलानामादरार्हः । क्रिस्तोः प्राक् प्रथममस्य काल इति मन्यन्ते । अत्रत्या बहवः श्लोकाः महाभारते दृश्यन्ते । मनोरतिप्रख्यातत्वात् द्वीपान्तरेष्वपि पूर्वं एतदनुसारेण धर्मव्यवस्था कृतेति श्रूयते । चीनेष्वयुताद्वर्षेभ्यः पूर्वमेतदुपजीवनेन धर्माचारव्यवस्था कृतेति ज्ञायत इति अचिरादेव काचन वार्ता पत्रिकासु प्राकाश्यत । अत्र व्याख्यातारो बहवः । तत्र प्रायेण नवमशतके काश्मीरेषु स्थितो मेधातिथिः प्राचीनतमः । द्वादशे स्थित इति सम्भाव्यमानो गोविन्दराजोऽपरः । पञ्चदशे काश्यां स्थितः कुल्लूकभट्टोऽन्यः ।

नारदस्मृतिः—व्यवहारनिरूपणपरा । मानवधर्मशास्त्रस्यैव सम्प्रदायभेदः इह निबद्ध इति ज्ञायते । व्यवहारमार्गः इहातीवाभिवर्धितः । अष्टादश व्यवहारपदानि द्वात्रिंशदवान्तरविभागवन्ति कृतानि । बाणस्य इयं स्मृतिर्विदिता । अष्टमे स्थितेन असहायेन व्याख्याता च । तेन ततः प्राक्तनी इयं द्वितीयादर्वाचीनेति मन्यन्ते । अत्र दीनारपदश्रवणात् अस्य चतुश्शतीपर्यन्तं शासनेषु निर्देशदर्शनात् ततोऽर्वाचीनत्वमपि भातीति कश्चित् ।

अथ बृहस्पतिस्मृतिः । इयं खण्डशः उपलभ्यते । प्रायेण इयं मनुस्मृतेर्वार्तिकमित्यभिप्रयन्ति । पञ्चमं सप्तमं वा अस्याः काल इति च ।

अथ याज्ञवल्क्यस्मृतिः । आचारव्यवहारप्रायश्चित्तविषयाः त्रयोऽत्राध्यायाः । अत्रापि युक्त्याभासेन न तृतीयात् प्राक्तनः काल इति वदन्ति । अत्र व्याख्याता विज्ञानेश्वरः । अयं दाक्षिणात्यः १०५०-११०० मध्ये स्थित इत्याहुः । मिताक्षरा इति अस्य प्रसिद्धं व्याख्यानम् । इदमाप्रिमोढं सर्वैः प्रमाणत्वेनादृतं वैयाकरणेन पायिण्डगुवैद्यनाथेन व्याख्यातं च । अपरार्क इत्यन्योऽपि व्याख्याता याज्ञवल्क्यस्मृतेः ।

पराशरस्मृतिः । माधवेन व्याख्याता । इतः पञ्चगुणविस्तृता बृहत्पराशरस्मृतिरस्ति । एवमन्या लघुबृहद्वृद्धभेदभिन्नाः स्मृतिग्रन्था बहवः सन्ति, विष्णुहारीतात्र्युशनस्संवर्तदक्षव्यासबृहस्पतिपितामहवसिष्ठप्रभृतिभिः कृतत्वेन प्रसिद्धाः । पुराणानामिव स्मृतीनामपि अष्टादशत्वमाहुः । क्वचित् पञ्चाशच्छताधिकाः स्मृतयः परिगणिताः ।

एवं ऋषिप्रणीतानां स्मृतीनां बहुत्वाद्विस्तृतत्वाच्च तद्विषयान्सङ्कलय्य संक्षिप्य विप्रतिपत्तौ तत्परिहारेण निर्णयं प्रदर्शयितुमर्वाचीना बहवः प्रावर्तन्त । एषां निबन्धनकारा इति व्यवहारः । तत्र केचिदिमे प्रसिद्धाः । कान्यकुब्जेश्वरस्य गोविन्दराजस्य मन्त्री लक्ष्मीधरः द्वादशपूर्वार्धकालिकः स्मृतिकल्पतरुकारः । हलायुधः ब्राह्मणसर्वस्वकारः । देवण्णभट्टः द्वादशशतीं समया स्थितः स्मृतिचन्द्रिकाकारः । अतिविस्तृतस्य चतुर्वर्गचिन्तामणेः त्रयोदशान्ते निर्मितस्य कर्ता हेमाद्रिः । मदनपारिजातकारो विश्वेश्वरः चतुर्दशतृतीयपादे स्थितः । स्मृतिरत्नाकरकारः हर्षसिंहदेव । (१३२५) मन्त्री च चण्डेश्वरः । विवादचिन्तामणिप्रभृतीनां ग्रन्थानां कर्ता वाचस्पतिः (१५१०) । वङ्गेषु प्रसिद्धस्य दायभागस्य कर्ता पञ्चदशात् प्राचीनः जीमूतवाहनः । षोडशे स्थितः स्मृतितत्त्वकारः रघुनन्दनः । सप्तदशे स्थितः निर्णयसिन्धुकारः कमलाकरभट्टः । भगवन्त भास्करकारो नीलकण्ठः ।

वीरमित्रोदयकारः मित्रमिश्रः । स्मृतिकौस्तुभकारः अनन्तदेवः । सुधीविलोचनपितृमेधसारगृह्यरत्नकण्ठभूषणानां कर्ता वैदिकसार्वभौमः । स्मृतिमुक्ताफलकारः वैद्यनाथदीक्षित इति ।

इति धर्मशास्त्रम् ।

R S V L 00983

# 'वाहि वाते'ति श्लोके विशेषः ॥

(V. R. Srinivasa Tatacharya Siromani,)

'वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश ।
त्वयि मे गात्रसंस्पर्शश्चन्द्रे दृष्टिसमागमः ॥'

श्रीमद्रामायणे युद्धकाण्डे पञ्चमसर्गे अयं षष्ठः श्लोकः । अत्र श्रीगोविन्दराजः 'प्रियास्पृष्टद्रव्यस्पर्शस्य विनोदहेतुत्वात् तत्सम्पादनार्थं वायुं प्रार्थयते—वाहीति । हे वात, मे कान्ता यतः यत्र वसति तत्र वाहि गच्छ । तत्र गत्वा किंकरणीयमित्यत्राह— तामिति । न चैतदन्यतः सेत्स्यतीति सदृष्टान्तं दर्शयति त्वयीति । दृष्टिसमागमः चन्द्रे यथा चन्द्राधीनः तथा मे तद्गात्रस्पर्शोऽपि त्वयि त्वदधीनः । यथा तदवलोकितं चन्द्रं पश्यन् तत्प्रणालिकया तां दृष्टवानस्मि तद्वत् तदङ्गस्पृष्टं त्वां स्पृशन् तामेव स्पृष्टवान् भवेयमित्यर्थ' इति व्याचष्ट । श्रीमहेश्वरतीर्थस्तु पूर्वोक्तरीत्या श्लोकमेनमवतार्य व्याकरोत् । परं तु अवतारिकायां प्रियास्पृष्टेति द्रव्यविशेषणस्य स्थाने प्रियजनस्पृष्टेति सामान्यतः प्रयुञ्जानः तदनुगुणं "यद्वा— यतो यत्र कान्ता वर्तते तत्र वाहि सञ्चर । स्वात्मानं स्पृशन्तं वायुं प्रत्येवमुक्तम् । मद्गात्रसंस्पर्शः तस्याः सिद्ध्येदिति भावः" इति श्रीगोविन्दराजानुक्तमप्यर्थं अवर्णयत् । अत्र प्रियास्पृष्टवातस्पर्शाधीनो विरहिणः प्रियागात्रसंस्पर्शः इति फलितमर्थं हृदि निधाय कालिदासो मेघसन्देशे उत्तरमेघे "भित्त्वा....प्रवृत्ताः । आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥" इत्यवदत् । श्रीवेङ्कटनाथो हंससन्देशे 'देहस्पर्शो मलयपवने दृष्टिसम्भेदमिन्दौ' इति पादेनैतत्पद्यार्थं प्रत्यपादयत् ।

अत्र व्याख्यातारौ सदृष्टान्तमिति प्रतिपादयन्तौ दृष्टान्तालङ्कारं सूचयतः । मे, (कान्तायाः) गात्रसंस्पर्शः । त्वयि (अधीनः) मे, (कान्तायाः) दृष्टिसमागमः चन्द्रे (अधीनः) इति वाक्यद्वयं दृष्टान्तालङ्कारस्य विषयः । वातचन्द्रयोर्विशेषणयोः तापशामकत्वादिना बिम्बप्रतिबिम्बभावः । वाक्यार्थयोरार्थिकमौपम्यं मनसिकृत्य पूर्वोक्तरीत्या यथातथाशब्दघटनम् । अत्र लुप्तोपमाप्रतिपादनं तु आलङ्कारिकाणामसम्मतम् । नागेशभट्टस्तु एतदुत्तरार्धस्य व्याख्यानद्वयवर्णितार्थविलक्षणं 'कान्तास्पर्शवति त्वयि मे गात्रसंस्पर्शः निदाघतप्तदृष्टेश्चन्द्रे समागमः । (सः) यथाऽखिलदृष्टितापशामकः एवं त्वत्स्पर्शो गात्रीयाखिलतापशामक इत्यर्थः । निदर्शनालङ्कार' इत्यर्थमभणत् । अत्र कान्तास्पर्शवतीत्यादिपदयोजनायां अस्मच्छब्दार्थनिदाघतप्तदृष्ट्योः वातचन्द्रयोश्च गात्रसंस्पर्शसमागमविशेषणयोः यथाक्रमं तापवत्त्वादिना तापशामकत्वादिना च बिम्बप्रतिबिम्बभावः । बिम्बप्रतिबिम्बभावापन्नपूर्वोक्तधर्मविशिष्टयोः गात्रसंस्पर्शसमागमयोरैक्यारोपान्निदर्शनालङ्कारः । चित्रमीमांसायां कुवलयानन्दे च वाक्यार्थनिदर्शनायां विशेषणविषये बिम्बप्रतिबिम्बभाव उपपादितो लक्ष्यते । अत्र विशेषणविशिष्टयोर्गात्रसंस्पर्शसमागमयोरभेदः अनुपपद्यमानः(सः) यथेत्यादिवाक्योक्तरीत्या उपमां कल्पयित्वा पर्यवस्यति । यद्यपि विशेषणविषये बिम्बप्रतिबिम्बभावः वाक्यार्थयोरार्थिकौपम्यं च दृष्टान्तनिदर्शनयोः समाने । तथाऽपि 'इह (निदर्शनायां) बिम्बप्रतिबिम्बताक्षेपं विना वाक्यार्थापर्यवसानं दृष्टान्ते तु, पर्यवसितेन वाक्यार्थेन सामर्थ्यात् बिम्बप्रतिबिम्बताप्रत्यायनमिति साहित्यदर्पणे, 'अभवन्वस्तुसम्बन्धः इत्युक्तत्वादेव प्रतीतिपर्यवसानाभावात् अस्या दृष्टान्ततो भेदः । परस्परनिरपेक्षयोर्वाक्यार्थयोर्दृष्टान्तालङ्कारः । इह पुनः सापेक्षयोरिति भेद इत्यन्ये' इति निदर्शनालङ्कारविवरणावसरे काव्यप्रदीपोद्योते च प्रतिपादनादस्त्येव तयोर्भेद इत्यवसीयते । रूपकनिरूपणावसरे 'अभेदस्य श्रौतत्वार्थत्वाभ्यां उद्देश्यविधेयभावालिङ्गनानालिङ्गनाभ्यां च रूपकनिदर्शनयोर्वैलक्षण्येन' इत्याचक्षाणस्य चित्रमीमांसोक्तरूपकलक्षणे बिम्बाविशिष्ट इति विषयविशेषणं दूषयित्वा रूपके बिम्बप्रतिबिम्बभावं सोदाहरणं समर्थयतो जगन्नाथस्य मते तु श्री अप्पय्यदीक्षि-

तानुसारिनागेशोक्तवाक्यार्थनिदर्शनालङ्कारविषये वाक्यार्थरूपकस्यैवावकाश इति विभाव्यते ।

चित्रमीमांसायामुपमाप्रकरणे 'अर्थशक्तिमूलो वस्तुनोपमाध्वनिर्यथा 'वाहि ... समागमः' ॥ अत्र अर्थशक्त्या चन्द्रे दृष्टिसमागम इत्यनेन चन्द्रे सीतामुखसादृश्यं व्यज्यते' इत्यभ्यधीयत । एवं वदतश्चित्रमीमांसाकृतः (कान्तास्पर्शवति) त्वयि मे गात्रसंस्पर्शः चन्द्रे दृष्टिसमागमश्च (तापशान्त्यादिहेतुः) इतीदृशी पदयोजना अभिमता भाति । तथा सत्येव श्रीरामस्य सीतावदने दृष्टिसमागम एव तापशान्त्यादिहेतुः न तु चन्द्रे दृष्टिसमागमः । यस्मादेवं अभिधीयते तस्माच्चन्द्रे सीतामुखसादृश्यं व्यज्यत इति वक्तुं शक्यते । यदि रामायणव्याख्यातृसम्मतपदयोजने अभिमते स्यातां तदा तत्र दृष्टान्तनिदर्शनयोः स्वीकारेण वाक्यार्थद्वयसम्बन्धिन्याः गुणीभूतायाः उपमायाः प्रतीयमानत्वेन चन्द्रे सीतामुखसादृश्यस्य तुरीयपादेनाप्रतीयमानत्वेन च तस्य प्रतीयमानत्वध्वनित्वकथनमसमञ्जसं स्यात् । एतत्पद्यं रामायणव्याख्यानतो गुणीभूतव्यङ्ग्यं चित्रं च चित्रमीमांसातो ध्वनिकाव्यमवगम्यते ।

---

# वाल्मीकिसेवा ॥

(अनुवृत्तम्)

कीर्णाः अत्र केचित् तत्र केचिदिति विभिन्नदेशगामिनः । पृथक् गजान्तरावियुक्ताः । प्रचरन्ति सञ्चरन्ति आहारयन्ति वा । मेघवर्णा इति पुष्ट्यतिशयः तरस्विन इति बलवीर्यादयः सर्वे गुणाश्च विवक्षिताः ।

न परं तत्र क्रीडैव तेषां प्रयोजनम् । अपि तु सार्वकालिकविमलशीतपानीयपानजनिता निर्वृतिरपीत्याह ते तत्रेति । 'संविगाहन्ते वनानि वनगोचराः' इत्यनेन एवंविधपरमद्विपसञ्चारोचितं प्रदेशवैपुल्यं सूच्यते ।

अत्र पम्पायां क्रीडतां गजानामाक्रन्दस्य ऋश्यमूके श्रवणं यदुच्यते तस्य प्रयोजनं व्याख्यातार आहुः 'अनेन ऋश्यमूकस्य पम्पासामीप्यमुक्तम्' इति । एतत्प्रतिपादनस्य वा किं प्रयोजनमिति जिज्ञासितव्यम् । पम्पातः श्रवणदूर एव ऋश्यमूको वर्तते । पम्पां गतस्य न ततः परं गन्तव्योऽध्वाऽति-

दूर इति ज्ञापनमुद्दिष्टं स्यात् । मतङ्गारण्यान्तर्गतत्वेन तस्यातिसन्निहितत्वेन वा ऋश्यमूकस्य प्रकारान्तरेण कश्चन विशेषोऽभिसंहितः स्यात् ।

'ऋश्यमूके गिरिवरे पम्पापर्यन्तशोभिते ।'

इति पूर्वोक्तमिह तात्पर्येण प्रकाशितमिति वेदितव्यम् ।

यत्तु गजानां श्लोकद्वयेन वर्णनं तस्य, तादृशविशिष्टगजघटादर्शनं अपरं मनोविनोदनकारणमिति अचिरभाविनो महिषीसमागमस्य राज्यलक्ष्मीप्राप्तेश्च सूचकमिति च ज्ञापनं प्रयोजनं स्यात् ।

ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान् ।
रुरूनपेतापनयान् दृष्ट्वा शोकं जहिष्यसि ॥

नीलत्यादि किं पूर्वत्रैवान्वेति उत उत्तरत्रैव उत उभयत्रेति निर्णयो दुष्कर इति भाति । उत्तरत्रैवेत्यत्र तु स्वारस्यं प्रतीयते । अपनयः आत्मनोऽन्यत्र प्रापणम् । सः अपेतः अवर्तमानो येषु तान् । यं कमपि दृष्ट्वा न पलायन्ते । वधस्याकोविदत्वेन भीतिरहितत्वात् । तस्माद् यावत्तृप्ति दर्शनं सुकरम् । 'ऋक्षांश्च द्वीपिनश्च नीलकोमलप्रभान् रुरूंश्च दृष्ट्वा इत्येकक्रियाकर्मतयोपादानं देशकालैक्यप्रत्यायनार्थम् । यत्र यदा ऋक्षद्वीपिदर्शनं तत्रैव तदैव रुरुदर्शनं भविष्यति । 'येषां च विरोधः शाश्वतिकः' तेऽपि तत्र त्यक्तवैराः सहसञ्चारादिशीला भवन्ति । 'सन्निधौ वैरत्यागः' इति योगशास्त्रोक्तदिशा ऋषीणां योगप्रभावातिशयेन सा अरण्यभूमिस्तथा पुण्या संवृत्तेति भावः । 'अपेतापजयान्' इति क्वचित्पाठः । तत्र 'यदा द्वीपिप्रभृतयः रुरवश्च क्रीडायुद्धं कुर्वन्ति तदापि रुरव एव जिष्णवो भवन्ति । न तु जातचापि तेषामपजयः । तथा तेषु स्निह्यन्ति द्वीपिन इत्यभिप्रायः । एवं स्थलमाहात्म्यविशेषोऽत्र व्यङ्ग्यः । 'दृष्ट्वा शोकं जहिष्यसि' इति विनोदनं कण्ठोक्तम् ।

41 अथ ऋश्यमूके सुग्रीवनिवासस्थानमाह—

राम तस्य तु शैलस्य महती शोभते गुहा ।
शिलापिधाना काकुत्स्थ दुःखं चास्याः प्रवेशनम् ॥

**तस्या गुहायाः प्राग्द्वारे महान् शीतोदको ह्रदः ।
फलमूलान्वितो रम्यो नानामृगसमावृतः ॥
तस्यां वसति सुग्रीवश्चतुर्भिः सह वानरैः ।**

अत्र प्रथमार्धेन वासस्थानमुक्तम्, यन्महत् शोभनं च । द्वितीयेन सुग्रीवस्य तद्द्वारपिधाने श्रद्धातिशयः भ्रातृभयातिशयस्य व्यज्यते । ततोऽपि 'तत्र गत्वा बहुकृत्व आह्वानेऽपि प्रतिवचनं यद्यपि न भवेत् तथाऽपि न सहसा परावर्तितव्यम् । अपि तु यावदपावरणं प्रतीक्षा कार्यें'ति कबन्धस्य श्रीरामं प्रति बोधनाभिप्रायो गम्यते । ततोऽपि पुनः श्रीरामसुग्रीवसमागमे तस्य औत्सुक्यविशेषः ।

तस्य स्थानस्य चिह्नमुच्यते प्राग्द्वारे ह्रद इति । वासोचितं तीर्थसौकर्यमपि तेन भवतीत्यभिप्रेत्याह—शीतोदक इति । शैत्यं गुणान्तराणामप्युपलक्षणम् । आहारसौकर्यं फलमूलान्वित इत्यनेनोक्तम् । रम्य इत्यादिना चक्षुरादिप्रीतिः ।

भूयिष्ठं कालं गुहायामेव सुग्रीवो नयतीत्यभिप्रेत्याह तस्यामिति । अल्पं तु कालं गुहातो बहिरपीत्याह

**कदाचिच्छिखरे तस्य पर्वतस्यावतिष्ठते ।**

एवं चेत् दैवात् भवति, प्रतीक्षणक्लेशो न भविष्यतीत्यभिप्रायः ।

---

# पुस्तकपरामर्शः ॥

**भेदसाम्राज्यम्** । **श्रीपरमहंसपरिव्राजकाचार्यैः परपक्षनिराकृत्यादिबहुविधप्रबन्धप्रणेतृभिः श्रीकोळियालं स्वामिन इति विख्यातैः श्रीरङ्गरामानुजमहादेशिकैर्विरचितम्** । **श्री· एन् वरदाचार्यः** Retired Teacher, **तिरुच्चानूर्** (तिरुप्पति वया)—**अस्माल्लभ्यम्** । **सार्धैकरूप्यमूल्यम्** ।

उपनिषदः भगवद्गीता ब्रह्मसूत्राणीत्येतत्त्रितयविमर्शनपरतया भागत्रयात्मना चिकीर्षिते ग्रन्थे वेदान्तापरपर्यायोपनिषद्विमर्शनपरं प्रथमभागमात्रमिदं श्री-

स्वामिचरणानां षष्ट्यब्दपूर्तिसमये प्रकाशितम् । ईशावास्यप्रभृतिनृसिंह-तापनीयपर्यन्ता एकविंशतिरुपनिषद् इह तावद्भिरधिकारैर्विमृश्य पृथक् निषेध-वाक्यविषयं चरमं द्वाविंशमधिकारं कृत्वा भेदसाम्राज्यस्य वेदान्तभागोऽयं समापितः । तात्त्विकानामर्थानां निपुणं ग्रहणे विवेचने अनाकुलमति-विशदं वाचा लेखन्या वा प्रकाशने च प्रगल्भन्तेतमामिमे आचार्या इति सुप्रसिद्धमेतत् । सर्वमिह तथैव दृश्यते । उद्धृतानामुपनिषत्प्रकरणा-नामिहोच्यमानः निर्गलितार्थः मृदुधियामपि तत्तदुपनिषत्सारधारणाय बहू-पकुर्यात् ।

---

वीरबलः अक्बर्-अस्य परमसुहृत्स्वन्यतमः मन्त्री च संवृत्तः । सर्वदा विनोदकः प्रतिभावान् गम्भीरस्वभावश्च स आसीत् । चक्रवर्ती तस्य सान्निध्ये बहु पिप्रिये । परिहासेन तस्योपद्रवान् कुर्वन् ननन्द च । कदा-चित् 'गजश्चेदभियुञ्जीत तदा किं कुर्याः' इति चक्रवर्तिना पृष्टः सः सपदि 'अस्ति मे प्रतिभाबले विस्रम्भः' इत्युत्तरं ददौ । अथाचिरेण अनवृते भोजनरसास्वादे स्थितस्सः गजं काञ्चिदात्मानमभ्याधावन्तमपश्यत् । अवि-लुप्तधैर्यः सः अदूरे स्वपन्तं श्वानं कञ्चन पश्चाच्चरणाभ्यामादाय उद्धृत्य भ्रामयित्वा गजस्य मूर्धानं प्रतिचिक्षेप । भीतिभारोपहतस्य शुनः तीव्रो-त्कटानि भषितानि गजं तथा सन्त्रासयामासुः यथा स परिभ्रम्य कान्दिशी-को बभूव । प्रमुदितश्चक्रवर्ती वीरबलस्य प्रतिभाबलमतिमात्रं श्लाघमानः तादृशादपायादात्मानं मोचितवते तस्मै पारितोषिकं बहु ददौ ।

[हिन्दुपत्रिका]

---

कर्षकः— साधु, पट्ट, कच्चित् सर्वान् अजान् अजीगणः ।
पट्टः— आम्, महन्, सर्वान् एकं विना । सोऽतिमात्रं पर्याटीत्, यथा नाहं गणयितुमशकम् । [हि. प.]

... SANSKRIT VIDYAPEETHA TIRUPATI

Registered No. M 2300.

Book XVII ॥ श्रीः ॥ Nos. 3 & 4.

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥


| | | | |
|---|---|---|---|
| पु. १७] कलि५०४४ | स्वभानु-वृश्चिक साधारण | सं. २, | |
| | ,, धनुस् शाखानुबन्ध | ,, २ | |
| | आहत्य | ,, ४. | |


# The UDYANA PATRIKA.

### A SANSKRIT MONTHLY.

November December 1943

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava, Mimamsakesari Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.

# विषयाः ॥

शास्त्रानुबन्धः—

कुवलयानन्दः । [बुधरञ्जनीसमेतः] ७३—८०

1 मेनका ।
2 सुभाषितनीवी ।
3 संस्कृतग्रन्थजातम् ।
4 कल्की वाजिवक्त्रः ।
5 वाल्मीकिसेवा ।

अनुपदं कर्मकरीपुरोहितप्रभृतय आनीयन्त । कर्मकरी गृहमुपलिप्य शुद्धिमकरोत् । पुरोहितः पुण्याहवाचनमकरोत् । तावत् साम्बशिवात् रूप्यदशकं गृहीत्वा गतो रङ्गराजुः अपेक्षितवस्तुप्रभृतिकमानीय अपूरयत् । उभौ च स्नानं कृतवन्तौ । पाकनाज्या पाकभोजनादि समाप्यत । उभावपि कश्चन कालं श्रान्तौ उपविष्टावास्ताम् । तदा दिवा द्वे घण्टे अभवताम् । कृष्णः स्विन्नविदीर्यमाणगात्रः त्वरितमन्तः प्राविशत् । द्वावपि तस्य मुखमभ्यैक्षेताम् । तद्विषादं लज्जां च अदर्शयत् । कनकाम्बा 'का सङ्गतिः' इत्यपृच्छत् । कृष्णः 'न पणः' इत्योष्ठमभिनिष्पीडयति स्म । 'स किं नागतः' इत्याह साम्बशिवः । 'स कुत आगच्छेत् ? पणाशागृहीतस्य मनुष्यस्य का पुत्री कः पुत्रः । अत्र यदि पुत्री दास्यन्ती स्यात् ग्रहीतुमागच्छेत्' इति प्रत्यब्रवीत् । तदाकर्णितवान् साम्बशिवः 'पुत्रीं प्रसूतवान् पिता । तथाऽपि नु 'किरातको भवेत्' इति विचिन्त्य विस्मितो विभ्रान्तः निश्चेष्ट चित्रार्पित इव तथैवावतस्थे । कनकाम्बा तत्प्रति मनागपि चिन्तामकुर्वती 'गच्छतु यदि गच्छति । त्वं स्नात्वा भोक्तुमागच्छ' इत्यवदत् । सोऽपि पूर्वदिनात् प्रभृति उपोषितत्वात् सपदि स्नातुमगच्छत् । अल्पेन समयेन तस्यापि भोजनं निरवर्तत ।

अनुपदं कनकाम्बा साम्बशिवमालोक्य 'तात कुतो नु चिन्तां करोषि । शिरस उपरि चेत् प्रवाहो गच्छति किं तस्मिन् हस्तमात्रे गच्छति किं वा अरत्निमात्रे गच्छति । सर्वं गतम् । इतः का चिन्ता । मम नाम्ना स्थितं क्षेत्रं गृहं च आधीकृत्य सहस्रं रूप्याण्यादाय आगच्छ । उद्योगप्रतिलम्भावधि व्ययाय च अस्माकमर्थोऽपेक्षितः । मद्रे वैद्यव्ययः वर्तनव्ययः कियान्नु भवेत् । यस्य तस्य हेतोः हस्ते सहस्रेण रूप्यैर्भाव्यम्' इत्यवादीत् । साम्बशिवो विभ्रान्तः 'कदा ग्रामाय गमनम् । ऋणग्रहणाय अवकाशः कुत्रास्ति ?' इत्युवाच ।

कनकाम्बा—सर्वं वयं स्वर्णाम्बामादाय सायङ्कालशकटे मद्रं गच्छेम ।



SANSKRIT VIDYA ... TIRUPATI

त्वं चेङ्गल्पट्टु-अत्र अद्यरात्रौ प्रभातात् पूर्वं ग्रामं गत्वा नारट्टु-कोट्टै-नीलकण्ठश्रेष्ठिनि आधिं कृत्वा सपदि पणमादाय श्वः सायं मद्रमागतो भव। अहं भिषजः सकाशं स्वर्णाम्बां नीत्वा 'अयं पण आगच्छति' इत्यभिधाय शस्त्रं कारयामि।

साम्बशिवः—सा समीची आलोचना। किन्तु तत्र कश्चिदन्तरायोऽस्ति।

कनकाम्बा—कोऽन्तरायः।

साम्बशिवः—क्षेत्रगृहादि तव नाम्नि हि वर्तते। अहं कथं आधिशासनं विलिख्य दद्याम्। (किञ्चिदालोच्य) अस्तु। तदर्थमेकं कार्यं कुर्याम। त्वन्नाम्नि स्थितं क्षेत्रं गृहं च आधीकर्तुं त्वया मे अधिकारपत्रं विलिख्य दत्तमिति अद्यैव शासनं किञ्चिद् विलिख्य पुस्तकितं कुर्याम।

कनकाम्बा—सम्यक्। शीघ्रं भवतु। रङ्गराजुं सम्प्रेष्य मुद्रापत्रं क्रीत्वा आनयमिति ब्रूहि।—इत्यब्रवीत्। तथैव मुद्रापत्रमानीतम्। अधिकारपत्रं सज्जीकृतं पुस्तकनशालायां (रेजिस्ट्रेषन् आपीस्) लेखितमभवत्। तावत् सायं पञ्चघण्टासमयोऽभूत्।

सेवको रङ्गराजुः तैःसह मद्रं गन्तव्यमिति जातकुतूहलः कार्यालयं गत्वा निर्वाहकं दृष्ट्वा अष्टानां दिनानां विरामो देय इति प्रार्थयत। तस्य विरामदाने स्वमपि साम्बशिवस्य अन्तरङ्गं मन्यमानो माण्डलिकः स्वस्यापि कञ्चिदुपद्रवं नु कुर्यादिति मत्वा निर्वाहकः सुब्रह्मण्यार्यः विरामप्रार्थनां प्रत्यादिदेश। साम्बशिवस्वर्णाम्बाप्रभृतीन् तस्मिन्नापत्काले विमुच्य स्वकीय उद्योगः श्रेयान् इत्यवस्थातुं रङ्गराजुर्नैच्छत्। तस्मात् पूर्वापरपर्यालोचनमकुर्वन् स एकेन क्षणेन कञ्चन निर्णयमवाप। स्वकीय उद्योग एव विसृष्ट इति काकदे विलिख्य निर्वाहकाय दत्वा साम्बशिवमुपागतोऽभवत्।

सपदि सर्वे मद्रं गन्तुं सज्जीभूताः अश्वशकटमारुह्य वैद्यशालायामागत्यावरुह्य भिषजे ह्रूणाय वार्तां प्रेष्य स्वर्णाम्बां द्रष्टुं तदीयां

तदानीन्तनीं स्थितिं ज्ञातुं च सोत्सुकाः सत्वरा अतिष्ठन् । तदानीं भिषक् स्वर्णाम्बाया उचितां चिकित्सां कुर्वन्नासीत् । पादनाडिकातः परं स बहिरागत्य साम्बाशिवे लेखमेकमर्पयित्वा 'इदं मद्रभिषजे दत्वा द्वे शते रूप्याणि दत्त । स कर्तव्यं कुर्यात् । अल्पेऽपि विलम्बे आपदि पर्यवसानं भवेत् । हस्ते च कानिचिदौषधानि दास्यामि । तानि उपयुञ्जाना एव गच्छत । श्वः प्रभाते भवद्भिरस्खलितं वैद्यसकाशं गतैर्भाव्यम् । जागृत ।' इत्यवदत् ।

तथैव करिष्यामीति साम्बाशिवोऽभ्युपागच्छत् ।

भिषक् 'सम्प्रत्यर्धाधिकासु षट्सु घण्टासु रुग्णां प्रेषयिष्यामः । तावत् अत्रैव तिष्ठत' इत्यभिधाय अन्तर्जगाम ।

ते चत्वारोऽपि बहिरेवातिष्ठन् । भिषजो वचोभ्यः स्वर्णाम्बाया देहास्थितौ पूर्वापेक्षया नाधिको दोषोऽजनीति अतर्कयन् । पादनाडिकापर्यन्तं केऽपि वाचं नोदघाटयन् । पश्चात् कनकाम्बा 'अरे रङ्गराजो, त्वं अस्माभिरेव हि साकं वर्तसे । कार्यालये सन्निधेयमिति किं ते आदेशो नागमत् ।' इत्यब्रवीत् । स्वयमुद्योगान्निवृत्त इति तदानीमेव ज्ञापने स्वस्मै कुप्यन्तस्ते स्वं मद्रमनयन्तः तत्रैव परित्यजेयुरिति भीत्या रङ्गराजुः अनृतवाचमेकामवदत् । 'ह्यः प्रभात एवाहं कार्यालयं गत्वा एकस्य वारस्य उपरमं गृहीतवानासम् । मद्रमहमप्यागमिष्यामि । न मे मनः सहिष्णु ।' इति विद्रुतचित्तमभाषत । तदीयं पारमार्थिकं प्रेम आपदि उपकारकरणौपयिकं गुणवत्त्वं च पश्यतोः साम्बाशिवकनकाम्बयोरुभयोरपि मनो हर्षोच्छूनमभवत् । स्वचक्षुषोरुद्गतं बाष्पं मार्जितवन्तौ ।

सपदि कनकाम्बा साम्बाशिवात् पञ्चरूप्यपत्रमेकमादाय रङ्गराजुं प्रति प्रसार्य 'त्वं चेदस्माभिरागतोऽसि तव गृहे पत्नीपुत्राः एकस्य वारस्य अपेक्षितानां वस्तूनां कृते किं कुर्युः । इमं पणमपि वा आदाय दत्वा आगच्छ' इत्युवाच ।

रङ्गराजुः पत्रमप्रतिगृह्णन् 'वस्तूनि समृद्धानि सन्ति । अद्यैव वेतनमागतम् । क्रीतवानभूवम् । न तत्प्रति चिन्ताऽस्ति । स्वामि-

पुण्येन स्वर्णाम्बाया जीवनं भवतां कलिनिवृत्तिश्च यदि भवेत् तदेव पर्याप्तम्।' इत्यवोचत्। स्वस्य सञ्जातासु तावतीष्वपि विपत्तिषु तथा अगाधाभिमानशाली कश्चन मनुष्यः स्वोपकारकरणायावशिष्यत इतीदं विचिन्त्य प्रमुदितौ द्वावपि भाषितुमशक्तौ तूष्णीमवर्तेताम्।

तदानीं माण्डलिकस्य हूणस्य सेवकः कश्चिदुपमाण्डलिकमुपसृत्य समर्यादं प्रणम्य स्थित्वा लेखं कञ्चन प्रासारयत्। साम्बशिवः ससम्भ्रममुन्नम्य 'किमिदम्' इति पप्रच्छ। सः 'प्रभुर्दातुमादिशत्' इत्युत्तरयामास। सपदि साम्बशिवः तमादाय उद्घाट्य पठित्वा 'सा अपराधपत्रिका' इति बुबुधे। पूर्वं निर्दिष्टास्त्रयोऽप्यपराधास्तत्र विवृता आसन्। ततः परं इमान्यपि वाक्यानि तत्र लिखितान्यभवन्—'इमे त्रयोऽप्यपराधा युष्माभिः कृता इति साधु निरूपितम्। यूयं गुरुकार्याधिकृता महान्त उद्योगस्थाः। भवदीयं कार्यालयं अधिकारप्रदेशं च अनाथं परित्यज्य गमनम्, मिथ्याव्ययपट्टिकानिर्माणम्, राज्यवित्तापहरणं च उद्योगान्निवर्तनस्य काराप्रवेशनस्य चोचिता अपराधाः। एवं कृते भवतामुद्योगान्निवर्तनं कुतो न कर्तव्यमिति कारणं विलिख्य श्वः सायङ्कालात् पूर्वं प्रेषणीयम्। यदि प्रेषणात्प्रमाद्येत, वक्तव्यं समाधानं किमपि नास्तीति, अपराधाः कृता इति भवद्भिरभ्युपगतमिति च वयं मन्येमहि। अपि च युष्मासु स्थितं कार्यालयमुद्राप्रभृतिकं कोशागारोपमाण्डलिके समर्पणीयम्'— इति।

इत्थं लिखितां पत्रिकां साम्बशिवोऽपठत्। सारं कनकाम्बाया अवदत्। तावत् स सेवकः पुस्तकं किमपि प्रदर्श्य तत्र हस्ताक्षरं कुरुतेति प्रस्रवणीं (लेखनीं) प्रासारयत्। साम्बशिवस्तद्गृहीतवान्। परं तु सद्यः हस्ताक्षरं न न्यास। परेद्युः स्वस्य कुत्र नु स्थातव्यम्। को नु क्लेशोऽनुभाव्यः न किमपि ज्ञातुं शक्यम्। तस्मात् आत्मीयमुत्तरं सद्यो दातव्यममन्यत। सन्निहिते आपणे एकं काकदं क्रीतमानाय्य तत्र एवमुत्तरमलिखत्—

भिप्रायः । यद्वा लोचनपदं जनलोचनपरम् । ते निमीलयतु भगवान्, सूर्यपिधानसमये चक्रेणाच्छादयतु । वस्तुतस्तदा सूर्यस्य सत्त्वात् जननयनयोरेवाच्छादनं कृतमिति भावः । एवं श्रवः स्थगयतु स्थिरं श्रवः श्रवणं वृद्धश्रवाः इत्यादौ तथाविधार्थकरणात्, तथा च श्रवणादिकं स्थिरं यथा तथा स्थगयतु निवर्तयतु असकृदुपदेशादिकं परित्यजत्वित्यर्थः । परभृतः परेण पाण्डुना भृतः पोषितो धर्मसूनुः, ध्वांक्षत्येव राज्यसुखादिकमपेक्षत एव । 'ध्वाक्षि कांक्षाया'मिति धातोः भौवादिकात् इदित्त्वान्नुमि लटि रूपम् । असकृत् भगवदुपदेशादेव तस्य नैस्पृह्ये त्पादादित्यर्थः । प्रसिद्धं हि राज्यसुखादिनैराश्यं धर्मसूनोः । उच्यते हि स्वयमेव शान्तिपर्वणि— 'नाहं राज्यसुखान्वेषी राज्यमिच्छाम्यपि क्षणम् । धर्मार्थं रोचये राज्यं धर्मश्चात्र न विद्यते ॥ तदलं मम राज्येन यत्र धर्मो न विद्यते । वनमेव गमिष्यामि तस्माद्धर्मचिकीर्षया ॥ तत्र मेध्येष्वरण्येषु न्यस्तदण्डो जितेन्द्रियः । धर्ममाराधयिष्यामि मुनिर्मूलफलाशनः ॥' इति । उपागमच्च भीष्मोऽप्यमुमर्थं 'वेदाहं तव या बुद्धिरानृशंस्यगुणैव सा । न च शुद्धानृशंस्येन शक्यं राज्यमुपासितु'मिति । अतश्चैतादृशनैरपेक्ष्यमस्य कृष्णोपदेशमूलकमेवेति तन्निवृत्तौ उक्तनैराकांक्ष्यमपि निवर्तेतेति भावः । एवं स्वयं भ्रमतु बालिशः बालक्रीडासक्तः स्वयं स्वदेहमतिवेगतः परिभ्रामयतु । ततश्च क्षितिः बम्भ्रमीत्येव । स्वभ्रमणे स्वोदरगतस्य भूमण्डलस्यापि भ्रमणावश्यम्भावादिति भावः । असकृदावेदितं हि स्तन्यपानमृद्भक्षणादिसमयेषु स्वोदरगताखण्डभूमण्डलप्रकाशनं भगवतो भागवतादिसिद्धम् । एवं मुष्टिभिः कदर्थयतु । मुष्टिशब्दश्चौर्यपरः । मुषधातोः क्तिन्प्रत्ययनिष्पन्नत्वात् । तथा च देवेन्द्राराधनार्थमुपहृतानामन्नपानादीनां स्वयमपहरणेन स्वजातीयप्रयत्नं तदुपरि परिकुपितशतमखादिप्रकल्पितमनर्थजातं च कदर्थयतु व्यर्थं करोतु । ततो नभः क्षुभ्यत एव । नभोवर्तिपदार्थाः क्षोभं प्राप्नुवन्त्येव । मञ्चाः क्रोशन्तीतिवत् तात्स्थ्यात् प्रयोगः ।

नभोवर्तिनां देवताव्यूहानां पुष्कलावर्तकादिमेघडम्बराणां च यावन्नैराश्य-मशेषतः कलुषीकरणात् इति भावः । कथय किमेतादृशं सामर्थ्यं भवतः शक्यसम्भावनं त्वमेव कथय । नान्यः साक्षीत्यर्थः । तदेवमत्र पाद-चतुष्टयेन कृष्णवृत्तान्तप्रतीतिः प्रतिपादिता । अथ प्रतिपादमत्र विभिन्न-वृत्तान्तप्रतिपत्तिरपि प्रदर्श्यते । तथा हि । प्रथमपादेनात्र जरत्कारूपाख्यान-प्रतीतिः । श्रूयते ह्यादिपर्वणि—जरत्कारुनामा कश्चन महर्षिः ब्रह्मचर्य एव व्यवस्थितो गार्हस्थ्यमनभिलषन् यत्रसायंगृहो वायुभक्षणमेव चरन् वने विचरन् कदाचित् स्वपितॄन् वीरणतन्तौ शिथिलीभूते लम्बमानान् गर्तपतनो-न्मुखान् वीक्ष्य दयमानमनाः तैश्च स्वसन्तारणाय पुत्रोत्पादनमभ्यर्थितः कथञ्चिद्विवाहे मनः कुर्वन् जरत्कारुनाम्नीं वासुकिपुत्रीमुपयच्छन् गृहस्थधर्म-निरतः कदाचित् श्रान्तदेहः भार्योत्सङ्गे शिरो विन्यस्य प्रसुप्त आम्नायमनु-तिष्ठन् सन्ध्यादिलोपं शङ्कमानया तया सूर्यास्तमयं निरीक्ष्य अद्य भर्तुरुत्थापनं धर्म उत तूष्णींभाव इति विचिन्त्याग्निहोत्रादिलोपमेव गरीयस्त्वेनाभिमन्य-मानया धर्मलोपभीतया मधुरतरं प्रार्थितो मुनिः क्षणादुद्बुद्ध्य कोपविस्फुर-माणोष्ठ इदं वचनमब्रवीत्—'अवमानः प्रयुक्तोऽयं त्वया मम भुजङ्गमे। समीपे ते न वत्स्यामि गमिष्यामि यथागतम् ॥ शक्तिरस्ति न वामोरु मयि सुप्ते विभावसोः । अस्तं गन्तुं यथाकालमिति मे हृदि वर्तते ॥' इति । तथा चायमर्थः—जरत्कारुर्यथा लोचने निमीलयति तथा सूर्यः स्वकालसञ्चारविर-हात् तिरस्कृत एवेति। द्वितीयपादे च श्रीरामवृत्तान्तपरिस्फूर्तिः । दशमुखा-दिदुष्कृद्विनाशाय स्वेच्छयाऽवतरन् परःपुमान् स्वकीयातिमानुषकल्याण-गुणचरित्राण्याविष्कृत्य प्रबन्धकर्तॄन् वाल्मीकिमुखान् महाकवीन् कृतार्थया-मासेत्यखिललोकविश्रुतमेव । उक्तं ह्यनर्घराघवे—'यदि क्षुण्णं पूर्वैरिति जहाति रामस्य चरितं गुणैरेतावद्भिर्जगति पुनरन्यो जगति कः । स्वमात्मानं तत्तद्गुणगरिमगम्भीरमधुरस्फुरद्वाग्ब्रह्माणः कथमुपकरिष्यन्ति कवयः ॥' इति।

तथा चायं भगवान् स्वीयकल्याणतमचरित्राणि यदि नाविष्करोति तदा वाल्मीकिमहर्षिणा अन्यराजकथामधिकृत्य प्रबन्धकरणे 'सुबद्धमपि शब्देन काकवाशितमेव तत्' इति न्यायेन तदीयोक्तिः काकवाशितमेव भवेदिति भावः । तथा चायमर्थः– स्वयं श्रीरामः अत्रः निजकीर्तिं स्थगयतु आच्छादयतु नाविष्करोत्वेवेति यावत् । तदा परभृतः 'वन्दे वाल्मीकिकोकिल' मित्युक्तः कविः ध्वांक्षति काकतुल्यो भवति । असत्कीर्तनादिना काकवाशितायमानोक्तिर्भवेदिति यावदिति । एवं तृतीयपादे मङ्कणकवृत्तान्तः स्फुरति । तथा ह्यारण्यपर्वणि तीर्थयात्रायां, 'यत्र मङ्कणकः सिद्धः' इत्युपक्रम्य दर्भक्षतात् तदीयकरतः शाकरसस्रुतिमुक्त्वाऽनन्तरमुक्तम्–'स वै शाकरसं दृष्ट्वा हर्षाविष्टो महातपाः । प्रनृत्तः किल विप्रर्षिर्विस्मयोत्फुल्ललोचनः ॥ ततस्तस्मिन् प्रनृत्ते वै स्थावरं जङ्गमं च यत् । प्रनृत्तमुभयं वीर तेजसा तस्य मोहितम् ॥' इति । तथा च बालिशः मङ्कणनामा ब्रह्मचारी । यद्वा— शाकरसस्रुतिपर्यन्तं स्वकीयतपोबलाज्ञानात् बालिशपदप्रयोगः । अथ वा बालकृत्यस्य सन्तोषकालीनभ्रमणस्य अनेनाचरणात् गौण्या तद्व्यपदेशः । स्वयं भ्रमतु दर्भक्षते स्वकरे असृङ्निर्गमस्थाने शाकरसस्रवणमभिलक्ष्य स्वतपोबलसिद्धिं बुद्ध्यमानो विस्मयात् स्वदेहं भ्रामयतु । तेन क्षितिः भूलोकः बम्भ्रमीत्येव । तपोनिष्ठमहर्षिपरिभ्रमणात् स्वयमपि भृशं भ्रमत्येवेति योजना । चतुर्थपादे च रघुवृत्तान्तः । तस्य मुष्टिभिः कदर्थनं च कौत्समहर्षेर्गुरुदक्षिणार्थं देवलोकभेदनभावनं, तेन नभः क्षुभ्यत एव । तन्मात्रेणैव भीतैः कुबेरादिभिः कोशागारे यथेष्टद्रव्याभिवर्षणादिति भावः । नभश्शब्देन तत्स्था देवता लक्ष्यन्ते । तदेवमर्थद्वयेन प्रतियोगिप्रसिद्धिरुपपादिता । अथार्थान्तरमप्येकदेशिविषयकम् । तथा हि । अत्र केचिदतीव दृप्ता अस्मन्मतैकदेशिनः शङ्करभास्करादिपरमतखण्डनाद्यनैपुण्यं स्वीयमप्रकाश्य तन्मतानुवादस्यापि महापातकापादकतां समुद्भावयन्तो भावय-

न्तश्च तत्तन्मताकर्णनाद्यनावश्यकतां तत्खण्डनैकपरान् श्रीभाष्यादिदिव्य-ग्रन्थान् बहुमतिलेशमन्तरेण पररञ्जनमिति परित्यजन्तः मतान्तरस्थपण्डित-प्रत्यवस्थाने करमुष्टिमापीड्य सर्वमप्येतद्रहस्यशास्त्रमिति समादधानाः केवले-तिह्यकथाऽभिधानमात्रेण स्वमतस्थजनानावर्जयन्तो जगद्विजयन्ते । न पुनः 'शास्त्रज्ञानं बहुक्लेश' मित्यादिसद्बुद्ध्युदयेन निवृत्तिपद्धतिमद्ध्यासते । तान् प्रत्याह (निमीलयत्विति) । बालिशः मूर्खः दृढपूर्वश्रुतः इति यावत् । स्वमतप्राबल्यदृढविश्वासवानित्यर्थः । निमीलयतु लोचने, श्रीभाष्यादि-ग्रन्थेषु भास्करमतप्रस्तावसमये इदमस्माकमनावश्यकमिति नयने दृढं निमी-लयतु, तद्भागं नावेक्षतामेव । न तावन्मात्रेण भास्करमतं तिरस्कारमाप्नोति । किन्तु तदीयमतप्राचीनार्वाचीनग्रन्थान् विपुलं समालोड्य तन्मतगतपरस्पर-व्याघातश्रुत्यादिविरोधानुमानक्षोभादिकथाप्रवर्तनग्रन्थनिर्माणादिपाण्डित्यपद्ध-त्यैव तन्मतं निरसनीयमित्यर्थः । एवं शङ्करमतप्रस्तावसमये श्रोत्रयुगळं निबिडं निपीड्य ततोऽपि पापीयानयं पक्षः श्रवणस्याप्यनर्ह इति गर्हमाणाः परि-त्यजन्ति तं प्रदेशं तत्राह—(श्रव इति) । श्रवः श्रोत्रं स्थिरमाच्छादयतु । तेन परभृतः शङ्करः परैः भृतः पोषित इति विग्रहात् 'सांख्यसौगतचार्वाक-सङ्कराच्छङ्करोदयः' इति स्वयमेव नामकरणेन शङ्करमतस्य तत्प्राक्तनमतत्रय-समाहारनिष्पन्नत्वावगमात् शङ्करस्य परभृतत्वम् । यद्वा परशब्देन भृतः ग्रन्थे धृतः परभृतः । श्रुतप्रकाशिकायां हि शङ्करस्य परशब्देन भास्करस्य अपरशब्देन यादवस्य चान्यशब्देन नियतव्यवहारात् । अतः पर इति भृत इति विग्रहात् शङ्करपरत्वं बोद्धव्यम् । स च ध्वांक्षति किमु तदीयमत-ग्रन्था अस्मदनाकर्णनमात्रेण काकवाशितायन्ते किमित्यर्थः । आमूलं तन्मत-ग्रन्थपरिशीलनेन तद्व्याघातादिप्रदर्शनेनैव तस्य काकशब्दतौल्यं सम्पाद-नीयमित्यर्थः । एवं पूर्वार्धेन परमतखण्डनासामर्थ्यं प्रतिपाद्य अपरार्धेन स्वमतदृढतरश्रद्धाया अपि दोषत्वमेव । न तु गुणत्वमित्याह (स्वयमिति)

॥ श्रीः ॥

# उद्यानपत्रिका ॥

'अन्या वार्त्ता विमुच्यध'

खेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १७.] कलि ५०४४ } स्वभानु-वृश्चिक साधारण ,, धनुः-शास्त्रानुबन्ध आहृत्य { [सं २. ,, २. ४.

## संस्कृतग्रन्थजातम् ॥

अथ सांख्ययोगौ। षट्सु दर्शनेषु पूर्वमीमांसा, उत्तरमीमांसा, न्यायः, वैशेषिकमिति चत्वारि विमृष्टानि । सांख्यं योग इति द्वे अवशिष्येते । तत्र सांख्यस्य प्रथमप्रवर्तकः कपिलो महर्षिः । स ब्रह्मपुत्र इति विष्णोरवतार इति अग्नेरवतार इति बहुधा प्रवादः। बुद्धादयं प्राचीन इति प्रायः निश्चितम् । सांख्यप्रवचनसूत्रं तत्त्वसमास इति द्वौ ग्रन्थौ स्तः । अनयोः कर्ता कपिल इत्यैतिह्यम् । तथाऽपि परिशीलने तयोः नवीनत्वावगमान्न तत्र विश्वासो भवति । कपिलस्यानन्तरमेतद्दर्शनप्रवर्तकौ आसुरिः, पञ्चशिखश्च । एते त्रयोऽपि महाभारतादिषु कीर्तिताः । आसुरिः शतपथेऽपि । तस्मादयमपि बुद्धकालात्प्राचीन एव । पञ्चशिखः क्रि. प. प्रथमे इति सम्भावयन्ति । अथ विद्यमानः प्राचीनतमः सांख्यग्रन्थः सांख्यकारिकेति प्रसिद्धः । सप्तत्यार्यामयः ईश्वरकृष्णेन कृतः । प्राक्तनानां सर्वेषां ग्रन्थानां सार इह उद्धृत इति नाम्नैव ख्याप्यते । वार्षगण्यकृतस्य कस्यचित् ग्रन्थस्य परिष्कृत्य लेखनं विन्ध्यवासिना कृतमिति चीनदेशग्रन्थेषूच्यते । तत्र विन्ध्यवास इत्युक्तः अयमीश्वरकृष्ण एवेति केषांचिन्मतिः । कारिकाणां व्याख्याता विन्ध्यवासीति परे। ईश्वरकृष्णनाम्ना कालिदासेन

कृताः कारिकाः' इति कश्चिदुक्तं दृश्यते। तृतीयं शतकं पुनःकारिकाकारस्येति वदन्ति यतश्चतुर्थे स्थितः वसुबन्धुः द्वितीयकारिकामुदाहरति। अयं कारिकाग्रन्थः परमार्थनाम्ना षष्ठे स्थितेन बौद्धेन चीनभाषायामनूद्य व्याख्यात इति ज्ञायते। अष्टमे स्थितेन गौडपादाचार्येण इमाः कारिका व्याख्याताः। अस्यापरा व्याख्या माठरवृत्तिः पूर्वमासीत्। वाचस्पतिकृता तु तासां व्याख्या सांख्यतत्त्वकौमुदीति प्रसिद्धा। अत्र राजवार्तिकं नाम कञ्चित् ग्रन्थं वाचस्पतिमिश्रः उदाहरति। पञ्चाशिखकृतः षष्टितन्त्रं नाम कश्चन सांख्यग्रन्थ आसीदिति क्वचिदुच्यते। षष्टेः विषयाणां निरूपणात् षष्टितन्त्रं इति नाम। अस्य ग्रन्थस्य वार्षगण्यः कर्तेति क्वचिदुच्यते। अयमपि ग्रन्थः वाचस्पतिमिश्रेण निर्दिष्टः।

सर्वदर्शनसंग्रहकारेण माधवेन सांख्यमतसंग्रहावसरे सांख्यप्रवचनसूत्रस्य अनाश्रयणात् कारिकामात्रोपजीवनाच्च तस्मादनन्तरकालकृमिदं सूत्रमिति निश्चिन्वन्ति। कौमुदीप्रभाकारः स्वप्नेश्वरः पञ्चशिखाचार्यकृतमिदं सूत्रमिति मन्यते। अत्र षडध्यायाः। तत्र आद्ये त्रिके तत्त्वनिरूपणं, चतुर्थे निदर्शनपरदृष्टान्तनिबन्धनं, पञ्चमे परमतनिरसनं, अन्त्ये निगमनं च क्रियते। अस्य सूत्रस्य वृत्तिः सांख्यसूत्रवृत्तिर्नाम। पञ्चदशे स्थितेन अनिरुद्धेन कृता। प्रायः षोडशशतीं समया स्थितेन केनचित् सांख्यसूत्रवृत्तिसारः कृतः। नागेशेनापि लघुसांख्यसूत्रवृत्तिर्नाम कश्चिद्ग्रन्थः कृत इत्याहुः। षोडशे स्थितेन विज्ञानभिक्षुणा कृतं सांख्यप्रवचनभाष्यं तु प्रौढं सुप्रसिद्धं च। सांख्यसारः, योगवार्तिकं, योगसारसंग्रहः, विज्ञानामृतं नाम ब्रह्मसूत्रव्याख्यानमित्येषां च ग्रन्थानां कर्ता विज्ञानभिक्षुः।

चेतनान्नानाभूतान् पुरुषान् अचेतनां गुणत्रयमयीं प्रकृतिं चाभ्युपेत्य सर्वसृष्टिस्थितिसंहारान् प्रकृतिपुरुषविवेकसम्पाद्यां संसारबन्ध-

निवृत्तिं च निरूपयत्सांख्यदर्शनं ईश्वरानङ्गीकारेण वैदिकानां प्रीतिहेतुं बभूव ।

इति सांख्यम् ।

अथ योगः । अत्र प्राचीनतमो ग्रन्थः पतञ्जलिकृतं योगसूत्रम् । तत्र चत्वारः पादाः, ये क्रमेण समाधिपादः, साधनपादः, विभूतिपादः, कैवल्यपादः इत्यभिधीयन्ते । अस्य दर्शनस्य प्रथमः प्रवर्तकः हिरण्यगर्भ इति पुराणप्रसिद्धिः । महाभाष्यकार एवायं पतञ्जलिरिति, 'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन । योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥' इति भोजराजीयत्वेन प्रसिद्धात् श्लोकात् ज्ञायते । परन्त्वत्र बहवो विप्रतिपन्नाः ।

अस्य योगसूत्रस्य भाष्यं व्यासेन कृतम् । अयं व्यासः चतुर्थशतके स्थित इति मन्यन्ते । अस्य भाष्यस्य व्याख्यानं वाचस्पतिमिश्रकृतं तत्त्ववैशारदी नाम । योगसूत्राणामेव साक्षाद्भोजराजकृता वृत्तिरस्ति राजमार्तण्डो नाम । विज्ञानभिक्षुकृतं योगवार्तिकं योगभाष्यस्य गच्छद्भच्छद्व्याख्यानरूपमित्याहुः । नागेशः नारायणभिक्षुः महादेवः सदाशिवेन्द्रसरस्वती इत्यन्येऽपि अत्र वृत्तिकाराः सन्ति ।

अष्टाङ्गयोगमार्गस्य स्फुटनिरूपणं अस्य दर्शनस्य मुख्यमुद्देश्यम् । इयं योगप्रक्रिया उपनिषत्स्वेव अनेकासूपदिश्यते । ईश्वरः अत्राङ्गीक्रियते । अत एवैते सेश्वरसांख्या इत्यभिधीयन्ते । परं तु ईश्वरस्य उपादानकारणत्वानङ्गीकारात् निमित्तकारणत्वमात्राभ्युपगमात् वेदान्तिनां सांख्यवद्योगा अपि निरसनीया भवन्ति । इति योगः । इति षड्दर्शनम् ।

एवं चतुर्दशानां विद्यास्थानानां विमर्श आसीत् । आयुर्वेदः धनुर्वेदः गान्धर्वं अर्थशास्त्रमितीमानि चत्वारि सङ्कलय्य गणने अष्टादश विद्यास्थानानि भवन्ति । तानि चत्वारि प्रति इदानीं किञ्चिदुच्यते ।

यजनाय पञ्चाङ्गविशेषान् अपेक्षमाणानां प्राचां प्राणिनां शरीरतत्त्वं

विज्ञातव्यमासीत् । मनुष्येष्वपि सम्भवतां विविधानां रोगाणां परिहाराय इन्द्रजालप्रायाद्भुतकार्यकरणाय च औषधप्रयोगोपदेशः अथर्ववेदे दृश्यत इति वेदेष्वेव वैद्यशास्त्रप्रवृत्तिलिङ्गमस्ति । आत्रेयः, काश्यपः, हारीतः अग्निः, वेशः, भेटः इत्येते आचार्याः संहिताभिधानानां वैद्यशास्त्रग्रन्थानां कर्तार आसन् । 'मलं शरीरस्य च वैद्यकेन' इति पतञ्जलेरपि वैद्यग्रन्थकारत्वं प्रसिद्धम् । अद्य विद्यमानेषु वैद्यग्रन्थेषु चरकसंहिता प्राचीना । अयं चरकाचार्यः कनिष्कस्य भिषग्बभूव । तेन अस्य कालं कि. प. अशीतिसन्निहितं मन्यन्ते । तथाऽप्यद्योपलभ्यमाने संहिताग्रन्थे दृढबलनाम्ना केनचित् प्रक्षेपस्य परिष्कारस्य च कृतत्वावगमात् न तावत् प्राचीनत्वं अस्य ग्रन्थस्य सम्मन्यन्ते । काश्मीरेषु स्थितोऽयं दृढबलः अष्टमे नवमे वा अवर्ततेति सम्भाव्यते । अस्य ग्रन्थस्य अष्टशतीं समया अरबिक्भाषायां ततः पूर्वं पारसीकभाषायां च विपरिणामः कृत इति श्रूयते ।

सुश्रुत इति अपरः प्रसिद्धो वैद्यसंहिताकारः । भारतवर्षाद्बहिरपि पौरस्त्ये पश्चिमे च देशे नवमदशमशतकयोः अस्य महती प्रसिद्धिरासीदिति वदन्ति । इयं संहिता एकादशे चक्रपाणिदत्तेन व्याख्याता । भेटसंहिता क्वापि एकस्मिन्नेव लिखितपुस्तके रक्ष्यत इत्याहुः । १८९० (नवत्यष्टशतोत्तरसहस्रतमे) वर्षे बवर् नाम कश्चित् अस्यास्मद्देशस्य पश्चिमोत्तरप्रदेशे लिखितकोशग्रन्थं कञ्चिदुपलेभे । तत्र सप्त क्षुद्रग्रन्था आसन् । तेषु त्रयः वैद्यविषयाः । एषां निर्माणकालः चतुश्शतीति प्रतीयते ।

चरकसुश्रुतयोरनन्तरं तद्वत्प्रसिद्धो वैद्यग्रन्थकारः सिंहगुप्तपुत्रः बौद्धस्यालोकितस्य शिष्यः वाग्भटः । अयं स्वयमपि बौद्ध इति सम्भाव्यते । अस्य ग्रन्थः अष्टाङ्गसंग्रहः पद्यमिश्रवाक्यात्मा । वाहट इत्यस्य प्राकृतनाम । Itsing अनेन चीनयात्रिकेण ज्ञातोऽयमित्यवगमात् षट्शतीतः प्राक्तनत्वमस्य मन्यन्ते । अपरोऽपि वाग्भटोऽस्ति अष्टाङ्गहृदयसंग्रहकारः ।

एतस्माद्व्यावृत्तये पूर्वस्य वृद्धवाग्भट इति व्यवहार आसीत् । एतद्ग्रन्थः तिबेत्-भाषायामनूदितः । एकेन द्वाभ्यां वा शताभ्यां उभाविमाव- न्तरितौ । अथ अष्टमे नवमे वा स्थितः माधवकारः रुग्विनिश्चयकारः । अस्यैव रुग्विनिश्चयग्रन्थस्य माधवनिदानमिति प्रसिद्धिः । दृढबलादपि प्राची- नत्वमस्य मन्यन्ते । सिद्धयोगापरनामा वृन्दमाधवः वृन्दकृतः रुग्विनिश्च- यानुसारी । गदाधरपुत्रो वङ्गसेनः एकादशे द्वादशे वा स्थितः चिकित्सा- सारसंग्रहकारः । पञ्चशीतित्रिसहस्रीश्लोकात्मकं चिकित्सामृतं बिल्हणेन डिल्लीनगरे चतुर्विंशतिद्विशती सहस्रतमे (१२२४)वर्षे कृतम् । नागार्जु- नस्य योगसारः योगशतकं च, शार्ङ्गधरस्य शार्ङ्गधरसंहिता, भावमिश्रस्य भावप्रकाशः, लोलिम्बराजस्य वैद्यजीवनमिति बहवो अन्ये वैद्यग्रन्थाः ।

# कल्की वाजिवक्त्रः ॥

(V. R. Srinivasa Tatacharya Siromani,)

श्रीभागवते द्वादशस्कन्धे द्वितीयाध्याये श्रीविष्णुपुराणे चतुर्थांशे च शम्बलग्राममुख्यस्य विष्णुयशोनाम्नो महात्मनो ब्राह्म- णस्य सुतत्वेनावतीर्णोऽयं भगवान् कलिकथाकालुष्यकूलङ्कषो देवदत्त- माशुगं कर्कापरपर्यायं श्वेताश्वमारुह्यासिना नृपवेषधारिणो दुष्टान् कोटिशो निहत्य क्षितितले कार्तयुगं धर्मं स्थापयिष्यतीत्यादि प्रत्य- पाद्यत । श्रीमहाभारते सभापर्वणि—

> कल्की विष्णुयशा नाम भूयश्चोत्पत्स्यते हरिः ।
> कलेर्युगान्ते सम्प्राप्ते धर्मे शिथिलतां गते ॥

इति भगवतो विष्णुयशोनामाकीर्त्यत । निगमान्तमहादेशिकविर- चिते दशावतारस्तोत्रे—'कल्की विष्णुयशस्सुतः' इत्येवाभ्यधीयत । कल्किनो भारतोक्तं विष्णुयशोनाम 'आत्मा वै पुत्रनामासी'त्यादि- प्रमाणेन पितृनाम्नैव व्यवहारेण वा कल्पान्तरे तन्नामकरणेन वा

विधान्तरेण वा युज्यते । तत्स्तोत्रव्याख्यायां—'कर्कस्तु दर्पणे यद्धेद सिताश्वेऽश्वाविति' रत्नमालाया उदाहरणात्कर्कः सिताश्वोऽवगम्यते । रलयोरभेदेन तु स कल्कपदाभिधेयः स्यात् । सोऽस्यास्तीति कल्की सिताश्वारूढो भगवान् । कल्किपदार्थोऽयं तत्स्तोत्रे 'कल्कवाहन-दशाकल्किन्' इत्यनेनाभण्यत । अनन्तसुकविना तु स्वकीयभारत-चम्प्वां अष्टमस्तबके—

'वार्यस्तपोधनवरेण्यमनःखलीनैः
तृष्णां मुहुः कबळयन् जगदार्तिरूपाम् ।
नीचान् विधातुमसुरान् निजशृङ्गतुल्यान्
कोपादुदेष्यति च यः कुहनातुरङ्गः ॥'

इति कल्क्यवतारवर्णनपरे श्लोके भगवतस्तुरङ्गत्वमाख्यायत । अत्र तस्याश्वत्वे श्रीभागवताद्युक्तं तस्य विष्णुयशःपुत्रत्वं अश्वमारुह्य दुष्ट-दण्डनं च न जाघटीतीति चम्पूक्तमयुक्तमित्याशङ्काऽवतरति । अत्रायं समाधिः—अनन्तभट्टस्य तस्याश्वत्वं भाषितवतो न कात्स्न्र्येनाश्वरूप-त्वमभिमतं किन्त्वश्वमुखत्वमभिमतम् । हयग्रीवस्यापि तस्य विष्णु-यशसः पुत्रभावः हयमारुह्य दुष्टानां वधश्च सम्भवतीति श्रीभाग-वतादिकं न विरुद्ध्यते । अत्र तस्य वपुषि मनुजत्वं मुखे वाजित्वं नीलवर्णत्वं चतुर्भुजत्वं शङ्खचक्रखड्गखेटकैः दुष्टानां भयावहत्वं च वदत् मरीचिवचनानुसारि 'कर्की तुरङ्गवदनः' इत्यादि 'वपुषि मनुजमश्वं सम्मुखे' इत्यादि च वैखानसध्यानमुक्तावलीपद्यद्वयं पञ्चाङ्गादौ तथा सम्मुख्य तस्य प्रकाशनं च प्रमाणं भवतीति ।

---

# वाल्मीकिसेवा ॥

(अनुवृत्तम्)

45 एवं वक्तव्यमुक्तम् । ततः कबन्धो विरराम । रामलक्ष्मणा-भ्यामननुज्ञातो न गन्तुमैच्छत् । तेन आकाश एव तूष्णीं व्यतिष्ठत-स्वस्वरूपप्राप्त्या स्वाभाविकमहिमाविर्भावेन च दीप्यमानः, श्रीराघवस्य

विधान्तरेण वा युज्यते । तत्स्तोत्रव्याख्यायां—'कर्कस्तु वर्णे शुभ्रेऽपि सिताश्वेऽग्नाविति' रत्नमालाया उदाहरणात्कर्कः सिताश्वोऽभिधीयते । रलयोरभेदेन तु स कल्कपदाभिधेयः स्यात् । सोऽस्यास्तीति कल्की सिताश्वारूढो भगवान् । कल्किपदार्थोऽयं तत्स्तोत्रे 'कल्कवाहन-दशाकल्किन्' इत्यनेनाभण्यत । अनन्तसुकविना तु स्वकीयभारत-चम्प्वां अष्टमस्तबके—

'वार्यस्तपोधनवरेण्यमनःखलीनैः
तृष्णां मुहुः कबळयन् जगदार्तिरूपाम् ।
नीचान् विधातुमसुरान् निजशृङ्गतुल्यान्
कोपादुदेष्यति च यः कुहनातुरङ्गः ॥'

इति कल्क्यवतारवर्णनपरे श्लोके भगवतस्तुरङ्गत्वमाख्यायत । अत्र तस्याश्वत्वे श्रीभागवताद्युक्तं तस्य विष्णुयशःपुत्रत्वं अश्वमारुह्य दुष्ट-दण्डनं च न जाघटीतीति चम्पूक्तमयुक्तमित्याशङ्काऽवतरति । अत्रायं समाधिः—अनन्तभट्टस्य तस्याश्वत्वं भाषितवतो न कार्त्स्न्येनाश्वरूप-त्वमभिमतं किन्त्वश्वमुखत्वमभिमतम् । हयग्रीवस्यापि तस्य विष्णु-यशसः पुत्रभावः हयमारुह्य दुष्टानां वधश्च सम्भवतीति श्रीभाग-वतादिकं न विरुद्ध्यते । अत्र तस्य वपुषि मनुजत्वं मुखे वाजित्वं नीलवर्णत्वं चतुर्भुजत्वं शङ्खचक्रखड्गखेटकैः दुष्टानां भयावहत्वं च वदत् मरीचिवचनानुसारि 'कर्की तुरङ्गवदनः' इत्यादि 'वपुषि मनुजमश्वं सम्मुखे' इत्यादि च वैखानसध्यानमुक्तावलीपद्यद्वयं पञ्चाङ्गादौ तथा सम्मुद्र्य तस्य प्रकाशनं च प्रमाणं भवतीति ।

---

# वाल्मीकिसेवा ॥

(अनुवृत्तम्)

45 एवं वक्तव्यमुक्तम् । ततः कबन्धो विरराम । रामलक्ष्मणा-भ्यामननुज्ञातो न गन्तुमैच्छत् । तेन आकाश एव तूष्णीं व्यतिष्ठत— स्वस्वरूपप्राप्त्या स्वाभाविकमहिमाविर्भावेन च दीप्यमानः, श्रीराघवस्य

शक्योपकारकरणेन प्रहृष्टश्च । एवमाकाशे तस्मिन् विरोचमाने भूमौ चन्द्रार्कभास्वरौ रामलक्ष्मणौ तद्वचनविरामप्रतीक्षिणौ अवर्तेताम् । इदं व्योमवसुधोभयाश्रयं चित्रविशेषं दर्शयति—

कबन्धस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ ।
स्रग्वी भास्वरवर्णाभः खे व्यरोचत वीर्यवान् ॥

46 तं तु स्वस्थं महाभागं कबन्धं रामलक्ष्मणौ ।
प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतुरन्तिके ॥

स्वस्थं श्रीराघवस्यानुज्ञां प्रतीक्ष्य गगन एव तिष्ठन्तम्, न तु चिरविच्छिन्नान् स्वजात्युचितान् भोगान् भोक्तुं चिरविप्रयुक्तेन स्वजनेन समागन्तुं च त्वरमाणम् । महाभागम्, परमोपकारित्वादेवं तं रामलक्ष्मणौ मन्येते । प्रस्थितौ तद्वचनमवसितं ज्ञात्वा प्रस्थातुमिच्छन्तौ । त्वम्; स्वजनविप्रयोगः अरण्ये वास इत्यादि अपरिहार्यतया आवयोरनुवर्तताम्, न तव । व्रजस्व, गमनजन्यं उत्तमभोगानुभवरूपं फलं ते समृद्धमस्तु । इति वाक्यम्; द्विपदमात्रं अलं एकमेव वाक्यम् । ऊचतुः वचनक्रियायाः कर्तारौ बभूवतुः । महता प्रयत्नेन इदमब्रूताम् । तथा गद्गदकण्ठौ बभूवतुः कबन्धकृतं महोपकारमनुसन्दधानौ प्रत्युपस्थितवियोगस्य तस्य यं कमपि प्रत्युपकारं कर्तव्यमपश्यन्तौ । अन्तिके । प्रयत्नेन ताभ्यामुच्चारितमपि वचनं अन्तिक एव श्रवणार्हमासीत् न दूरे । दिव्यशक्तिप्रादुर्भावाभावे कबन्धोऽपि नैवाश्रोष्यत् । 'सन्धत्ते भृशमरतिं हि सद्वियोगः' इति रीत्या सन्नकण्ठयोस्तयोस्तथा मृदु तद्वचनमभवत् । 'अन्तिके इति वाक्यमूचतुः' अन्तिक एव श्राव्यं इदं वाक्यमूचतुरिति योजना । ऊचतुः उभावपि । न त्वेकेनोक्तं पर्याप्तमित्यपरः तूष्णीमतिष्ठत् ।

47 एवं रामलक्ष्मणाभ्यामनुज्ञातः कबन्धो यच्चकार तदाह—

गम्यतां कार्यसिद्ध्यर्थमिति तावब्रवीत् स च ।
सुप्रीतौ तावनुज्ञाप्य कबन्धः प्रस्थितस्तदा ॥

गम्यतां न मदर्थं विलम्बनीयम् । कार्यसिद्ध्यर्थं गच्छतां युवयोः कार्यसिद्धिरस्तु । इति वाक्यमब्रवीत् इति वचनमुक्त्वा तूष्णीमतिष्ठत । न सहसैव प्रातिष्ठत । अनेनाभिप्रायेण अब्रवीदिति वाक्यसमाप्तिः । अन्यथा 'इति तावभिधाय सः' इत्येवं ल्यप् प्रायोक्ष्यत । तदा एवं अनुज्ञादानेऽपि वक्तव्यमुक्त्वाऽपि, प्रस्थानत्वरां विना तस्मिन् स्नेहातिशयं दर्शयति सति सुप्रीतौ तौ अनुज्ञाप्य अनुज्ञां कारयित्वा स्नेहातिशयवशेन अप्रतिष्ठमानं तं दृष्ट्वा सुप्रीताभ्यां ताभ्यां पुनरपि 'त्वं व्रजस्व' इत्यनुज्ञात इत्यर्थः । कबन्धः प्रस्थितः । यद्वा ताभ्यां त्वं व्रजस्वेत्युक्ते सुप्रीतयोस्तयोः तामनुज्ञां प्राप्य स कबन्धः 'गम्यतां कार्यसिद्ध्यर्थं' इति वाक्यमब्रवीदित्येकवाक्यतैव ।

48 कबन्धोपाख्यानपञ्चसर्गीमुपसंहरन्नाह—

स तत् कबन्धः प्रतिपद्य रूपं वृतः श्रिया भास्करतुल्यदेहः ।
निदर्शयन् राममवेक्ष्य खस्थः सख्यं कुरुष्वेति तदाऽभ्युवाच ॥

स इत्यनेन कबन्धस्य स्वरूपप्राप्तेः प्राक्तनी अवस्था परामृश्यते । तद्रूपं प्रतिपद्य इति अवस्थान्तरवैलक्षण्यं स्फुटीकृतम् । तदेव विशदीकृतं भास्करतुल्यदेह इति । अनेनैव पञ्चसर्ग्या अयमुपसंहारः न त्वस्य एकस्यैव सर्गस्येति ज्ञायते । स्वरूपप्राप्तिर्हि नास्मिन् सर्गे प्रतिपाद्यते अपित्वतिक्रान्ते । 'वृतः श्रिया' इत्यनेन तु श्रीरामस्य सहायसम्पादनमार्गोपदेशरूपोपकारविशेषकरणजनितसन्तोषातिशयव्यञ्जकेन रूपप्राप्त्यनन्तरवृत्तं क्रोडीकृतम् । एवं एतदवधि वृत्तमनूद्य अथ प्रस्थानावसरे पुनरपि किञ्चिदुवाचेत्याह निदर्शयन्निति । तदा प्रस्थानावसरे राममवेक्ष्य निदर्शयन् हस्तं प्रसार्य सुग्रीवो यस्यां दिशि अवसत् तां दिशं दर्शयन् 'सख्यं कुरुष्व सुग्रीवेण, तत्र उपेक्षा सर्वथा मा भूदि'ति अभिनिविश्य उवाच । एतेनास्योपाख्यानस्य प्रधानकथासम्बन्ध उक्तः ।

TIRUPATI

Registered No. M 2300

Book XVII ॥ श्रीः ॥ Nos. 5 & 6.

# उद्यानपत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मानि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥


पु. १७] कलि ५०४४ { स्वभानु-मकर साधारण } सं. ३
,, कुम्भ शास्त्रानुबन्ध ,, ३
आहत्य ,, ६


# The UDYANA PATRIKA.

A SANSKRIT MONTHLY.

January } February } 1944

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पात्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.**
Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.


## विषयाः ॥


शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] ८१—८८

1 मेनका ।
2 सुभाषितनीवी ।
3 संस्कृतग्रन्थजातम् ।
4 माठरकौण्डिन्यन्यायः ।
5 विद्वद्बहुमानः ।

धारशब्दाभ्यां लोचनयोः कटाक्षाणां च ग्रहणपूर्वकं तद्रूपताध्यवसानम् ।

वाप्यु(च्यु)पपद्यते । तदुक्तमलङ्कारसर्वस्वे । 'तत्र च अतिशयाख्यं यत्फलं प्रयोजकत्वान्निमित्तं तत्र अभेदाध्यवसायो योजनीयः । तथा हि—'कमलमनम्भसी'त्यादौ कमलवदनादीनां १ वास्तवं सौन्दर्यं कविसमर्पितेन सौन्दर्यातिशयेन २ अभेदेनाध्यवसितं भेदे अभेदवचनस्य निमित्तम् । तत्र च सिद्धोऽध्यवसाय इत्यध्यवसितप्राधान्यम् । न तु वदनादीनां कमलादिभिरभेदाध्यवसायो योजनीयः । अभेदे भेदः इत्यादि[षु] प्रकारेष्वव्याप्तेः । 'अंगं ळडहत्तणअं' इत्यादौ सातिशयलटहत्वं निमित्तभूतमन्यत्वेना३ध्यवसितम् । एवमन्यत्रापि ज्ञेय'मिति४ । लक्षणे अनुकूलानं रूपकातिप्रसङ्गवारणाय । तत्र विषयविषयिणोः मुखचन्द्रादित(क)योरेवाभेदप्रतिपत्त्या तन्निष्ठाभेदाति(ष्ठाति)शयाभेदप्रतिपत्तेः अविवक्षितत्वात् । इह त्वतिशयोक्तिरिति नामानुगुण्येन, सम्प्रदायानुरोधेन, विषयोपादानेनाप्यभेदसिद्धिसम्भवे तदनुपादानक्लेशफलावश्यम्भावानुरोधेन च तादृशविवक्षावश्यम्भावात् । 'वदनातिशयो महान्' इत्यादिवारणाय विशेष्यदळमित्यलं प्रपञ्चेन । यथा नीलोत्पलेति । ग्रहणं चात्र साध्यवसानलक्षणया बोद्धव्यम् ।

---

१ अत्र 'वदनादीनां कमलाद्यैर्भेदेऽपि' इति सर्वस्वे पाठः ।

२ 'सौन्दर्येणे'ति पाठः सर्वस्वे ।

३ 'अभेदेन' इति सर्वस्वे दृश्यते । तदबद्धम् ।

४ अत्रोदाहृतोऽयं सर्वस्वग्रन्थः 'तत्र भेदेऽभेदो यथा—कमलमनम्भसि ... । अत्र मुखादीनां कमलाद्यैर्भेदेऽप्यभेदः' इत्यनेन तत्पूर्वग्रन्थेनैव विरुद्ध्यत इत्यवदधानो जयरथः 'मुखादीनामिति । न तु वास्तवस्य सौन्दर्यस्य । कमलाद्यैरिति । न तु कविसमर्पितेन सौन्दर्येण । अत एव अत्र चातिशयाख्यमित्यादिःतदभिप्रायेणैवाध्यवसितप्राधान्यमित्यन्तश्चोत्तरकालिको ग्रन्थः स्वमतिजाड्याल्लेखकैरन्यथा लिखित इति निश्चिनुमः' इत्याह ।

यथा वा—

> वापी काऽपि स्फुरति गगने तत्परं सूक्ष्मपद्या
> सोपानाळीमधिगतवती काञ्चनीमैन्द्रनीली ।
> अग्रे शैलौ सुकृतिसुगमौ चन्दनच्छन्नदेशौ
> तत्रत्यानां सुलभममृतं सन्निधानात् सुधांशोः ॥

अत्र वाप्यादिशब्दैर्नाभिप्रभृतयो निगीर्णाः । अत्र अतिशयोक्तौ रूपकविशेषणं रूपके दर्शितानां विधानामत्रापि सम्भवोऽस्तीत्यतिदेशेन प्रदर्शनार्थम् । तेनात्राप्यभेदातिशयोक्तिस्ताद्रूप्यातिशयोक्तिरिति द्वैविध्यं द्रष्टव्यम् । तत्राप्याधिक्यन्यूनताविभागश्चेति सर्वमनुसन्धेयम् ।

यथा वा—

> समाबद्धग्रासैरुपवनचकोरैरनुसृतां
> किरन् ज्योत्स्नामच्छां लवलिफलपाकप्रणयिनीम् ।

---

वापीति । 'ऐन्द्रनीली सूक्ष्मपद्या सूक्ष्ममार्गः काञ्चनीं सोपानाळीं अधिगतवती' इति सम्बन्धः । निगीर्णा इति । निगरणपूर्वकमध्यवसिता इत्यर्थः । नन्वतिशयोक्तिरियं रूपकविलक्षणेति तत्र रूपकविशेषणं व्याहतमित्यत आह अत्रेति । प्रथमातिशयोक्तावित्यर्थः । विधानामिति । प्रकाराणामित्यर्थः । अतिदेशेनेति । सादृश्यमुखेनेत्यर्थः । तथा च कुण्डपायिनामयनप्रकरणे मासाग्निहोत्रादेः नित्याग्निहोत्राद्यभेदस्य बाधितत्वेन तत्पदनिर्देशः तद्धर्मातिदेशार्थ इति यथा अभ्युपगम्यते तथा प्रकृतेऽपि रूपकाभेदस्य अतिशयोक्तौ बाधितत्वेन तत्पदनिर्देशः तद्धर्मातिदेशार्थः । तेन रूपकधर्मि(र्म)कातिशयोक्तिरिति फलितार्थ इति भावः । ता एव त्रिधा दर्शयति—तेनेति । अत्रापीत्यपिना रूपकसमुच्चयः । तत्रापीति । अभेदताद्रूप्ययोरपीत्यर्थः ।

समाबद्धेति । ग्रासोऽत्र ग्रसनानुकूलत्रोटीपुटव्यापारः । मुधा बद्धेति पाठे साक्षाच्चन्द्रिकालाभविरहप्रयुक्तं ग्राससम्बन्धस्य वैफल्यम् । सुधाबद्धेति

उपप्राकाराग्रं प्रहिणु नयने तर्कय मना-
गनाकाशे कोऽयं गलितहरिणः शीतकिरणः ॥

अत्र कोऽयं गलितहरिण इत्युक्त्या प्रसिद्धचन्द्राद्भेदस्तत उत्कर्षश्च गर्भीकृतः । एवमन्यत्राप्यूहनीयम् ।

---

क्वचित्पाठः स्पष्ट एव । बन्धनमत्रारम्भः । ज्योत्स्नामिति स्मितनिगरणम् । लवलिर्लताविशेषः । सा हि पक्का पाण्डिमप्रकर्षसीमा । यदाह गर्भवर्णने कालिदासः—'लवलीदळपाण्डुराननच्छाय'मिति । न[व]-लवलिपाकेति क्वचित् पाकस्थले पाळीति क्वचित् लवलिफलपाकेति क्वचित् पाठः । सर्वोऽप्येकार्थपर्यवसितः । प्रहिणु प्रेरय । मनाक् ईषत्तर्कयेत्युक्तम् । तदनन्तरं क्रमेणेति शेषः ।

गर्भीकृत इति । तथा च अधिकताद्रूप्यातिशयोक्तिरियमिति भावः । ऊहनीयमिति । अनुभयाभेदातिशयोक्तिः पूर्वमुदाहृता ।

'काकतीयकुलाम्बोधेरुदयत्येष चन्द्रमाः ।
कृतः कुवलयोल्लासो येनोदयमुपेयुषा ॥'

इत्यत्र सुधाब्धिजन्मवैकल्यात् न्यूनाभेदातिशयोक्तिः ।

'कमलमनम्भसि कमले कुवले एतानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥'

इत्यत्र सौकुमार्यसौभाग्यवर्णनादधिकाभेदातिशयोक्तिः ।

'अपरश्चन्द्रमाः कोयं ज्योत्स्नानिष्यन्दसुन्दरः ।
यद्वीक्षणात्प्रहृष्यन्ति जनस्वान्तचकोरकाः ॥'

इत्यत्रानुभयताद्रूप्यातिशयोक्तिः ।

'विगुणादपरात् स्मारात्कार्मुकादिषुरुत्थितः ।

इत्यत्र न्यूनताद्रूप्यातिशयोक्तिः । अनन्तरमूलोदाहरणे अधिकताद्रूप्यातिशयोक्तिर्दर्शितेति ध्येयम् । उपलक्षणं चैतत् । सावयवत्वादयोऽप्यत्र

२ यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता ।
त्वत्सूक्तिषु सुधा राजन् भ्रान्ताः पश्यन्ति तां विधौ ॥
अत्र त्वत्सूक्तिमाधुर्यमेवामृतमित्यतिशयोक्तिः चन्द्रमण्डलस्यामृतं न भवतीत्यपह्नुतिगर्भा ।

मुक्ताविद्रुममन्तरा मधुरसः पुष्पं परं धूर्वहं
प्रालेयद्युतिमण्डले खलु तयोरेकासिका नार्णवे ।
तच्चोदञ्चति शङ्खमूर्ध्नि न पुनः पूर्वाचलाभ्यन्तरे
तानीमानि विकल्पयन्ति त इमे येषां न सा दृक्पथे ॥

---

बोध्याः । परन्त्वत्र श्लिष्टपरम्परितं न भवतीति दिक् ।'

यदीति । सैव रूपकातिशयोक्तिः । नन्वयमपह्नवातिशयोक्त्यलङ्कारोऽस्तु । नत्वतिशयोक्तिविशेष इति चेन्नैवम् । विषयतावच्छेदकरूपेण विषयानुवादपूर्वकनिषेध एव अपह्नवालङ्कारात् । अत्र च तदभावात् । न चैवमपह्नुतिगर्भत्वव्याघातः । अलङ्कारभूततादृशापह्नुत्यभावेऽपि अपह्नुतिमात्रमादाय तत्सम्भवात् । तां सुधाम् । विधौ चन्द्रे । अमृतं न भवतीति । विधौ सुधां पश्यतां शुक्तौ रजतत्वदर्शिनामिव भ्रान्तत्वोक्त्या अत्रापह्नवसिद्धेरिति भावः ।

मुक्तेति । मुक्ता च विद्रुमं च तयोः समाहारः मुक्ताविद्रुमम् । 'जातिरप्राणिना'मिति द्वन्द्वैकवद्भावः । यद्वा मुक्ता इति पृथक्पदं द्वितीयाबहुवचनान्तम् । अन्तरा मध्ये 'अन्तरान्तरेण युक्ते' इति द्वितीया । परं केवलम् । धूर्वहं मधुरसाश्रयप्रसिद्धिमात्रभाजनम् । न तु तत्र सोऽस्तीत्यर्थः । तयोः समाहारविशेषणे(णी)[भूत]मुक्तायाः तादृशविद्रुमस्य चेत्यर्थः । यद्यपि तत्पदस्य विशेष्यपरत्वमेव स्वरसप्राप्तम् तथाऽपि बाधकबलात्तात्पर्यवशाच्चेह न तथेति भावः । यद्वा बहुत्वेन प्रतिपन्नानामपि मुक्तानां तत्त्वेनैकीकृतानां विद्रुमेण सह निर्देशः । तयोरिति । आसिका स्थितिः । एकासिका सामानाधिकरण्यम् । तच्च प्रालेयद्युतिमण्डलं च । विकल्पयन्ति विविधं कल्पयन्ति । विकल्पयन्ति वा ।

अत्राधररस एव मधुरस इत्याद्यतिशयोक्तिः पुष्परसो मधुरसो न भवतीत्यपह्नुतिगर्भा ।

अलङ्कारसर्वस्वकृता स्वरूपोत्प्रेक्षायां सापह्नवत्वमुदाहृतम्—

गतासु तीरं तिमिघट्टनेन ससंभ्रमं पौरविलासिनीषु ।
यत्रोल्लसत्फेनततिच्छलेन मुक्ताट्टहासेव विभाति शिप्रा ॥ इति ।

ततस्त्वियानत्र भेदः । यत्तत्र शुद्धापह्नुतिगर्भत्वं, यत्रैव फेनततित्वमपह्नुतं तत्रैवाट्टहासत्वोत्प्रेक्षणात् । इह तु पर्यस्तापह्नुतिगर्भत्वं, इन्दुमण्डलादावपह्नुतस्यामृतादेः सूक्त्यादिषु निवेशनात् । इदं च पर्यस्तापह्नुतिगर्भत्वमुत्प्रेक्षायामपि सम्भवति ।

तत्र स्वरूपोत्प्रेक्षायां यथा—

जानेऽतिरागादिदमेव बिम्बं बिम्बस्य च व्यक्तमितोऽधरत्वम् ।
द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्जनानाम् ॥

---

प्रसङ्गादाह—अलङ्कारेति । तदीयमेवोदाहरणमाह—गतास्विति । तिमिर्मत्स्यविशेषः । यत्र वर्णनीये नगरे । शिप्रा नदीविशेषः । 'अत्र इवशब्दमाहात्म्यात् सम्भावनं छलशब्दयोगाच्चापह्नवो गम्यत' इति तद्ग्रन्थे स्थितम् । तत्र सर्वस्वकारोदाहृतसापह्नवोत्प्रेक्षायामित्यर्थः । शुद्धेति । इदमापाततः । वस्तुतः कैतवापह्नुतिगर्भत्वमिति द्रष्टव्यम् । अत एव यत्रैवेत्याद्युपपादकग्रन्थोऽप्यसङ्गतः । यद्वा शुद्धापह्नुतिपदेन पर्यस्तापह्नुतिभिन्नापह्नुतिरत्र विवक्षितेति क्लेशेन ग्रन्थो योजनीयः । इह तु प्रकृतसापह्नवातिशयोक्तौ तु । सर्वस्वकारेण उत्प्रेक्षायामपह्नुतिविशेषगर्भत्वप्रदर्शनमुत्प्रेक्षान्तराणामपह्नुत्यन्तराणां च उपलक्षणमित्याशयेनाह—इदं चेति । तत्र त्रिविधासु उत्प्रेक्षासु मध्ये इत्यर्थः ।

जान इति । इदमेव पुरोवर्त्यधरमेव । बिम्बस्य च बिम्बत्वेन प्रसिद्धस्य चाधरत्वमपकृष्टत्वम् । द्वयोरधरबिम्बयोः ।

अत्र प्रसिद्धबिम्बफले बिम्बतामपहुत्यातिरागेण निमित्तेन दमय- न्त्यधरे तदुत्प्रेक्षा पर्यस्तापह्नुतिगर्भा । हेतूत्प्रेक्षायां तद्गर्भत्वं प्राग्लिखिते हेतूत्प्रेक्षोदाहरण एव दृश्यते । तत्र चान्धकारस्या- न्ध्यहेतुत्वमपह्नुत्यान्यत्र तन्निवेशितम् ।

फलोत्प्रेक्षायां यथा—

रवितप्तो गजः पद्मान् तद्गृह्यान् बाधितुं ध्रुवम् ।
सरो विशति न स्नातुं गजस्नानं हि निष्फलम् ॥

अत्र गजस्य सरःप्रवेशं प्रति फले स्नाने फलत्वमपह्नुत्य पद्मबाधने तन्निवेशितम् । अलमनया प्रसक्तानुप्रसक्त्या । प्रकृतमनुसरामः ।

---

प्रसिद्धेति । बिम्बत्वेन प्रसिद्धेत्यर्थः । प्राग्लिखित इति । विव- स्वतानायिषतेव मिश्रा इत्यत्रेति शेषः । अ[न्य]त्रेति । विवस्वत्कर्तृकगो- नयन इत्यर्थः ।

रवितप्त इति । वा पुंसि पद्ममिति पुंस्त्वाभ्यनुज्ञानात् पद्मानिति प्रयोगः । तद्गृह्यान् (र)विपक्षाश्रितान् । तत्पक्षपातविषयानिति यावत् । प्रत्यनीकसङ्करः । 'पदास्वैरिबाह्यापक्ष्येषु चे'ति क्यप्प्रत्ययः । अहितत्व कारणत्वे (कार्यभाक्) ।

किं च सर्वस्वकृता—

'कस्तूरीतिलकन्ति फालफलके देव्या मुखाम्भोरुहे
लोलम्बन्ति तमालबालमुकुलोत्तंसन्ति मौळौ प्रति ।
याः कर्णे विकचोत्पलन्ति कुचयोरंसे च कालागुरु-
स्थासन्ति प्रथयन्तु तास्तव शिवं श्रीकण्ठकण्ठत्विषः ॥'

इत्यत्र क्विपा प्रथमप्रतिपन्नाप्युपमाऽधिकरणौचित्यात् उत्प्रेक्षायां पर्यवस्यती- तित्युपमोपक्रमोत्प्रेक्षेति व्यवहारः कृतः । धर्मविषये च किञ्चिद्वैचित्र्यमुत्प्रे- क्षाया दर्शितम् । सर्वं च तदुपलक्षणमिति संरम्भेण प्रपञ्चितं चित्रमी- मांसायाम् । तदत्राभिसन्धायाह—अलमिति । प्रसक्तेति । सापह्नवा-

3 भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनम् ।
अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यं महीपतेः ॥

अत्र लोकप्रसिद्धगाम्भीर्याद्यभेदेऽपि भेदो वर्णितः ।

यथा वा—

अन्येयं रूपसम्पत्तिरन्या वैदग्ध्यधोरणी ।
नैषा नळिनपत्राक्षी सृष्टिः साधारणी विधेः ॥

---

4 सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनम् ।
सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम् ॥

यथा वा—

कतिपयदिवसैः क्षयं प्रयायात् कनकगिरिः कृतवासरावसानः ।
इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे ॥

---

तिशयोक्तिप्रसङ्गात्प्रसक्तमुत्प्रेक्षायाः सापह्नवत्वं तदनुप्रसक्तं तद्भिततिप्रदर्शनमिति विवेकः ।

भेदकेति । तस्यैव लोकसिद्धस्यैवान्यत्ववर्णनं लोकासिद्धविलक्षणत्ववर्णनम् ।

अन्येयमिति । रूपं सौन्दर्यम् । वैदग्ध्यम् । चातुर्यं 'एषा नलिनपत्राक्षी विधेः साधारणी सृष्टिः ने'त्यन्वयः ।

'अण्णं लडहत्तणअं अंणव्व हि का वि वत्तणच्छाआ ।
सामा सामण्णवआवइणो रेहव्विअ ण होइ ॥'

इति सर्वस्वकाव्यप्रकाशोदाहृतश्लोकस्य विवर्तोयम् ।

सम्बन्धेति । यद्यपीदमुदात्तालङ्कारादिष्वतिप्रसक्तम् । सामान्यलक्षणवादिहाप्यतिशयभेदप्रतिपत्त्यनुकूलत्वेन विशेषणेऽपि पूर्वोत्तरातिशयोक्तिष्वतिप्रसङ्गो दुर्वारस्तथाऽपि तद्भिन्नत्वमपीह विशेषणं द्रष्टव्यम् ।

कतिपयेति । चक्रवाक्याः सुमेरुक्षयसम्भावनया सन्तोषोपपादनाय तद्विरोधित्वं त (ताव)द्दर्शयति—कृतवासरावसान इति । वासरावसाने

अत्र चक्रवाक्याः सवित्रस्तमयकारकमहामेरुभ्रमणसम्भावनाप्रयुक्तसन्तोषासम्बन्धेऽपि तत्सम्बन्धो वर्णितः ।

---

5 योगेऽप्ययोगः सम्बन्धातिशयोक्तिरितीर्यते ।
त्वयि दातरि राजेन्द्र स्वर्द्रुमान्नाद्रियामहे ॥

अत्र स्वर्द्रुमेष्वादरसम्बन्धेऽपि तदसम्बन्धो वर्णित इत्य(ति?)सम्बन्धातिशयोक्तिः ।

यथा वा—

अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः ।
अवकाशो न पर्याप्तस्तव बाहुलतान्तरे ॥

---

6 अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्ययोः ।
आलिङ्गन्ति समं देव ज्यां शराश्च पराश्च ते ॥

अत्र यदा मौर्व्यां शरसन्धानं कृतं तदानीमेव शत्रवः क्षितौ निपतन्तीति हेतुकार्ययोः सहत्वं वर्णितम् ।

---

हि चक्रवाकीविरहवेदनान्य(वह)र्वाचद्वान्निष्ठ(-दनिष्ट)म् । तच्च मेरुणा अन्तरिते सूर्ये भवतीति भावः ।

**योगेऽपीति** । अयोगः अयोगकल्पनम् । यद्यप्ययोगे योगकल्पन एवेदमन्तर्भूतं आदराभाव(।)सम्बन्धेऽपि तत्सम्बन्धवर्णनात् । तथाऽपि भावाभावरूपमुखभेदानिबन्धनोऽयमवान्तरविभागः । तत्र च नियोगपर्यनुयोगानर्हः सम्प्रदाय एव शरणम् । इदमेव सूचयितुं इतीर्यत इत्युक्तम् । इत्थं च असम्बन्धे सम्बन्धवर्णनं सम्बन्धातिशयोक्तिरित्यवान्तरसामान्यलक्षणम् । पूर्वोक्तविधया विशेषलक्षणं चोह्यम् । योगे अयोगोऽपि सम्बन्धातिशयोक्तिरिति योजना । **स्वर्द्रुमाः** कल्पवृक्षाः । **अनयोरिति** । बाहुलतान्तरं वक्षः तदेवावकाशः । बाहुलतान्तरे इति सप्तमीपाठस्तु स्फुटः ।

**अक्रमेति** । नास्ति क्रमः पौर्वापर्यमस्यामिति व्युत्पत्तिः । सहत्वे समकालत्वे । समत्वमिति पाठेऽप्ययमेवार्थः । एतन्मात्र समुच्चये आति-

"आर्य, भवदादेशं प्रत्यगृह्णीवम् । तत्र लिखिता विषया विस्मयं जनयन्ति । तत्र निर्दिष्टेषु अपराधेषु एकमपि नाहं कृतवान् । प्रथमभागोक्तरीत्या नैवाहं मद्रं गतवान् । अहं तत्र इत्यत्र लब्धं साक्ष्यं न पारमार्थिकम् । द्वितीयभागोक्तप्रकारेण मया प्रेषिता न मिथ्याव्ययपट्टिका । तृतीयभागोक्तरीत्या ह्योऽहं मद्रे स्थित इत्येष भूतार्थ एव । ततः पूर्वेद्युर्मया विरामप्रार्थनं कृतं, यच्च भवता प्रत्यादिष्टं तदपि तथ्यम् । अपि तु ततःपरमहं पत्रान्तरं विलिख्य शतेश्वर-तान्दोनिराय-द्वारा प्रेष्य विरामस्या-वश्यकत्वात् आदेशमन्यथयित्वा विरामो देय इति प्रार्थनामकर-वम् । तत्पत्रं भवत्सकाशं नीतवान् शतेश्वरः भवान्मे विराम-मदादिति वाचं प्रैषयत् । त्वरितोऽहं तत् तथ्यमिति विश्वस्य गतोऽभवम् । तान्दोनिरायो 'गण्यो' मनुष्यः । अधिकारभार-वान् उद्योगस्थः । तस्मात् तस्य वाचं सत्याममन्ये । भवांश्चेत् तं पृच्छेत् स इदं तथ्यमित्येवाभ्युपगच्छेत् । स यदि नाभ्युप-गच्छेत् एतदर्थमहं यस्य कस्यापि दण्डस्य आत्मानं पात्रीकरिष्या-मि । अपि च मद्गृहे स्थितं कार्यालयमुद्राप्रभृतिकं ह्यो मद्गृहे वृत्ते परिमोषणे चाग्निनासीत । तस्मान्मया समर्पणीयं कार्या-लयवस्तु किमपि मयि न विद्यते । कार्यालये कर्तव्यं कोशोपमा-ण्डलिक एव कामं निर्वहतु ।"

एवमुत्तरं विलिख्य तत्सेवकेऽर्पयित्वा पुस्तकेऽपि हस्ताक्षरं न्यस्य सेवकं प्रेषयामास ।

तदानीं घण्टाः सार्धाः षडभवन् । शकटाय प्रस्थातुं काल आगच्छत् । गृहकस्य कवाटमुद्घाटितम् । तूलिकोपधानादिसंभृ-तायां कस्यांचिदनुल्बणदीर्घप्रेङ्खोलिकायां स्वर्णाम्बा शायिता बभूव । चत्वारः कर्मकराः तया प्रेङ्खोलिकया साकं निश्चलमूढा द्वारि स्थिते कस्मिंश्चन मोटारशकटे प्रेङ्खोलिकया न्यदधुः । कानि चन औष-धानि च सार्वाशये अदीयन्त । अनुपदं ते चत्वारोऽपि अन्यस्मिन् अश्वशकटे आरूढवन्तः । द्वावपि शकटौ प्रस्थाय मन्दं गत्वा धूम-शकटस्थानकं प्रापतुः । पञ्चभिर्निमेषैः धूमशकटोऽप्यागच्छत् । कर्मकराः स्वर्णाम्बामानीय द्वितीयकक्ष्याशकटे कस्मिंश्चिन्निक्षिप्य

अगच्छन् । साम्बशिवः कर्मकराणां मोटारशकटस्य च देयं दत्त्वा प्रतिप्रेष्य चीटीः (टिक्केट्स्) जग्राह । स च कनकाम्बा च स्वर्णाम्बाध्यासिते द्वितीयकक्ष्याशकटे उपविष्टावभवताम् । रङ्गराजुः कृष्णश्च अनन्तरे तृतीयकक्ष्याशकटे उपविष्टावभवताम् । धूमशकटः प्रातिष्ठत ।

पेरुन्देव्यम्बा माण्डालिकाय कमपि लेखं लिखितवतीति, तत एव माण्डलिकः एवमादेशमकरोदिति च तदवधि साम्बशिवः कनकांबा च मन्यमानावास्ताम् । अपि च तन्त्र्यादेशः किं स्वस्य मद्रागमनं प्रति अथ वा स्थलान्तरगमनं प्रतीति तयोस्तावत् सन्दिग्धमभवत् । अद्य लब्धे आदेशे स सन्देहो न्यवर्तिष्ट । अद्य तान्दोनिरायं प्रति च सन्देह उदभूत । तस्य स्वास्मिन् द्वेषं कृत्वा तावद्दूरमुपद्रवं कर्तुं किं कारणमिति विचिन्त्य विस्मयं प्रापतुः। पैशुन्यं कृत्स्नं तान्दोनिरायेणैव कृतमित्यपि नाभात । यतः प्रथमं वारं स्वेन मद्रमागत्य पुत्री आनीतेत्युद्भूतः प्रवादस्तस्य न विदितः। जातु तत् पेरुन्देव्या लिखितं स्यात् । अथ वा स्वस्यागतां तन्त्रीं दृष्टवता तान्दोनिरायेण भाव्यम् । इति बहुधा चिन्तयामासतुः। उभावपि मिथ आक्षिप्य समाधानमकुरुताम्। उत्कोचग्रहणापराधः कथमिदानीमुद्धृतोऽभूदिति न स्फुटीबभूव । स्वस्य आपतितेषु कतिषु नाम घोरेषु कष्टेषु साम्बशिवस्य काराप्रवेशो नाभूदित्येतत प्रति उभावपि महान्तं सन्तोषं कमप्याश्वासं च अलभेताम् । स्ववित्तापहारेण उद्योगापगमेन च तौ न व्यषीदताम् । पुत्र्या मेनकया यथा स्वस्य अवमानो न जायेत तथा यत्किञ्चित्कलङ्करहितया ननु प्रत्यागन्तव्यमिति , जामाता स्वर्णाम्बया च किल जीवितव्यमिति पुनरपि मेनकया खलु पत्या सह सुखं संवस्तव्यमिति च महतीं चिन्तामौत्सुक्यं च कुर्वन्तौ शिरोनिहितहस्तं निर्निमेषं स्वर्णाम्बैकदर्शिनेत्रं च मूर्तविषादतुल्यौ उभावपि निश्चलं प्रेङ्खोलिकायाः समीपे उपविष्टावास्ताम् ।

स्वर्णाम्बा सजीवेव नाभात् । नेत्रे मीलिते एव अवर्तेताम्। यत्किञ्चिदपि चलनं श्वसितं वा नादृश्यत । तद्दृष्ट्वा बहु भीता कनकाम्बा स्वर्णाम्बाया उरसि हस्तं निधाय कच्चित् हृदयचलनम-

स्तीत्यपश्यत् । शरीरे उष्णं किञ्चिददृश्यत । पश्चात् करमालस्य नाडीं पर्यैक्षत । स्थाम्यभिव घटिकाद्वयः नाडी दीर्घकालस्य सकृत् मृदु जहे । जीवितमस्तीति मत्वा उभौ कथञ्चित् धैर्यमविन्दताम् ।

तेषु धूमशकटे एवं स्थितेषु साम्बाशिवस्य उत्तरं नीतवान् सेवकः तत् माण्डलिके हूणे अर्पयामास । हूणो लेखमादाय पठित्वा अतीव विसिष्मिये । अपराधपत्रे निर्दिष्टस्य तृतीयस्यापराधस्य उपमाण्डलिकेन लिखितं समाधानं पुनः सकृत् पपाठ । पूर्वेद्युः स्वेन विरामानुमतिप्रत्याकरणानन्तरं पुनः साम्बशिवेन विरामप्रार्थना विलिख्य ताण्डोनिरायेऽर्पितेति तदानीतवान् ताण्डोनिरायः विरामो लब्ध इति वार्तां प्रेषयति स्मेति च साम्बाशिवेन लिखितो विषयः हूणस्य मनः कलुषीचकार । किं तज्जातु सत्यं भवेदिति सन्दिदिहे । तथा चेद्विरामो दत्त इति ताण्डोनिरायेण मिथ्यावार्ताप्रेषणस्य किंनिमित्तमिति आलुलोचे । ताण्डोनिरायः साम्बाशिवे द्वेषेण किं तथा कृतवान् स्यादिति च मेने । सपदि ताण्डोनिरायमानाय्य तत्त्वोपलम्भ एव युक्त इति मत्वा तं सद्य आनेतुं सेवकं प्रैषयत् । शालियमङ्गलात्तदानीमेव गृहानागतो राय उपमाण्डलिकस्य वृत्तानि स्वसेवकेभ्यः श्रुत्वा व्यजानात् । साम्बशिवेन स्वर्णाम्बाया मदननयनप्रभृति सर्वं वृत्तं ज्ञात्वा 'अनेन अहो शान्तः शनिः' इति सोल्लासं स स्वकीयायां साचि चतुष्पद्यामशेत । तदा माण्डलिकसेवक आगत्य हूणस्त्वमानेतुमादिक्षदित्यवोचत् । किं नाम सम्भूतम् । किं नु रहस्यं प्रकटीभूतमिति शङ्कया कलुषीभूतो रायः अनुपदमुत्थाय उद्योगवेषं धृत्वा धावं धावं गत्वा प्रासादमेत्य अवनम्य हूणाय ललाटिकां चकार । हूणे क्षिप्रं साम्बाशिवसमाधानं प्रति स्वस्योद्भूतं संशयं ज्ञापितवति रायः अत्यन्तं विस्मयमभिनीय 'अहाहा, कृत्स्नविपर्ययो हि भवति । मया तावत्, प्रार्थनापत्रस्य आदानं तावत् । विरामो नादायीति स च तन्माता च अत्रभवन्तं नीचमभाषेताम् । सञ्चारं व्यपदिश्य मद्रं गमिष्याम इत्यवोचताम् । तत्र अवस्थातुं न मे अरोचत । अहमुत्थाय ऋजु भवत्सकाशमागतोऽभवम् । तत आवां द्वौ शकटस्थानकं गत्वा तौ मद्रं गच्छन्तौ अपश्याव । विरामोऽनुमत इति वार्तां प्रेषयितुं कुतो मे अवकाशः । अत्र भवता

३६

कृतं विरामप्रत्याकरणं ज्ञातवानहम् । तथा सति पुनरपि स चेत् 'जगज्जाल' प्रार्थनापत्रं दद्यात् तदादाय आनेतुं कथमहं धृष्णुयाम् । उपसर्पतां सर्वेषामुपरि हि व्यलीकं पाटिष्ठो ह्ययं मनुष्यो भवति । महानेष विप्रलम्भः । न च मयि स कल्पयति । तात तात । न चाहं विरामोऽनुमत इति प्रार्थनां प्रैषयं प्रार्थनापत्रमर्पयति स्म । न चाहं विरामोऽनुमत इति प्रार्थनां प्रैषयम् । आदेशे सति तथैवाहं पत्रे 'वाङ्मूलं' विलिख्य ददामि । तत् पत्रान्तरैः साकं प्रमाणत्वेन संयोजयत' इत्यवोचत् ।

'मिथ्याभाष्यपि वाक्सामर्थ्यात्'

'सत्यवदेव सत्यवदेव'

इति रीत्या दृढं च पटु च रायेणोक्तमाकर्णितवान् ह्यूणः स भूतार्थं इति विशश्वास । तथैव कस्मिंश्चित् काकदे तस्य 'वाङ्मूलं' लेखयित्वा आदाय अपराधपत्रस्य प्रतिरूपमेकं, सर्वाणि वाङ्मूलानि साम्बशिवस्य समाधानं च सन्धाय, स्यूत्वा तैःसाकं स्वकीयं निवेदनं च विलिख्य सर्वं मद्रशासितृभ्यः प्राहिणोत् । तस्मिन्निवेदने साम्बशिवः यथा स्वानुभवं अयोग्यताहन्तानृतवादकपटप्रभृतीनां वासस्थानमिति, अधः स्थितानामधिकारिणां सेवकानां च यथावद्वर्तनानभिज्ञो मूढ इति, कोपनतया दशेश्वरप्रभृति ग्रामसेवकपर्यन्तं सर्वेषां प्रहरणेन गर्हणेन चोपद्रवकारीति, -उन्नतोपमाण्डलिकोद्योगवहनोचितगाम्भीर्यहीनोऽल्पो मनुष्य इति अन्याय्याचरणतासहित इति च ह्यूणः सविस्तरमलिखत् । स उत्कोचग्रहणे महासमर्थ इति, तत्प्रति पुरे कृत्स्ने महान् प्रवादो भवतीति, परं तु तन्निरूपणाय पर्याप्ताः साक्षिणः अद्यापि न बहिरागच्छन्तीति चालिखत् । तस्य गृहे समीपकाले वृत्तं परिमोषं तत्पत्न्या आपतितां विपदं च प्रति विस्तरेण लिलेख । एवं तस्य सम्भूता विपदो विचिन्त्य शासितृभिः तस्मिन्ननुकम्पां कृत्वा तस्य कारप्रेषणमन्तरा उद्योगान्निवर्तनमात्रेण विमोक्षः कार्य इति बलवत् पुरुषकारभावं कृत्वा विलिख्य तत् रायाय पपाठ । स ह्यूणस्य कारुण्यगुणं प्रति सश्लाघमभाष्य अनुमतिं लब्ध्वा बहिर्गतः मनृतगिरिपेळ्ळै- सांबंधं वृत्तान् विषयानभिधाय सन्तोषमनुभवितुमिच्छन् धावं धावं जगाम ।

बालिशः दृढपूर्वश्रुतोऽयमेकदेशिजनः स्वयं भ्रमतु । परश्शतव्याघातजटिलत्वेऽपि स्वसंप्रदाय एव समीचीन इति दृढबुद्धिरध्यवस्यतु, न खलु ततः क्षितिः भूलोकवर्ती जनः बम्भ्रमीति भृशं भ्रमति दृढमध्यवस्यत्ययं स्वमतप्राबल्यमिति न कोऽपि भूलोकवर्ती किञ्चिदपि स्वयं भ्राम्यति । अपि तु परिहसत्येवास्य मूर्खभावमिति भावः । एतादृशभ्रान्त्यभावस्य भूलोकजनिमात्रमेवालं न पुनर्विपुलज्ञानापेक्षेति क्षितिशब्दाभिप्रायः। त्वमेवाभिनिवेशवशाद्भ्राम्यसि । न तु त्वदन्यः कश्चिदपि जन्तुरङ्गीकरोति त्वदर्थमित्यर्थः । एवमाचार्यपरम्परागतोऽयं स्वसंप्रदायरहस्यार्थ इति निखिलधर्मस्वरूपत्यागादिरूपमपार्थं कञ्चित् मनसि निक्षिप्य परश्शतदोषगणोद्घोषणेऽपि तमेवार्थमपरित्यजन् वेदवैदिकधर्मान् विजहाति गृहीतग्राहितया । तत्राह—(कदर्थयत्विति) । मुष्टिभिः मुष्टिशब्दोऽत्र निगूढरहस्यार्थपरः । तस्य मुष्टितुल्यत्वात् । करमुष्टिकरणे हि कश्चित् पदार्थः करान्तर्गतः स्यादिति केषांचित् भ्रमो जायते, मुष्टिविसर्जने तु न कोऽप्यर्थोऽत्रेति परिह्रियते भ्रान्तिः । तद्वत्सम्प्रदायार्थोऽयं भवादृशेभ्यो न वक्तव्य इति बोधने स्यादत्र कश्चनार्थविशेष इति केषांचिद्भ्रमो जायेतापि । कथञ्चित्तादृशार्थनिरीक्षणे हि सर्वेषामपि युगपत् परिहासरस एव फलिष्यतीति करविवरणे न किमप्यस्तीति लोकोक्तिरप्यत्रानुसन्धेया । अतश्च मुष्टिनिक्षेपसदृशैः स्वगोष्ठीमात्रप्रचुरै रहस्यार्थैः, कदर्थयतु कदर्थं करोतु चरमश्लोकादीनां कुत्सितार्थं करोतु । तेन नभः क्षुभ्यति किम् । नभोवद्विस्तीर्णः पण्डितहृदयाकाशः क्षोभमाप्नोति किम् । वेदवैदिकमार्गविरुद्धं सर्वधर्मस्वरूपत्यागादिपक्षं साधवो नाङ्गीकुर्वन्तीत्यर्थः । तादृशार्थश्रवणमपि न सहन्त इति यावत् । अत एव ह्युच्यते—'प्रपत्त्यङ्गं प्रतिज्ञातुं न शक्यं साधुसंसदी'ति । स्वसम्प्रदायार्थप्रकाशने साधुजनगर्हा भवेदिति भियैव सर्वमपि रहस्यार्थ इत्याच्छादयन्तीम इति हृदयम् । यद्वा—नभःशब्देन नभोवर्तिनो वैशम्पायनादय उच्यन्ते । ते क्षुभ्यन्ते किम् । साक्षाद्व्यास-

मुखेनाविगतचरमश्लोकार्थानां वैशम्पायनादीनां त्वदीयकदर्थश्रवणात् आनि-र्भवेत्किमित्यर्थः । अपि तु 'येषामुक्तिषु मुक्तिसौधविशिखासोपानपंक्तिष्वमी वैशम्पायनशौनकप्रभृतयः श्लाघाशिरःकम्पिनः ।' इत्युक्तनयेन 'अतोऽस्मत्कृ-धिकारत्वमि' त्यारभ्य 'सर्वधर्मपरित्यागशब्दार्थाः साधुसम्मताः' इत्यन्त-मुक्तान् साधुतमार्थानेव ते श्लाघन्त इति भावः । यद्वा—मुष्टिशब्दोऽत्र पूर्वोक्तप्रक्रियया चौर्यपर एव । अतश्च वैदिकधर्मापहारेण वेदादीन् कद-र्थयतु व्यर्थान् करोतु । तेन नभः स्वर्गनरकादिरूपः परलोकः क्षुभ्यते किं प्रपन्नानां सकलवैदिकधर्मत्याग एव स्वरूपानुरूप इति वचनमात्रात् पञ्च-महायज्ञादिहाने नरकादिविधायकं शास्त्रं वा तद्विहितो नरकादिरूपः पर-लोको वा न हीयत इत्यर्थः । पञ्चाङ्गनाशेऽप्यमावास्या न नश्यतीति लोकोक्तिरप्यत्रानुसन्धेया ।

यद्वा—मुष्टिशब्दः गृहीतग्रहणपरः दृढमुष्टिरित्यादिव्यपदेशात् । अतोऽयं दृढग्रहणवशात् स्वगृहीतार्थमेव कथयन् अन्यदीयार्थविशेषान् असाम्प्रदायिक इति परित्यजन् भ्रमतु नाम । किमनेन नभः क्षुभ्यत इति पूर्ववद्योजना । तदेवमसूयादिवशादन्यदीयसमीचीनार्थविशेषाग्रहणाय नयन-श्रवणादिसुदृढपिधानेऽपि भास्कराद्युपमानां सुप्रसिद्धार्थानामपहारो न कदा-पि भवेदिति स्वोपगतार्थ एव सम्यङ्क्ति दर्पो न कार्य इति फलितम् । एवं 'निमीलयतु लोचने' इत्यादिवचनपद्धत्या । योऽयं लोचननिमीलनमात्रेण भास्करतिरस्करणक्षमः स एवैतादृशदर्पोक्त्यर्हः ; न तु त्वादृशः केवलहत इति भावः । अनेन महाप्रभावानां समयविशेषे दर्पोक्तिरदोषत्वमाविष्कृतम् । यथा पूर्वोक्तं जरत्कारुवचनं 'शक्तिरस्ति न वामोरु मयि सुप्ते विभावसोः । अस्तं गन्तुं यथाकालमिति मे हृदि वर्तते ॥' इति । तद्वद्योऽयं भास्करशङ्करा-दिमतग्रन्थानखिलाननिशमालोच्य तदीयैकैकोक्तेः शतदूषणीकरणनिपुणः स एव, 'कथं कथकमानी स्यात् कश्चिदन्यो मयि स्थिते' 'वादाटोपमुपेयुषः प्रतिभटानासेतुहैमाचलं तूलायापि तृणाय वा न च तुषच्छेदाय मन्यामहे'

इत्यादिदर्पोक्तिक्षमः । अदोषत्वं चास्य भगवद्भाष्यकारैरप्यङ्गीकृतमेव । 'श्रुतिसिद्धान्तशूरस्य तद्विरुद्धान्निरुन्धतः । बलितं वावदूकस्य कृतिनः किं न शोभते ॥' इति । न तु पुनः 'विदुषामपि मोहमावहन्तो वितथैतिह्य-सहस्रवर्णनेन । विनयाभिनयात् खलाः किलामी विजयन्ते कपटालया जगन्ति ॥' इत्यादिभवादृशपद्धत्या जगद्विजयमानस्य दर्पोक्त्यवकाशलेश इति फलितम् । एवमत्र प्रथमार्धेन बैडालव्रतिकबककवृत्तीनां अपरार्धेन मत्तोन्मत्तानां च चर्याभिधानात् 'पाषण्डिनो विकर्मस्थान् बैडालव्रतिकान् शठान् । नास्तिकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥' इत्यादिश्लोकार्थोऽत्र प्रत्यभिज्ञापितः । तथा हि—बिडालजातीयो हि अनवरतं नेत्रे निमीलयति । स च तावन्मात्रात् सूर्योऽस्तमेतीति मन्यत इति लोकप्रवादः, तद्वदयमपि सूर्यतिरस्कारं नाभिमन्यतामित्यर्थः । एवं बकोऽप्यनिशं मत्स्यजिघृक्षया स्वनयने निमीलयतीति ध्येयम् । तथा बिडालजातीयः दूरस्थपक्षिग्रहणाय त्वरितमनुधावन्नपि परकीयश्रवणमाच्छादयति यथा स्वपदशब्दमपि परे न शृण्वन्ति तथा सञ्चरतीत्यर्थः । एवं सुरापानादिमत्तः उन्मत्तो वा स्वयं असकृत् भ्रमति । मदोन्मादतो वृथा मुष्टिप्रहारमनवकाशप्रदेशे सृजति च । अतोऽयमुक्तवचनाद्वाग्वादस्याप्यनर्ह इति भावः । तदेवमुक्तपद्धत्या केवल-दर्पादिवशतः अभिजनविद्याचारादिसम्पन्नमहापुरुषनिरीक्षणतदीयकीर्ति-श्रवणाद्यसहनेन स्वयमपि तथा बुभूषया वा तत्तिरश्चिकीर्षया वा तदीयवेष-भाषाद्यारोपेण तत्प्रत्यर्थितया प्रत्यवस्थानं केषांचित्प्राज्ञपरिहास्यतापदमधि-रोहतीत्ययमर्थो बहुप्रकारदृष्टान्तकथनादिभिः समर्थित इति सुधीभिर्विभाव-नीयम् । पृथ्वीवृत्तम्—'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति लक्षणात् ॥ १२ ॥

इति सुभाषितनीवीव्याख्यायां हृद्यार्थदीपिकाख्यायां

हंसपद्धतिर्द्वितीया ।

---

अथ सुभाषितनीव्यां खलपद्धतिः ।

**परचित्तैकनिरताः पुत्रादिष्वप्यसङ्गिनः ।**
**योगिनामनुकुर्वन्ति विशृङ्खलधियः खलाः ॥ १ ॥**

तदेवं प्रथमपद्धत्या महाजनावमाननादिहेतुभूतमविवेकमयमज्ञानं प्रथममुपपाद्य तत्प्रसूतेर्ष्यासूयादिमूलकं दर्पविशेषं महापुरुषविडम्बनादि-पर्यन्तायुक्ततमकार्यकरं प्रायशोऽप्रस्तुतार्थप्रशंसयैव विपुलं निराकृत्य तत् प्रसङ्गात् तादृशदर्पविशेषसहकृतामर्षणवशात् स्वीयमत्यन्तनैच्यमनुबुद्ध्यापि ये तावन्निरपराधानपि परान् परिदूषयन्ति, पीडयन्ति च बहुधा । तदीय-दौर्जन्यं खलत्वापरपर्यायमुपालब्धुकामः प्रथमतः स्वार्थनिरपेक्षपरानर्थैककारि-तास्वभावरूपं खलत्वलक्षणं सदृष्टान्तमुद्घाटयति—(परेति) । पूर्वपद्धतौ हि स्वोत्कर्षादिसम्पादनाय परविडम्बनादिकं दृप्तलक्षणं निरूपितम् । इह तु स्वकार्यलेशमनपेक्ष्य परोपद्रवकारित्वं निरूप्यत इति विशेषः । एवमप्रस्तुत-प्रशंसैव पूर्वपद्धतौ बहुशः । अत्र तु समासोक्तिरेव प्रायः, उपमाऽपि क्वचिदिति विवेकः । परेषां अन्येषां, यत् चित्तं इदमद्य कार्यमित्यादि-निश्चयः । तत्रैव निरताः स्वबुद्ध्या कार्याकार्यादिकमनिश्चित्य परे यद्य-त्कार्यं परोपद्रवार्थमाचरन्ति तत्र तत्र स्वयमनुयायिनो भवन्तीत्यर्थः । 'मूढः परप्रत्ययनेयबुद्धिः' इति न्यायात् स्वानर्थपर्यवसायिनमपि परपीडा-दिकं सहसैव समाचरन्तीति भावः । एकशब्दोऽवधारणार्थः । पर-वित्तैकनिरता इति पाठे तु वित्तो भावो वित्तेति विग्रहेण भावे क्ताश्रयणेन वा ज्ञानार्थकत्वं प्रसाध्य परज्ञानानुयायित्वार्थबोधोऽवसेयः । यद्वा परेषां वित्तं धनादिकं स्वं तत्रैव निरताः तदीयवित्तहरणाय समयान्वेषणपराः यद्यपि परस्वहरणे स्वस्यापि वित्तलाभोऽवश्यम्भावी । तथाऽपि न तत्रैषा-मुद्देशः किं तु वित्तादिहरणेन परस्य दुःखोत्पादनमात्र एव । अत एव केचित् परवित्तहरणलोलुपा अन्येभ्योऽपि ददत्यपहृतानि । परशब्द-बलात् स्वभिन्नेषु सर्वेष्वपि प्रतिकूलाचरणकुतूहलित्वमाभिप्रेतम् । तेन चात्र स्वभिन्नसामान्यानुगतो न कश्चिदपराधलेशः सम्भवी । परं तु स्वस्वभाव-

॥ श्रीः ॥


# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १७.] कलि ५०४४ } स्वभानु- मकर साधारण ,, कुम्भ-शास्त्रानुबन्ध आहत्य { [सं ३. ,, ३. ६


## संस्कृतग्रन्थजातम् ॥

यथा मनुष्याणां तथेतरेषामपि रोगनिवृत्तये आयुर्वेदशाखाः प्रवृत्ताः। यथा पालकाप्यस्य हस्त्यायुर्वेदः । अस्य कालोऽनिश्चितः । अस्मिन् विषये नवीनो ग्रन्थः नारायणस्य मातङ्गलीला। शालिहोत्रस्य अश्वायुर्वेदः। अत्रार्वाचीना ग्रन्थाः गणस्याश्वायुर्वेदः, जयदत्तदीपंकरयोः अश्ववैद्यकं, वर्धमानस्य योगमञ्जरी, नकुलस्याश्वचिकित्सा, भोजस्य शालिहोत्रं अष्टत्रिंशच्छतपद्यमयम् । शूरपालस्य वृक्षायुर्वेदः इति ।

सप्तमे अष्टमे वा स्थितत्वेनोत्प्रेक्ष्यमाणस्य नागार्जुनस्य रसरत्नाकरः, वाग्भटस्य अश्विनीकुमारस्य वा रसरत्नसमुच्चयः, रामचन्द्रस्य रसेन्द्रचिन्तामणिः, जैनस्य मेरुतुङ्गस्य रसाध्यायव्याख्यानं, रसार्णवः, रसहृदयं, रसेश्वरसिद्धान्तः इत्येते पारदापरपर्यायरसवादविषया ग्रन्थाः ।

समुचितसंस्कारविशेषवशात् बद्धं गुलिकाभूतं पारदं प्राप्य सर्वाः सिद्धयः लब्धुं शक्यन्त इति केचित् एवंविधदर्शनविशेषप्रवर्तका आसन्। अत एव सर्वदर्शनसंग्रहे माधवाचार्यः रसेश्वरसिद्धान्तदर्शनमपि संगृह्णाति।

धनुर्वेदसम्बन्धिनो ग्रन्था नेदानीमुपलभ्यन्ते। विक्रमादित्यः सदाशिवः शार्ङ्गदत्त इत्येते अस्मिन् विषये ग्रन्थकारा इति श्रूयते।

गान्धर्वे भरतनाट्यशास्त्रातिरिक्तः प्राचीनो ग्रन्थो न कश्चिदिदानी-मुपलभ्यते । विद्यमानेषु प्राचीनतमः सङ्गीतरत्नाकरः काश्मीराभिजनस्य शार्ङ्गदेवस्य । अस्य कालो न निश्चितः । एतद्व्याख्याता तु कल्लिनाथः माकिं पञ्चाशच्चतुःशतीसहस्रे (१४५०) स्थित इति वदन्ति । सङ्गीतदर्पणकारो दामोदरः, शार्ङ्गदेवादर्वाचीनः । सोमनाथः स्वकीयं रागविबोधं नवषट्शती-सहस्रतमेऽलिखत् (१६०९) । साम्नां गीतिरूपत्वात् 'गायत्रं त्वो गायति शक्वरीषु' इति ऋक्संहितायामेव गायतिप्रयोगात् गीतस्य तस्मिन्नप्यति-प्राचीने काले प्रवृत्तिरासीदिति व्यक्तं भवति । 'काण्डवीणादिभिरुपगायन्ति, पत्नय उपगायन्ती'ति वैदिकविधिदर्शनात् सङ्गीतकला सुदूरमभिवर्धितेति च प्रतीयते । सङ्गीतशास्त्रस्य तु कदा उपक्रम इत्यध्यवसानमशक्यम् ।

अथ अर्थशास्त्रम् । अस्यापि चिरात्पूर्वं प्रवृत्तिरित्यत्र न सन्देहः । महाभारते कणिकविदुरादिमुखेन नीतयो विस्तरेणोपदिश्यन्ते । पुरा महता विस्तरेण ब्रह्मणा प्रोक्तं अर्थशास्त्रं विशालाक्षरुद्रः शिवः सञ्चिक्षेप । तस्यापि संक्षेपमिन्द्रः, तस्यापि बाहुदन्तिकः, तस्यापि बृहस्पतिः, तस्यापि उशना इति एतद्विषयः प्राचीनसम्प्रदायोऽपि महाभारते निबद्धः ।

अद्य स्थितेषु ग्रन्थस्य यस्य प्राथम्यं तस्मिन् कौटिल्यकृते अर्थशास्त्रे बृहस्पतिबाहुदन्तीपुत्रविशालाक्षाः प्रमाणतया निर्दिष्टाः । मनुयाज्ञवल्क्य-विष्णुस्मृतिषु अर्थशास्त्रपरिचयो महान् लक्ष्यते । धर्मशास्त्रार्थशास्त्रयो-र्विरोधे धर्मशास्त्राविरोधेन निर्णयः कार्य इति याज्ञवल्क्यनारदस्मृत्योः स्पष्ट-मुच्यते । कामसूत्रे च 'धर्मस्य प्रवक्ता मनुः । अर्थस्य बृहस्पतिः । कामस्य नन्दी'त्यभिधीयते । भासकालिदासमाघभृतयः स्वकृतेषु अर्थ-शास्त्रवैदुष्यमपि प्रदर्शयन्ति ।

कौटिल्यकृतमर्थशास्त्रं अष्टादशाधिकरणात्मना विभक्तम् । अह-त्यात्र प्रकरणानि अशीतिशतम् । अध्यायरूपेणापि कश्चन विभागोऽस्ति ।

राज्ञां शासनोपयुक्तं सर्वमत्रोपदिश्यते ।

एतत्कर्ता कौटिल्यः, चाणक्यः विष्णुगुप्त इत्यपि प्रसिद्धः । अयमेव नन्दविनाशहेतुभूत इति 'येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः । अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम् ॥' इति तत्रत्येनैव श्लोकेन ज्ञायते । नन्दान् हत्वाऽयं चन्द्रगुप्तं राज्ये स्थापयामासेत्यैतिह्यम् । पुराणे अर्वाचीनग्रन्थेषु च एवमेतत् दृश्यते । तथाऽपि कौटिल्यस्यैव अस्मिन् ग्रन्थे प्रमाणत्वेनोदाहरणात्, चन्द्रगुप्तस्यास्थाने ग्रीस्- देश-प्रतिनिधीभूय चिरं स्थितेन मेगस्तनिस्- अनेन स्वलेखेऽस्य सर्वथा अकीर्तनात्, अत्र प्रतिपाद्यस्य क्षुद्रराज्यमात्रविषयत्वप्रतीत्या कर्तुः, सार्वभौमोचितस्थितिविशेषपरिचयानवगमात्, तस्य महतः सम्राजः चन्द्रगुप्तस्य तत्साम्राज्यस्य अन्यस्य वा तत्सम्बन्धिनः कस्यापि विषयस्याकथनात् अत्र कौटिल्यः कर्तेत्येतत् नोपपद्यत इति वदन्ति । मन्यन्ते च त्रिशती समया कस्मिंश्चिदास्थाने स्थितेनाधिकारिपुरुषेण इदं लिखितमिति सम्भावनायाः अस्त्यौचित्यमिति । मनुयाज्ञवल्क्यनारदस्मृतिभ्यः अर्वाचीनत्वात् चतुश्शती-कालात् कामसूत्रात् प्राचीनत्वाच्च त्रिशतीसन्निहिते काले अस्य निर्माण-मिति युक्तमिति च ।

कौटिल्यार्थशास्त्रोपजीविकामन्दकीयनीतिसारः सप्तशतीसन्निहिते काले कृतः स्यादिति भाति । यशस्तिलककारस्य नीतिवाक्यामृतं अर्थ-शास्त्रान्तर्गतं ज्ञेयम् । हेमचन्द्रोऽपि लघ्वार्हतनीतिः इति कस्यचन ग्रन्थस्य कर्ता । भोजस्य युक्तिकल्पतरुः, चण्डेश्वरस्य नीतिरत्नाकरः, शुक्रनीतिः, नीतिप्रकाशिका इत्यन्येऽप्येतादृशा ग्रन्थाः सन्ति ।

मयमतम्, सनत्कुमारवास्तुशास्त्रम्, मानसारः, श्रीकुमारस्य शिल्प-रत्नं इति गृहनिर्माणशास्त्रग्रन्थाः ।

अगस्तिमितं, बुद्धभट्टस्य रत्नपरीक्षा, नारायणपण्डितस्य नवरत्न-

प्रकाशः, इति रत्नशास्त्रग्रन्थाश्च अर्थशास्त्रसम्बन्धिनः तच्छाखाभेदा एव । तथा पाकशास्त्रम् । वार्ता इति प्रसिद्धकृषिवाणिज्यविषया अपि ग्रन्थाः स्थितविनष्टा इति भाति । स्तेयशास्त्रमपि किञ्चिदासीदिति मृच्छकटिकादपि जानीमः । षण्मुखकल्प इति तद्विषय एको ग्रन्थः इदानीमस्तीत्याहुः । इत्यर्थशास्त्रम् ।

आयुर्वेदादीनामेषां चतुर्णां विद्यास्थानानां उपवेद इति व्यवहारः।

इति व्यवहारः ।

---

# माठरकौण्डिन्यन्यायः ॥

(V. R. Srinivasa Tatacharya Siromani.)

प्रत्याहाराह्निके हयवरट्सूत्रमहाभाष्ये 'इदं विचार्यते--अयं रेफो यकारवकाराभ्यां पूर्वमेवोपदिश्येत हरयवडिति, परः एव वा यथान्यासमिति । कश्चात्र विशेषः' । इति विचारमुपक्षिप्य 'रेफस्य परोपदेशे द्विवचनस्य प्रतिषेधो वक्तव्यः मद्र्ह्रदः भद्र्ह्रदः यर इति द्विवचनं प्राप्नोती'ति दोषमुपन्यस्य 'द्विवचनेऽपि । नेमौ रहौ कार्यिणौ द्विवचनस्य । किं तर्हि । निमित्तमिमौ रहौ द्विर्वचनस्य । तद्यथा ब्राह्मणा भोज्यन्ताम् । माठरकौण्डिन्यौ परिवेविषातामिति । नेदानीं तौ भुञ्जाते' इति ग्रन्थेन स निराक्रियत ।

अत्र प्रदीपे यरनन्तर्भूतहकारवत् तदन्तर्भूतरेफोऽपि न द्वित्वकार्यीत्यर्थमुक्त्वा एककर्तृकयोः भोजनपरिवेषणयोः युगपदसम्भवादस्तु तत्र बाधः । प्रकृते तु लक्ष्यभेदेन भिन्नवाक्यावगतनिमित्तकार्यिभावः किं न स्यात्, यथा अवगतकार्यित्वस्यापि इको निमित्तत्वं दध्युदकादावित्याशङ्कां हृदि निधाय लक्ष्यभेदेन कार्यित्वनिमित्तत्वसम्भवेऽपि लोकव्यवहारादेव शब्दार्थसम्बन्धपरिज्ञानवत् सामान्यविधेर्विशेषविधिः बाधक इत्यवसीयते । प्रकृते रेफानिष्ठस्य

रहाभ्यामिति विशेषशब्दावगतनिमित्तत्वस्य यर इति सामान्यशब्दप्रतिपन्नकार्यित्वस्य च अपूर्वबोद्ध्यत्वेन विधेयत्वात् (शब्दत्वे अपूर्वबोध्यत्वेन निमित्तत्वादेरपि विधेयत्वात् । न हि निमित्तवत्त्वमपि मानान्तरसिद्धमिति दिक् इत्यप्यधीयत) विधित्वाभावेऽपि वा विशेषविधिसामान्यविधिगताविलम्बितप्रतीतिकत्वविलम्बितप्रतीतिकत्वयोः तत्र विद्यमानत्वात् निमित्तत्वेन कार्यित्वस्य बाध इति तस्य द्वित्वं न भवति ।

'इको यणचि' इत्यत्र इक इति विशेषशब्दावगतकार्यित्वेन अचीति सामान्यशब्दप्रतिपन्नस्य इको निमित्तत्वस्य बाधस्तु न भवतीति दध्युदकादौ यण् भवति । 'तस्मादित्युत्तरस्ये'त्यादिनिर्देशोऽत्र ज्ञापकः । लक्ष्यस्थित्यपेक्षणाद्वा बाध्यबाधकभावो न । क्वचिदपेक्षा नास्तीत्यादिकमाख्यायत ।

अत्र उद्योते 'शब्दो वाक्यात्मा अर्थस्तदर्थः सम्बन्धः प्रतिपाद्यप्रतिपादकभावः तेषां परिज्ञानं यद्यथा लोकव्यवहारादेव तथा तयोर्बाध्यबाधकभावः सम्भवेऽपि भवतीत्येतदपि लोकव्यवहारादेव 'ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याये'त्यादिरूपादवगतमित्यर्थः' इति व्याकृत्य भाष्यार्थभ्रमनिरासार्थाश्रितानवकाशविषयतक्रन्यायस्य प्रवृत्त्यैव हर्यनुभव इत्यादौ रेफस्य निमित्तत्वेन कार्यित्वबाधे सम्भवति लक्ष्यानुरोधात् सामान्येन कार्यित्वबाधाभिप्रायिका लक्ष्यस्थित्यपेक्षणाद्वा बाध्यबाधकभावो नेत्यादिः कैयटोक्तिरयुक्तेति केचित्त्वित्यादिना न्यगद्यत ।

अत्र छायायां 'भाष्योक्तन्यायेन तत्काले तत्र । कालान्तरे तु तद्भवतीति प्रतिपाद्यत इति भ्रमनिरासाय न्यायान्तरं स्फुटप्रतीयमानकालभेदाविषयकमप्याह ब्राह्मणेभ्य इती'त्युद्योते तक्रकौण्डिन्यन्यायलेखनस्य हेतुरभण्यत । अनेन ग्रन्थेन 'नेदानीं तौ भुञ्जाते' इति यथाश्रुतभाष्यार्थो न ग्राह्यः । तक्रन्यायस्य यो विषयः स एव माठरन्यायस्यापि ग्राह्य इति स्पष्टमवगम्यते । शब्दकौस्तुभे—'यद्यपीह लक्ष्यव्यक्तिभेदेनोभयं सम्भवति । तथापि सत्यपि सम्भवे सामान्यतः प्राप्तं विशेषप्राप्तेन बाध्यत इत्यभ्युपगमान्न दोषः । एवं च अचोरहाभ्यामिति सूत्रे यर इति रेफाभिन्नपरमेवेति स्थिते 'अनचि चे'त्यत्रापि तथैव अर्थाधिकाराश्रयणात् । तेन हर्यनुभव-

इत्यादावपि रेफस्य न द्वित्वमि'ति ग्रन्थेन माठरन्यायस्थले तक्र-
न्यायाविषयस्य प्रतिपादनात् तक्रन्यायसमानविषयत्वमस्य न्यायस्य
फलति ।

स्वरसन्धौ 'सुध्युपास्य इत्यादौ स्थानित्वेन निमित्तत्वमिकः
'तस्मादित्युत्तरस्ये'ति निर्देशाज्ज्ञापकान्न बाध्यत इति कैयटः' इति
मनोरमायां कैयट इति प्रतीकं धृत्वा शब्दरत्ने 'अत्र स्थानित्वस्य
नानवकाशत्वं मध्वत्रेत्यत्र निमित्तत्वाप्राप्त्या तत्र स्थानित्वस्य चारि-
तार्थ्यात् । तक्रकौण्डिन्यन्यायोऽप्यनवकाशविषय एवेति स्पष्टं
'तद्धितेष्वचामि'ति सूत्रे भाष्ये' इत्यादिकथनाद्रेफनिमित्तत्वकार्यि-
त्वविषये तक्रन्यायस्य प्रवृत्तिस्सूच्यते । माठरन्यायस्य तक्रन्याय-
समानविषयत्वमुक्तरीत्या निवेदयतो ग्रन्थानेनानन्वादृत्य यदि नेदा-
नीं तौ भुञ्जाते इति भाष्यस्य परिवेषणकाले भोजनं न कालान्तरे तु
तद्भवत्येवेति तात्पर्यमेवोपवर्ण्यते तदा निमित्तत्वसद्भावे रेफस्य
कार्यित्वं न तदभावे तु कार्यित्वमस्तीत्यर्थः सिद्ध्येत् । ततश्च
मद्र्ह्रद इत्यत्र निमित्तत्वानाक्रान्तस्य हकारोत्तररेफस्य द्वित्वं स्यात् ।
न चैतत्कस्यापि सम्मतम् । येननाप्राप्तिन्यायः तक्रन्यायमूलक
इति स्पष्टं परिभाषेन्दुशेखरादौ । ततश्च माठरन्यायस्य तक्रन्याय-
समानविषयत्वे गदिते येनेतिन्यायसमानविषयत्वमप्युक्तप्रायं भवति।
एवं ग्रन्थस्थितौ सत्यां—'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते
इति । अपवादशब्दोऽत्र बाधकपर' इति परिभाषेन्दुशेखरे बाधक
इति प्रतीकमुपादाय वाक्यार्थचन्द्रिकायां 'विशेषविहितत्वाविशेषेऽ
पि यश्च प्रकृतन्यायबलाच्चारितार्थ्यमूलकत्वेन अन्यं बाधते सोऽप-
वादः । 'यस्तु सर्वे ब्राह्मणा भोज्यन्ताम् । माठरकौण्डिन्यौ परिवेविष्टा'
मितिन्यायमूलकतया सर्वथा निरवकाशत्वेनान्यं बाधते स बाधक
एव नापवादः' इत्यादिग्रन्थेन अन्यत्रैवमर्थकवाक्यैश्च येनेतिन्याया-
न्माठरन्यायस्य भिन्नविषयत्वं यन्निगदितं तत्पूर्वोक्तसर्वग्रन्थाननुगुणं
ह्र्यनुभव इत्यादौ रेफस्य द्वित्वनिमित्तत्वेन 'अनचि चे' ति प्राप्त-
द्वित्वकार्यित्वस्य बाधेऽपि मद्र्ह्रद इत्यादौ हकारोत्तररेफस्य तन्नि-
मित्तत्वाभावेन तत्कार्यित्वं निमित्तत्वेन स्वरीत्या येनेति न्याया-
द्भिन्नविषयेण माठरन्यायेन न बाधितुं शक्यत इति हकारोत्तर-
रेफस्य 'अचो रहाभ्यामि'ति प्राप्तद्वित्वस्यावारकं चेति भाति ।

35

# विद्वद्बहुमानः ॥

पुदुक्कोट्टै-संस्थान दानाधिकारि-पदमधितिष्ठन्तः अधीतनिगमाः सर्वशास्त्रविदो रसिकाः पण्डितपक्षपातिनः श्री. उ. वे. मतत्रयनिरूपक, काळि, विद्वद्-रङ्गाचार्यवर्याः अचिरात् कैश्चिदभिज्ञैः सभाविशेषादरेण "विद्यावारिधिः" इति श्रीकाञ्चीकामकोटिपीठाधिपतिजगद्गुरुश्रीशङ्कराचार्यपादैः "विद्वन्मण्डलमण्डनः" इति च बिरुददानेन सम्माविता इति कैश्चिल्लिखितं श्रुत्वा अतीव सन्तुष्टाः स्मः ।

एवं अण्णामलै-विश्वविद्यालय-व्याकरणाध्यापकाः अभिज्ञमणयः ब्रह्मश्री. एस्. रामसुब्बाशास्त्रिमहाशयाः 'शास्त्ररत्नाकर' इति 'व्याकरणार्णव' इति च, तत्रैव व्याकरणवेदान्ताध्यापकाः पण्डितप्रवराः ब्रह्मश्री. के. ए. शिवरामकृष्णशास्त्रिमहाशयाः 'शास्त्ररत्नम्' इति, चिदम्बरं- एम्.एस्. विद्याशालाध्यापकाः विपश्चिदुत्तमाः ब्रह्मश्री. के. एस्. नरसिंहशास्त्रिणः 'विद्य भूषण' इति 'साहित्यसुधाकर' इति च बिरुददानेन चेति ।

सर्वे एते पण्डितलोके सुविदिता अभ्यर्हिता महान्तः ।

---

—कथमरे चिरान्न दृश्यसे । तं श्लोकं प्रति किमासीत् ।

—कं श्लोकं प्रति ।

— आः । बहु रमणीयम् । विषयमेव विस्मृतवानसि । कुतस्तत्र प्रश्नस्योत्तरम् । 'तमन्वगच्छत् प्रथमो विधाता' इति श्लोके हि प्रश्नः कृतः ।

— आमरे । सर्वथा तं प्रस्तावं व्यस्मरम् । तदैव गत्वा कांश्चिदपृच्छम् । यथाश्रुतं दुर्घटमिति सर्वेषामभिप्रायः । अन्यथा तु पाठेन भाव्यम् । कथमिति न निश्चीयते ।

— न तथा । यथाश्रुतमपि कथञ्चिद्योजयितुं शक्यम् । प्रथमः पादः एकं वाक्यम् । अन्वगच्छादित्यस्यानुषङ्गेण द्वितीयःपादोऽपरं वाक्यम् । तौ तदा अभवतामिति पदत्रयमध्याहृत्य उत्तरार्धं तृतीयं वाक्यमिति । अपि तु

किं महाकविरेवं बहुध्याहारसापेक्षं श्लोकं निबध्नीयादिति व्याकुलोऽस्मि।

जयेति वाचा महिमानमस्य संवर्धयन्त्या हविषेव वह्निम् ।

इति श्रीमदनन्तपुरमुद्रणे पाठ इति वदन्ति ।

— सत्यम् । एवं तत्र पाठः । किन्तु उपमा तत्र हता भवति । वह्निं वर्धयता हविषेव स्थितया महिमानमस्य वर्धयन्त्या वाचा इति हि भाव्यम् । वाचा उपलक्षितो विधाताऽन्वगच्छत् । तादृशः श्रीवत्सलक्ष्मा पुरुषश्चान्वगच्छदित्युपर्यन्वयशोभाहानिश्च ।

— कथं तर्हि त्वं मन्यसे ।

— न मयाऽपि किमपि निश्चित्य वक्तुं शक्यते । यथाश्रुतं रक्षणीयं चेत् उक्तरीत्या अध्याहारवाक्यभेदादि सर्वं सह्यम् । पाठान्तरकल्पना अनुमन्यते चेत्

तमन्वगातां प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् ।

इत्येवं द्विवचनान्ताख्यातकल्पनं वरम् । तत्र हि नाध्याहारो न वाक्यभेदः इति नोपमाया दुर्भगत्वमिति सर्वसामञ्जस्यम् ।

तयोर्जगृहतुः पादौ राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥

इतिवच्चकारप्रयोगे एकवचनान्तकर्तृपदप्रयोगो द्विवचनान्ताख्यातसामानाधिकरण्येन हि युज्यत एव । एतद्ग्रहणाक्षमेण तु केनचिदर्धव्युत्पन्नेन अन्वगच्छदिति लिखितं स्यात् ।

इदमस्तु अन्यत् किमपि वक्तुमिच्छामि । 'नक्षत्रताराग्रहसङ्कुलाऽपि ज्योतिष्मती चन्द्रमसैव रात्रिः' इति रघुश्लोके तारापदेनान्योऽर्थः ग्रहपदेन अन्योऽर्थ इति न । अपि तु

प्रकाशकौ द्वौ प्रथमौ ग्रहाणां ताराग्रहाः पञ्च तमोग्रहौ द्वौ ।

इति ज्यौतिषिकवचनानुसारेण सूर्यचन्द्रराहुकेतुव्यतिरिक्तग्रहपञ्चके वाचि ताराग्रहेत्यखण्डं पदमिति श्री. उ. वे. मनसालक्कट्टै- गोविन्दाचार्यस्वामिनः ।

Registered No. M 2300.

Book XVII ॥ श्रीः ॥ Nos. 7, 8, 9&10.

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासंपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मानि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. १७.] कलि ५०४४ ,, ५०४५ } स्वभानु-मीन- साधारण / तारण- मेष-शास्त्रानुबन्ध / ,, वृषभ- साधारण / ,, मिथुन- शास्त्रानुबन्ध / आहत्य { [सं ४. / ,, ४. / ,, ५. / ,, ५. / ,, १०.

# The UDYANA PATRIKA.

A SANSKRIT MONTHLY.

March, April } May, June } 1944

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesri*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.**,
Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.

# विषयाः ॥

शास्त्रानुबन्धः—

कुवलयानन्दः । [बुधरञ्जनीसमेतः] ८९—९६

1 मेनका ।
2 सुभाषितनीवी ।
3 अभिधेयविशेषः ।
4 श्रीरामायणे अङ्गी रसः ।
5 सुबन्तपूर्वकतिङन्तसमासः ।
6 पुस्तकपरामर्शः ।

एतावति तं विहाय वयं धूमशकटे गतान् अदृष्टहीनान् साम्बशिवकनकाम्बाप्रभृतीन् अनुगच्छेम । तां रात्रिं कृत्स्नां तावुभौ अनिमेषौ असाचीकृतशिरसौ एकासिकया भित्तिलिखितचित्रकल्पौ अवर्तेताम् । स्वर्णाम्बा शयितः शव इव, इमौ उपविष्टौ शवाविव च अदृश्येतामित्येतद् विना नान्यदुच्यमानमनुरूपं भवेत् । सा रात्रिः असङ्कुचन्ती दूरं च अनत्ययं भवन्ती असह्यां वेदनां दत्त्वा तौ अव्यथयत् । व्यतिषङ्गेण मेनका स्वर्णाम्बा वराहस्वामीति त्रीनपि स्मारं स्मारं तयोर्मनः पद्मपत्रनीरवत् विसंस्थुलमभवत् । मोहेन तयोर्वपुः घिर् घिर् इति भ्रमित्वा आकाशमुत्पत्य पुनर्निवर्तमानमिवाभात् । तद्देहस्थस्य सर्वस्य जलस्य अश्रुरूपेण निर्गतत्वात् जिह्वा शुष्का बभूव । देहो वह्निज्वालं जज्वाल । इतःपरं रुदित्वा स्यन्दयितुं अश्र्वपि नावशिष्टम् । शिरश्शूलमेकतो निम्नदासीत् । तथाविधायां घोरायामवस्थायां उषसि सार्धासु पञ्चसु घण्टासु शकटः 'चेङ्गलपट्टु' भेजे । भारवहस्य शिरोनिहितहस्तमागतस्य 'चेङ्गलपट्टु' 'चेङ्गलपट्टु' इति निद्रारुदितमाकर्ण्य लब्धप्रतिबोधः साम्बशिवः 'साधु ! अहं गत्वा निवर्तिष्ये' । अद्य सायङ्कालस्यान्तः अस्खलितमागतो भविष्यामि । वित्तप्राप्तिविलम्बे सति श्वो मध्याह्नस्यान्तः अवश्यमागमिष्यामि । जाग्रत्तया आदाय नयत । सर्-शवलै रामस्वामिमुदलिसत्रे एकं गृहं भाटकाय समाभाष्य तत्र वासं कुरुत । वित्तमनन्तरे शकटे आगमिष्यतीति भिषजमुक्त्वा कार्यं निर्वर्तितं कुरु । इदं वित्तं सर्वं त्वं नय । मम द्वे रूप्ये अलम् । जाग्रत जाग्रत" इत्यभिधाय द्वे रूप्ये आदाय शिष्टं वित्तं मातरि वितीर्य शकटादवरुरोह । कनकाम्बा तं सहस्रकृत्वः 'जाग्रत्तां' उपदिश्य प्रेषयामास । अधस्तादवतीर्णे साम्बशिवे शकटान्तरमुपेत्य कृष्णरक्तराजुभ्यां वक्तव्यं ब्रुवाणे शकटो मद्रं प्रति चचाल । शकटस्थायाः स्वगृहिण्या रूप एव सर्वं स्वचित्तं निहितवान् साम्बशिवः अन्यत् सर्वं विस्मृत्य उन्मत्त इव शकटगतां दिशं पश्यन्नेव चिरकालं तस्थौ ।

SANSKRIT VIDYA PI...

स्वर्णाम्बामादाय गतः शकटः पुनः प्रातः सार्धसप्तसु घण्टासु मद्र-एळुम्बूरु आजगाम । सपदि रङ्गराजुना कतिचन वैतनिकान् नियोज्य तेषां साहाय्येन स्वर्णाम्बां प्रेङ्खोलिकया साकमवरोप्य तत्रैव क्वचिच्छन्ने प्रदेशे निदधे । भाटकमोटारसंविधानहेतोः रङ्गराजुः इतस्ततः विभ्रान्तशिरस्कमधावत् । तावत् शतसंख्याः प्रयाणिनः 'किं नाम तत्' इति प्रेक्ष्यप्रेक्षणाय आगताः प्रेङ्खोलिकामभितः पर्यवारयन् । तत्र मयूरी नु मुग्धहंसी नु इति शयितस्वर्णविग्रहदर्शनसमनन्तरं जनानां विस्मयो व्यामोहश्च ववृधाते । तस्या ललनामणेः निरुच्छ्वासं निर्भाषितं निमेषरहितं शयितं, तदीये सुन्दरे वपुषि अभ्यधिकान् व्रणबन्धान् स्थितांश्च दृष्टवतां तेषां मनो द्रवीबभूव । एकैकोऽपि कनकाम्बां पृष्ट्वा वृत्तं व्यजानात् । सपदि अश्रु मुञ्चन्तः, 'अस्या अभाग्याः का कालगतिरागता तात' इति वदन्तः अहो वराकी । श्वोतति हि नाम सौन्दर्यम् । इमां महालक्ष्मीं हन्तुं तेषां घातुकानां कथं नाम मनः प्रावर्ततेति भाषमाणाः, तद्दर्शनासहनतया लबो लबो इति वाचि प्रहृत्य 'अहो पापी । एवं नु इमां हरितशुकीं हन्यात् । ध्वंसतां तस्य गृह'मिति ब्रुवाणाः, 'तस्य भिषजः समीपं नयत । अस्य भिषजः समीपं नयत' इत्यभिदधतः, अस्यां स्थितौ इयत् दूरमानीतया न भवितव्यमिति व्याहरन्तः किं जातु आत्मनः व्यवहारस्थले साक्षित्वेन गन्तव्यं भवेदिति भीत्या बहुदूर एव मुखं परावृत्य कुडु कुडु इति धावन्तश्च जना बभूवुः । तस्मिन् समये स्वाधिकारप्रदर्शने यत्किमपि धनमागच्छेदिति मत्वा अधःपथकर्मकरेषु केचन 'पुराणमूषिकाः' पालकाश्च 'किमत्र इयान् संघातः । गच्छत गच्छत प्रेङ्खोलिकायाः कुतोऽत्र स्थापनम् । आदाय गच्छत । नात्र स्थापनीया' इति तर्जयन्तः धनोत्कर्षिणः श्येना इव मण्डलानि चक्रुः । पञ्चभिर्निमेषैः रङ्गराजुः मोटारशकटे एकस्मिन् आजगाम । परोपकारगुणपूर्णा जनाः प्रेङ्खोलिकामादाय निधातुं अहमहमिकया

पुरस्तादाजग्मुः । अनन्तरक्षणे प्रेङ्खोलिका मोटारे निहिता। अन्ये-ष्वपि त्रिषु तत्र संलग्नेषु शकटः शनैश्चलितुमारभत। प्रेङ्खोलिका-चलनभीतो रङ्गराजुः मन्दं यातु मन्दं यात्विति क्षणेक्षणे शकटकारे 'बन्दिकृत्यं' कुर्वन्नवास्त । पादनाडिकाकालेन शकटः पुरशवाके भिषजः विलिअंस्-हूणस्य गृहद्वारमागत्य तस्थौ

विलिअंस्-नामभाक् स हूणः न शुद्धो यूरोपीयः। यूरोपीयस्य पितुः भारतीयमातुश्च जातः यूरेशियाभिधानां जातिं गतः। तज्जा-तीयान् 'कञ्चुककाराः' इत्यभिधासु जनानां शीलम् । विलिअंस्-हूणो भारतांशापेक्षया यूरोपांशस्याधिक्यात् स व्रणचिकित्सायां महानिपुण आसीत् । घनग्रहणे तु ततोऽपि निपुण आसीत्। तदीयस्य गृहीतग्राहित्वस्य कपिमुष्टिरेव उपमानीकर्तव्या । यत् किमपि स आह स एव सिद्धान्तः। युगस्य विपर्ययेऽपि जगत एव पुनरुत्पत्तावपि तदीयनिर्णयमात्रं न विपर्यस्येत । तत्प्रति अन्यैः किमप्याक्षेपकरणे सद्यस्तस्य महान् कोपो भवेत् । उत्थाय प्रहर्तुं गच्छेत । वानर इव पुष्पमाला तस्मिन् लग्ना सा विद्या विव्यथे । जनाः चिकित्साहेतोः तमुपैतुं सन्त्रस्ताः प्रावेपन्त । अथापि व्रणवैद्यकर्माणि तं विना नान्यागतिरासीत् । तादृशस्य विलिअंस्हूणस्य गृहद्वारे मोटारशकट आगत्य तस्थौ । अनुपदं कृष्णो रङ्गराजुश्च शकटादवरुह्य अन्तः प्रविश्य लेखं हूणाय प्रासारयताम् । हूणः पळपळायमानोपनेत्रोज्ज्वलेन स्वकीयेन कूश्माण्डफलमुखेन तौ आरूढावरूढमीक्षांचक्रे । ततो लेखमादाय उद्घाट्य अनादृत एव पपाठ । तस्य मुखे यः कोऽप्यन्यथाभावो वा अनुकम्पा वा संभ्रमो वा चिन्ता वा न दहशे । लेखं सन्निहितायाः उत्पीठिकायाः उपरि अनादर एव विक्षेप। दिग-न्तरे परिवर्तितमुखः 'अरे नटेश, सज्जो नु शकटः' इत्याह । तस्य कर्मकरो नटेशः "सज्जोऽस्ति । प्रस्थातव्यम्" इत्याह । वस्तुतः स तदा कस्मैचिदविलम्ब्यकार्याय बहिर्गन्तुं सन्नद्धोऽभवत्। तस्मिन्

समये अस्मदीयानामागतानां प्रादुर्भावः तस्य अनल्पमावेगमुद्पादयत । तथाऽपि तत्रापुरादागतं लेखं गणयन् कोपं मनाङ्नियन्त्र्य कृष्णं प्रति 'सा अम्बा कुत्र वर्तते' इति पप्रच्छ । बहिर्द्वारे मोटारे स्थितां तां तस्मिन् कथितवति 'सद्य आनीयताम्' इति हूण आदेशमदात् । अनन्तरक्षणे स्वर्णाम्बाधिशयिनां प्रेङ्खोलिकां कृष्णः रङ्गराजुः कनकाम्बा मोटारशकटकार इति चत्वारः उद्धृत्य आनीय अन्तर्निदधिरे । अथ हूणः तान् चतुरो बहिरवस्थाप्य कवाटं पिधाय अर्गलयित्वा पादनाडिकाकालं स्वर्णाम्बायाः शरीरपरीक्षां चक्रे । स्वकीयं कर्मकरमाहूय व्रणान् क्षालनेन शोधयित्वा भेषजं निधाय बन्धयामास । यत्किमपि द्रावकं सज्जीकृत्य नासिकाद्वारा नालिकया तद् भेषजमन्तर्गमयामास । अन्या अपि काश्चन मुख्याश्चिकित्साश्चकार । बहिःस्थितान् कृष्णप्रभृतीन् अन्तरागमयति स्म । स्वर्णाम्बा यथापूर्वमेव प्रेङ्खोलिकायां यं कमप्यन्यथाभावं विना शयिता बभूव । हूणस्तान् वीक्ष्य "साधु । क वित्तम् ।" इत्याह । सपदि स्वर्णाम्बा 'वयमतित्वरया आगता अभूम । इदमनन्तरे शकटे अस्याः कन्यायाः पतिः वित्तेन आगच्छेत् । त्वरया कर्तव्यानि कार्याणि भवन्तु । वित्तं प्रति मनागपि आलोचना न कर्तव्या । इदमागच्छति' इत्याह । तदाकर्णितवतो हूणस्य महान् कोपोऽजनि । 'समीचीनं कार्यमकार्ष्ट । कन्यायाः पतिं विना यूयं केवलमागमत ! उरः विकृत्य शस्त्रचिकित्सा कर्तव्या । अद्य सायङ्कालस्यान्तः एतदकरणे जीव उत्क्रान्तो भवेत् । शरीरमत्यन्तमपायवत्यां दशायां वर्तते । अस्थिखण्डा हृदये लग्ना वर्तन्ते । हृदये रक्तवहनं अयथायथं वर्तते । अद्य सायङ्कालस्यान्तः रक्तवहनमेव सन्तिष्ठेत । अविलम्बेन उरो विलिख्य अस्थि अपोद्धर्तव्यम् । उरसो विलेखने प्राणा गच्छेयुरपि । 'तथा प्राणापाये त्वामुत्तरवादिनं न करिष्यामि' इति कन्यापतिना प्रथमं मम पत्रं विलिख्य देयम् । वित्तमपि सद्यो भवद्भिर्देयम् ।

कौटिल्यमेवास्य मूलमिति द्योत्यते । नितरां रता इत्यनेन स्वार्थसम्पादन एषां न किञ्चिदप्यासक्तिरिति सूचितम् । तर्हि स्वपुत्रभ्रात्रादीनामतथास्वभावानां विरोध एव सम्भवेदित्यतः तद्विरोधोऽप्यकिञ्चित्कर इत्याह—(पुत्रेति) । आदिपदेन भ्रात्रादिपरिग्रहः । असङ्गिनः वाञ्छारहिताः स्वीयचरित्रासहनेन पुत्रादिबन्धुभिः स्वपरित्यागेऽप्यनाकुलचित्ताः, स्वकार्यविरोधिपुत्रादिसङ्गमपि स्वयमेव परित्यजन्त इति वा । यथा रावणेन स्वकार्यनिरोधिविभीषणबहिष्करणं कृतमिति । अपिशब्देन पुत्रादिलाभाय लोके बहुशः प्रयत्नदर्शनेऽपि पुत्रादित्यागेऽपि प्रयतन्तेऽमी इति विरोधो द्योत्यते । यद्वा पुत्रादिभिः समयविशेषे स्वोपकारसम्भवज्ञानेऽपि तात्कालिकविरोधाचरणप्रत्यूहभिया तत्र वाञ्छां तत्सङ्गमेव वा परित्यजन्त इत्याशयः । अतश्च स्वानर्थमप्युपेक्ष्य परानर्थैकपरत्वावसायात् 'मृत्वाऽप्यन्नं वमयति नृणां मक्षिका कुक्षिगामी(गा हि?)' इति न्यायगोचरताऽवगम्यते । विशृंखलधियः शृंखलाशब्दितप्रतिबन्धकरहिता विशृंखलाः तथाविधा धियः बुद्धयो येषां ते, स्वबुद्धिपथपरिलग्नार्थस्य श्रुतिस्मृत्यादिरूपेश्वराज्ञा वा राजाज्ञा वा महाजनादिभीतिर्वा न काऽपि निवारयित्रीत्यर्थः । सर्वत्र निर्भयं स्वेच्छयैवाचरन्ति दुर्जना इति भावः । खलाः दुष्टाः, 'पिशुनो दुर्जनः खलः' इत्यमरः । योगिनामनुकुर्वन्ति योगिन इवाचरन्ति । 'तदस्यानुकरोतीति शब्दाः सादृश्यवाचकाः' इति हि दण्डी । योगितुल्या भवन्तीत्यर्थः । अत एवात्र उपमालङ्कारः । मातुः स्मरतीतिवत् सम्बन्धमात्रविवक्षया षष्ठी । योगिनाम नु कुर्वन्तीति च पदच्छेदः । नुः खल्वर्थे । योगिनां व्यासवसिष्ठशठकोपादीनां यन्नाम तदपि वहन्त ईदृशदुष्कर्मकारिण इति विस्मयः खेदो वाऽनेन द्योत्यते । तदेव गृह्यतां नामेति श्लोके छागादिभिस्त्रिमूर्तिनामवहनेऽपि न तावता कोऽपि बाधास्त्रिमूर्तिनामित्यभिहितम् । इह तन्नामवहनमात्रेण न कोऽपि लाभो दुर्जनानामित्युच्यत इति विभागः । परवित्तैरत्यादिदोष-

दुष्टतया वस्तुतो निरपराधच्छागादितोऽपि निहीनताऽनेन सूच्यते । छागादीनां नामवहनं कथञ्चिल्लाभहेतुरपि भवेन्नाम ; अदुष्टत्वात् , न तथैषामिति भावः ।

योगपरत्वे त्वेवमर्थः । परास्मिन् ब्रह्मणि चित्तैकनिरताः चित्तेन एकनिरताः । एकशब्दो मुख्यपरः क्रियाविशेषणम् । तथा च मुख्यतमासक्तिमन्त इत्यर्थः । परवित्तीति पाठे परं वेत्ति विन्दति वेति विग्रहभेदेन परब्रह्मवेदनलाभादिप्रवणता बोध्यते । पुत्रादिष्वप्यसङ्गिनः पुत्रादिलिप्सारहिताः तत्सत्त्वेऽपि तत्रासक्तिसम्बन्धाधिरहिता इति वाऽर्थः । योगशब्दस्य सन्न्यासपरत्वे त्याग एवासङ्गशब्दार्थः । विशृंखलधियः अनभिसंहितफलसत्कर्माचरणमृदितकषायतया निरर्गळविसरद्बुद्धयः विप्रकृष्टनिखिलवस्तुसाक्षात्करणसमर्था इत्यर्थः । यद्वा विशृङ्खलधियः शृंखलाशब्दः सम्बन्धिपरम्परापरः । अतश्च प्रसक्तानुप्रसक्तविषयतामन्तरेण परब्रह्मण्येव विलीनबुद्धयः इत्यर्थः । योगस्य तथास्वरूपत्वादिति भावः । खे लीयन्त इति खलाः । लिङः कर्तरि डः । 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'त्युक्ते ब्रह्मणि विलीनचित्ताः योगान्तर्गतपरमाकाशरूपप्राप्यस्थानचिन्तनपरा वा उक्तविशेषणत्रयेण परब्रह्मण्येवासक्तिस्तदन्याचिन्तनं तत्रैव लयश्चाभिधीयत इति न पौनरुक्त्यम् । पूर्वपद्धतौ जातिगुणादिन्यूनानां दर्पवशादुत्कृष्टजातीयसाम्यसम्पादनाय तत्सवेषता दूषिता । इह तु बहुदोषशालिनां दौर्जन्यमात्रात् परावमाननरूपं खलत्वं निरस्यत इति उभयोरदूरविप्रकर्षात् तत्स्मृतेः प्र[सङ्ग]सङ्गतिर्बोद्धव्या ।

एवं पक्षिपरतयाऽपि कश्चिदर्थः । खे लीयन्त इति खलाः पक्षिणः । पराचित्तैकनिरताः परस्य कस्यचित् पक्षिणो यच्चित्तं तत्रैव निरताः । पक्षिणो हि प्रातस्समुत्थाय परस्परसङ्केतमन्तरेणैव कस्यचिदाहारार्थं प्रतिष्ठमानस्य पक्षिणः पश्चादन्यस्तस्य पश्चादन्य इति गतानुगतिकतया सञ्चरन्ति न तु स्वबुद्ध्या कञ्चिदर्थमवधार्य सर्वे ससङ्केतम् । दृष्टानां तावदेकसङ्केता इव लक्ष्यन्ते

इति प्रसिद्धमेव । तथा च पुरोयायी न निरर्थकं चरेदिति बुद्ध्या स्वयमपि तदनुयानपरा इत्यर्थः । पुत्रादिष्वप्यसङ्गिनः तादृशसुदूरप्रयाणसमये स्वपोतादिकमप्युत्सृज्य गच्छन्त्यासायमिति प्रसिद्धः । विशृङ्खलधियः उक्त-रीत्या परस्परसङ्केतरहितबुद्धयोऽपि योगिनामनुकुर्वन्ति । श्रेणीबन्धेन सञ्चारात् समङ्कितमनस इव लक्ष्यन्ते । योगो मनःसंयोगः स्थानभेदाद्देशेन प्रस्थिता अप्येकस्थानार्थयायिन इवाभान्तीत्यप्यर्थो बोद्धव्यः ।

एवं खले कपोतन्यायोऽप्यत्र बोद्धव्यः । खलशब्दो धान्यमर्दन-स्थानपरः 'व्रीह्याद्याघट्टनस्थाने खलं धूर्ते त्वयं त्रिषु' इति रत्नमाला । तत्र च प्रकीर्णतमधान्यकुलावलोकीनि खतलचारीणि कपोतकुलानि युगपदेव तत्खले निपतन्ति । अनन्तरं चैकमुख्येन सुमृष्टं भक्षयन्ति धान्यजातानि । अयमेव न्यायोऽनुसृतः प्राचीननैयायिकैरभिहितान्वयवादे । आहुर्हि— 'वृद्धा युवानः शिशवः कपोताः खले यथाऽमी युगपत्पतन्ति । तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति' इति । पदजातैर्बोधिताः पदार्था एव वाक्यार्थावबोधका इति तत्पक्षः । अन्विताभिधाने तु अयं क्रमः । प्रथमं वाक्यघटकसकलपदानां क्रमशः श्रवणम् । अनन्तरं सर्वैरपि पदैःस्वस्वार्थ-स्मारणम् । अथ च तत्तत्समभिव्याहारादिपरामर्शात् स्मृततत्तत्पदार्थानां क्रिया-कर्मभावादिरूपसम्बन्धेनान्वयकल्पनम् । ततः परस्परसम्बद्धनिखिल-पदार्थविषयकविशिष्टवाक्यार्थबोध इति । यथाऽऽहुः—'पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् । न्यायसम्पादितव्यक्ति पश्चाद्वाक्यार्थबोधक'-मिति । नवीनाः पुनरनेनैव न्यायेन प्रथमं विशेष्ये विशेषणमिति रीत्या निखिलपदार्थान्वयः अनन्तरं विशिष्टवाक्यार्थबोध इति वदन्ति । तत्र चायं वाक्यार्थः । खलवृत्तान्तस्य तच्छब्देन बोधनात् । यथा सुभगाभिक्षुक-न्याय इत्यादौ सुभगाभिक्षुकयोर्यो वृत्तान्तः प्रवृत्तस्तद्बोधो भवति तद्वत् । अत एव खलशब्दस्य पुल्लिङ्गताऽपि ; शब्दपरत्वात् । यद्वा नामैकदेशग्रहणात्

तत्परता, न्यायपरतया पुल्लिङ्गता चेति । ते च न्यायाः परचित्तैकनिरताः। परशब्देन तात्पर्यविषयीभूतार्थ उच्यते । तत्पर इत्यादिव्यवहारात् । तद्विषयकं यच्चित्तं स्मरणम् । चित्तशब्देन स्मरणहेतुभूतमनोऽवस्थाविशेषवाचिना स्मरणमेवात्र लक्षणादिना बोद्ध्यते । श्रूयते हि—'चित्तं चित्तेन स्मृति स्मृत्या स्मारं स्मारेण विज्ञानं विज्ञानेने'ति । तत्रैव निरताः तदवबोधकाः तात्पर्यविषयीभूतार्थस्मरणमात्रबोधकाः। न्यायानां तद्ज्ञापकत्वं दृष्टान्तविधयेति। विचेति पाठस्त्वभिहितान्वयपक्षानुकूलः; प्रथममेवार्थबोधनस्य तन्मतसिद्धत्वात् । पुत्रादिष्वव्यसङ्गिनः पुत्रादिशब्देन पुत्रपौत्रस्थानीयाः युवानः शिशवश्च कपोता उच्यन्ते । तेन च तत्समानानि द्वितीयतृतीयादिपदानि लक्ष्यन्ते । 'वृद्धा युवानः शिशव' इत्यादिभिः पदैः पूर्वापरत्वादिसाधर्म्यात् प्रथमद्वितीयतृतीयादिपदानि ज्ञापनीयानीति संप्रदायात् । तेष्वसङ्गिनः सम्बन्धबोधनरहिताः परस्परासम्बद्धसकलपदार्थबोधका इत्यर्थः। विश्रृंखलधियः विश्रृंखलोपस्थितिजनकाः प्रथमतस्तत्तत्पदार्थानां विशेष्ये विशेषणमिति रीत्यैवान्वय इति तन्मतत्वात्, योगिनामनुकुर्वन्ति । अनुपदमेव परस्परसंयोगिविषयकविशिष्टवैशिष्ट्यावगाहिबोधजनका भवन्ति । योगशब्दस्तत्तत्सम्बन्धपरः। अनुकरणं च पश्चात्करणम् । सम्बन्धसामान्यविवक्षया षष्ठी ।

एवमेवात्राद्वैत्यभिमतमहावाक्यार्थबोधपरतयाऽपि बोधः । तत्र तत्त्वमस्यादिपदसमुदाया विशेष्यतया विवक्षिताः। ते च परचित्तैकनिरताः परस्य या चित्ता चिद्रूपत्वं तत्रैव निरताः । अहं ब्रह्मास्मीति परब्रह्मचैतोरभेदबोधस्य तन्मतसिद्धत्वात् । यद्वा—परस्तात्पर्यविषयीभूतः चित् चैतन्यं येषां ते, तेषां भावः परचित्ततेति विग्रहात् शुद्धचैतन्यमात्रतात्पर्यका इत्यर्थः । तत् त्वमादिपदैः सर्वज्ञत्वाल्पज्ञत्वादिविशिष्टचैतन्यार्थकैः तत्तद्विशेषणबहिष्कारेण शुद्धचैतन्यमात्रबोधोत्पादस्य तैरङ्गीकारात् । अत एव

॥ श्रीः ॥

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्वैधःखेदविमर्दनम् ।
पम्पातीरपरिष्कारं पारिजातमुपास्महे ॥

| | | | |
|---|---|---|---|
| पु. १७.] | कालि ५०४४ | स्वभानु- मीन- साधारण | [सं ४. |
| | | तारण- मेष-शास्त्रानुबन्ध | ,, ४. |
| | ,, ५०४५ | ,, वृषभ · साधारण | ,, ५. |
| | | ,, मिथुन- शास्त्रानुबन्ध | ,, ५. |
| | | आहत्य | ,, १०. |

## अभिधेयविशेषः ॥

यदा प्रभृति जगत् तदा प्रभृति भाषा । सा भाषा संस्कृतं यन्मया वेदाः । इत्येवं मीमांसकानां सिद्धान्तः । न चात्र बलवद् बाधकं किञ्चिदस्तीति तत्तथैवेति तावत् कुर्मः । एवमनादौ अथवा अनुपलब्धादौ भाषायां, प्रयोक्तृपुरुषगतोच्चारणप्रकारोपाधिविशेषानुसारेण पदानि तदभिधेयानि च यदि बहुधा विपर्यासं यान्ति तत् साहजिकम् । न तु कथमपि विस्मयपदम् । परं तु तथा जायमानो विपर्यासक्रमो यदि विविच्य न ज्ञायेत तर्हि प्राचीनेषु ग्रन्थेषु प्रयुक्तानां पदानां विवक्षितार्थविस्मरणेन स्वकालप्रसिद्धार्थान्तराभिधायित्वं सिद्धवत्कृत्य व्याख्यानक्लेशश्च महान् अस्माभिरनुभाव्यो भवति, पदवाक्यस्वारस्यं च हीयते । ईदृशानर्थोपनिपातप्रसङ्गपरिहरणेन नूनमतिमात्रं सफलमिदं भवेत् यदि वयं अद्यत्वे विस्मृतानां विस्मृतप्रायाणां वा प्राचीनप्रयुक्तपदाभिधेयविशेषाणामुपलम्भे यथाशक्ति यतेमहि । अस्मिन्नर्थे निदर्शनं भविष्यतीति मत्वा केषांचित् पदानां पुरा विवक्षितमभिधेयविशेषं दर्शयितुमिह प्रवर्तामहे ।

# १ अपरम् ॥

अपरपदं भेदवाचितया प्रसिद्धम्—केचिदित्थमाहुः अपर इत्थमित्यादौ । 'अपरं शतं दत्त' इत्यैतरेयब्राह्मणे, 'अपर आह' इति शाबरे, 'यद्यपि तावदेतदुपसर्जनकार्यं परिहृतं इदमपरं प्राप्नोति राज्ञः कुमार्याः राजकुमार्याः । गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं प्राप्नोति ।' इति पातञ्जले चास्मिन्नर्थेऽस्य पदस्य प्रयोगः । 'तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये' इति प्रथममेव अपरपदमानन्दवर्धनः अन्य इत्यर्थे प्रयुङ्क्ते ।

दिग्वाचितयापीदं पदं प्रसिद्धम् । यथा "पूर्वापरौ वारिनिधी विगाह्य" इति कालिदासीये ।

एवं कालवाचितयाऽपि । यथा 'पौर्वापर्यं क्रमः' इति । 'पूर्वापरीभूतं भावमाख्यातेनाचष्टे पचति भवतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्' इति यास्कः ।

यथाऽहान्यनुपूर्वं भवन्ति यथ ऋतव ऋतुभिर्यन्ति साधु ।<br>
यथा न पूर्वमपरो जहात्येवा धातरायूँषि कल्पयैषाम् ॥

इति मन्त्रेऽपि कालार्थमपरपदम् । "अतीतकालवर्ती पूर्वः । तदनन्तरकालवर्ती अपरः" इति ।

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम् ।

इत्यस्मिन् मन्त्रे इदं पदं दिक्परतया तैत्तिरीयब्राह्मणे व्याख्यातम्—"एतौ सूर्याचन्द्रमोरूपौ मातृस्थानीयाया दिवः शिशू बालकौ पूर्वभागमपरभागं च प्रति सञ्चरतः । उदयाय पूर्वभागः । अस्तमयाय पश्चिमभागः ।" इति । अत्र विशेष्यस्य प्रतिशब्दस्य चाध्याहारादस्ति गौरवम् । ऋक्संहितायां तु "कश्चित् पूर्वं गच्छति सूर्यः । अन्यस्तमनुगच्छति चन्द्रमाः । एवं पूर्वापरं पौर्वापर्येण मायया स्वप्रज्ञानेनैव एतौ आदित्यचन्द्रौ चरतः गच्छतो

दिवि ।" इति कालपरतया विवृतम् । अत्र क्रियाया एव विशेष्यत्वात् पूर्ववदध्याहारक्लेशो न मनागपि प्रसजतीति लाघवम् । एवं पूर्वपदेन अपर-पदेन क्रियाविशेषणेन सता योऽर्थः प्रतिपाद्यते स एव तेन कारकविशेषण-तयाऽपि प्रयुक्तेन प्रतिपाद्यमानो दृश्यते । यथा तैत्तिरीयसंहितायां—

यो वै देवताः पूर्वः परिगृह्णाति स एनाः श्वोभूते यजते

इत्यत्र पूर्वपदेन । अत्र हि यज्ञकर्म कुर्वतां बहूनां मध्ये यः पूर्वं देवताः परिगृह्णाति स एनाः परेद्युर्यजत इत्यर्थो विवक्षितः । एवमादिषु स्थलेषु वाक्योपात्तक्रियाविषयमेव पूर्वत्वमपरत्वं वा इष्टम् । तेनेदं यदि क्रिया-विशेषणतया प्रयुज्यते यदि वा कारकविशेषणतया न तत्र कश्चिद्विशेषो भवति । 'गम्भीरं गच्छति' 'गम्भीरो गच्छति' इतीदमुभयमपि हि एकार्थ-पर्यवसायि । 'उत्तानः शेते उत्तानशयः' इति वैयाकरणाः । तेन यदि मन्त्रपाठः पूर्वापरौ चरतो माययैतौ इत्येवंरूपोऽभविष्यत् तथाऽप्ययमेवार्थो नान्यः । ऐतरेयब्राह्मणे द्वात्रिंशऽध्याये षष्ठे खण्डे

तदाहुर्यस्याग्नावग्निमभ्युद्धरयुः का तत्र प्रायश्चित्तिरिति । स यद्य न पश्येदुद्धृत्य पूर्वमपरं निदध्यात्

इत्यत्र वाक्यान्तरोपात्तामुद्धरणक्रियां प्रति पूर्वत्वापरत्वयोर्विवक्षणात् उद्धृत्येत्यादिक्रियाविशेषणत्वं कृत्वा प्रयोगो नैव सम्भवी ।

यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायेदपर आदीप्यानूद्धृत्य इत्याहुः तत्तथा न कार्यं यद् भागधेयमभि पूर्व उद्ध्रियते किमपरोऽभ्युद्ध्रियेतेति ।

इत्यत्र तैत्तिरीयसंहितायां पुनः 'पूर्वमुद्ध्रियते' 'अपरमुद्ध्रियेत' इति क्रिया-विशेषणतया विपर्यासे न किञ्चिदणुमात्रमपि दुष्यति । 'यत् यदा पूर्वं आदौ, भागधेयमभि उत्पादितं पयःप्रभृति अग्निहोत्रद्रव्यं प्रति तद्भागित्वेनेत्यर्थः, उद्ध्रियते अग्निः । नात्र विवाद इति सूचनाय यच्छब्दो लट् च ।

तदा अपरं अनन्तरं किमपि किं द्रव्यं प्रति कीदृशहविर्भागित्वेन उद्धियेत । न हि हविरन्तरमस्ति यदर्थमनन्तरमुद्ध्रियेत' । इत्यतिस्वारसिकोऽर्थः । एतेन 'अपर आदीप्यानूद्धृत्यः' इत्यत्रापि पूर्वशब्दसमभिव्याहारविरहेऽपि 'अपरमादीप्यानूद्धृत्यः' इत्येव स्थितं कृत्वाऽर्थः सुवचः । न तु 'अपर अन्यः' इति व्याख्याननिर्बन्धः कश्चिदिति ज्ञेयम् । एवमेव

> अभि वा एष एतानुच्यति येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते पुरुषाहुतिर्ह्यस्य प्रियतमाग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद् भागधेयेनैवैनं शमयति नैषां पुराऽऽयुषोऽपरः प्रमीयते

इत्यस्मिन्नपि तैत्तिरीयसंहिताप्रकरणे अर्थो वाच्यः—ये पूर्णायुषो म्रियन्ते न तत्र किञ्चित् प्रतिविधेयमस्ति । अपूर्णेऽप्यायुषि यदि यः कश्चिदेको द्वौ वा त्रयोऽपि वा कदाचित् कारणविशेषेण म्रियेरन् तदापि तादृशकारणविशेषनिवृत्त्यैव अन्येषां मरणशङ्का न भवतीति नास्या इष्टेरावश्यकता । यदा पुनः सुबहवो म्रियन्ते ते चाविच्छेदेन म्रियन्ते तत्रेयमिष्टिः कार्येति सोपपत्तिकं विधीयते—अभिवा इति । येषां सम्बन्धिनः यदीया इत्यर्थः । पूर्वापराः प्रमीयन्ते अयं पूर्वं अयमनन्तरं अयं पूर्वं अयमनन्तरमित्येवं क्रमेण म्रियन्ते । तत्रापि अन्वञ्चः अयं पूर्वं पश्चात् कस्मिंश्चित् कालेऽतिक्रान्ते अयमिति कालव्यवधानं विना सान्तत्येन म्रियन्ते । एतान् अग्निः अभ्युच्यति अभिपमवैति संश्रितो भवतीत्यर्थः । किमित्येतान् समाश्रयतीत्यत्र हेतुमाह पुरुषेति । तस्य शान्त्यर्थमियमिष्टिरित्याह अग्नय इति । फलमाह नेति । एषां सम्बन्धी कश्चन अपरः अपरं एतदिष्टिकरणानन्तरकाले न प्रमीयते न म्रियते— इति । एतत्प्रकरणानन्तरभाविनि

> अभि वा एष एतस्य गृहानुच्यति यस्य गृहान् दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद् भागधेयेनैवैनं शमयति नास्यापरं गृहान् दहति

इत्यस्मिन् वाक्ये 'नास्यापरं गृहान् दहति' इति क्रियाविशेषणतयैव अपर-पदं श्रुतम् । तत्र

अपरं न दहति पुनर्न दहति । क्रियाविशेषणत्वान्नपुंसकत्वम्

इति भट्टभास्करस्य भाष्यम् ।

अपरं यथा भवति तथा न दहति । न पुनर्दहतीत्यर्थः ।

इति सायणस्य । अत्र पुनरित्यर्थापेक्षया पश्चादित्यर्थो वरमिति भाति । कथमपि क्रियाविशेषणत्वं तावत् स्थितम् । तदेतद् ज्ञापयति 'नैषां पुराऽऽयुषोऽपरः प्रमीयते' इत्यत्रापि ईदृश एवार्थोऽपरपदेन विवक्षित इति । अनल्पसंख्यान्युदाहरणानि सन्ति यत्रैवं क्रियाविशेषणस्थाने कारकविशेषणं दृश्यते ।

पूर्वो हि जातः स उ गर्भे अन्तः

इति मन्त्रे सायणभाष्यमेव

तथा पूर्वो जातः हिरण्यगर्भस्वरूपत्वेनायमेव प्रथममुत्पन्नः ।

इति पूर्वं जात इति स्थिते यथा व्याख्यातव्यं तथा व्याख्यानं कुर्वत् प्रवृत्तम् ।

(अनुवर्ति)

# श्रीरामायणे अङ्गी रसः ॥

(V. R. Srinivasa Tatacharya Siromani,)

श्रीरामायणे बालकाण्डे चतुर्थसर्गे—

'रसैः शृङ्गारकारुण्यहास्यवीरभयानकैः ।
रौद्रादिभिश्च संयुक्तं काव्यमेतदगायताम् ॥'

इति श्लोकस्य श्रीगोविन्दराजव्याख्याने 'अत्र केचित् 'शोकः श्लोकत्वमागतः' इत्युक्त्याऽस्मिन् प्रबन्धे शोकरस एव प्राधान्येनोच्यते, अन्ये तदङ्गतयेत्याहुः। अन्ये तु वीर एव प्रधानभूतः पौलस्त्यवध इति काव्यनामकरणादिति। वयं तु शृङ्गार एव प्रधानरसः 'सीतायाश्चरितं महत्' इत्युक्तेः तथोक्तम्—

'एको रसो भवेदङ्गी वीरशृङ्गारयोर्द्वयोः ।
अङ्गान्यन्ये रसाः सर्वे तस्य निर्वहणोद्यताः ॥' इति ।'

इति ग्रन्थो दृश्यते । अत्र केचिदित्यनेन ध्वन्यालोककार आनन्दवर्धनाचार्यः तद्व्याख्यानलोचनकारादयश्च निरदिश्यन्त । ध्वन्यालोके प्रथमोद्योते रसस्य काव्यात्मत्वप्रतिपादनावसरे

'काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥'

इत्यभ्यधीयत । तत्रैव चतुर्थोद्योते 'प्रबन्धे चाङ्गी रसः एक एवोपनिबद्ध्यमानोऽर्थविशेषलाभं च्छायातिशयं च पुष्णाति, कस्मिन्निवेति चेत् यथा रामायणे यथा वा महाभारते । रामायणे हि करुणो रसः स्वयमादिकविना सूत्रितः 'शोकः श्लोकत्वमागतः' इत्येवंवादिना निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धं उपरचयता' इति प्रत्यपाद्यत । शोकरस इत्यस्य शोकस्थायिकः करुणरस इत्यर्थः । वीरस्यात्र प्राधान्यं वदतामन्येषां त्वयमाशयः ।

'स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः ।
अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥'

इत्ययोद्ध्याकाण्डोपक्रमोक्तरीत्या श्रीरामावतारस्य पौलस्त्यवध एव प्रधानफलम् । प्राधान्येन व्यपदेशा भवन्तीति न्यायेन पौलस्त्यवध इति नाम श्रीरामचरितप्रतिपादकस्य काव्यस्य महर्षिणा वाल्मीकिना अक्रियत यदनु-

## श्रीरामायणे अङ्गी रसः ।

रोधिना माघेन स्वकाव्यस्य श्रीकृष्णचरितवर्णनपरस्य शिशुपालवध इति नाम कृतम् । ईदृशनामकरणात् अत्र वीरः प्रधानमवगम्यते । एतद्रसप्राधान्याभ्युपगमात् अत्र 'एको रसो भवेदङ्गी'ति वचनमप्यनुकूलमिति । श्रीगोविन्दराजस्य शृङ्गारप्राधान्यवादिनो मतेऽपि पूर्वोक्तवचनानुकूल्यं निराबाधं सिद्ध्यत्येव। आनन्दवर्धनाचार्यादिमते पूर्वोक्तवचनाविरोधस्तु साहित्यदर्पणे षष्ठे परिच्छेदे

'एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे'

इत्यादिकारिकायाः टिप्पण्यां एक इति प्रतीकं धृत्वा 'उत्कर्षाधानाय एक एव रसोऽङ्गित्वेन निवेशयितव्य इत्यर्थः । शृङ्गारो वीरो वेति कथनं तु समुचितरससूचकम् । तेन उत्तररामचरिते करुणस्य, प्रबोधचन्द्रोदये शान्तस्याङ्गित्वमव्याहतम् । अत एवोक्तम् ध्वनिकृता

'प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने ।
एको रसोऽङ्गी कर्तव्यस्तेषामुत्कर्षमिच्छता ॥' इति'

इति व्याख्यानरीत्यानुसन्धेयः। अत्र आद्य एव पक्षो बहुष्वलङ्कारग्रन्थेष्विवान्यत्रापि सम्प्रतिपन्नग्रन्थेषु समादृतः । उत्तररामचरिते तृतीयाङ्कस्योपक्रमे

'पुटपाकप्रतीकाशो रामस्य करुणो रसः'

इत्यनेन तस्योपसंहारे 'एको रसः करुण एव निमित्तभेदात्' इत्यादिना सप्तमाङ्के 'भगवान् भूतार्थवादी प्राचेतसः स्थावरजङ्गमं जगदाज्ञापयति यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनं वचनामृतं करुणाद्भुतरसं च किञ्चिदुपनिबद्धं तत्र काव्यगौरवादवधातव्यमिति' इति वाक्येन चात्र करुणस्य प्राधान्यमसूच्यत । पौलस्त्यवधनाम्ना कल्प्यमानं वीरप्राधान्यं षट्काण्डकथयाप्युपपद्यत इति उत्तरकाण्डकथाऽत्र नातीवोपयुज्यते । अतो

मध्यमः पक्षो न श्लाघामर्हति ।

श्रीगोविन्दराजस्तु 'रामस्तु सीतया सार्धं इत्यारभ्य सीतापहार-वृत्तान्तपर्यन्तेन संभोगो दर्शितः । परेण विप्रलम्भः' इति वदन् अस्य संभोग-विप्रलम्भात्मकशृङ्गारपरत्वमभिमन्यत इति भाति । अत्रैवमाशङ्काऽव-तरति युद्धकाण्डे अग्निशुद्धेःपरं श्रीरामस्य सीतासङ्गमः पट्टाभिषेकश्चाव-र्ण्यत । उत्तरकाण्डे पञ्चचत्वारिंशसर्गपर्यन्तं सीतायाः सङ्गम आख्यायत । ततःपरं अपवादेन त्यागादत्यन्तवियोगो न्यगद्यत । ततश्च 'संयुक्तयोस्तु संभोगो विप्रलम्भो वियुक्तयो'रित्येतत्प्रदर्शितलक्षणानुरोधेन 'इष्टवियोगाद-निष्टसंबन्धाद्वा करुणः स च दशरथादिवृत्तान्ते' इत्येतदुक्तरीत्या च वह्नि-शुद्धेःपरं अपवादेन सीतात्यागात्पूर्वं संभोगः ततःपरं करुण इत्येव वक्तव्यम् । तथानुक्त्वा नायकयोः पुनस्संयोगान्तवियोगविषये युज्यमानं परेण विप्रलम्भ इति कथनं सीतापहारवृत्तान्तादिपञ्चकाण्डकथायां कथं सङ्गच्छते । कृत्स्नस श्रीरामायणस्य प्रधानरसो मतभेदेन निरूप्यत इति, सीतापहारोपक्रमां तद्वह्नि-शुद्धिपर्यन्तां काण्डचतुष्टयकथामादाय परेण विप्रलम्भ इति ग्रन्थसमर्थनमपि न समञ्जसमिति । अत्रैवं श्रीगोविन्दराजस्याशयो भाति । श्रीरामस्य स्वापृथक्-सिद्ध्या भूतलादुत्थितं सिंहासनमारुह्य दिव्यमङ्गळविग्रहेण सह रसातलं प्रविष्टेति वर्णितया सीतया तात्त्विकात्यन्तवियोगो दुर्वचः । अतः करुणो दुर्भणः । वह्निशुद्धेः परं सीतया सङ्गमेऽपि भाविना लोकापवादेन तद्वि-योगोऽवश्यं अभिनेतव्य इति चिन्तयतो दीर्घदर्शिनः श्रीरामस्य हृदये सीतावियुक्तोऽहमित्यनुसन्धानमेवासीदिति 'द्वाविमौ संयोगवियोगाख्यावन्तः-करणवृत्तिविशेषौ यत्संयुक्तो वियुक्तश्चास्मीति धीः' इति रसगङ्गाधररीत्या सीतापहारवृत्तान्तमारभ्य श्रीरामायणसमाप्तिपर्यन्तं विप्रलम्भ एव सुवच इति ।

# सुबन्तपूर्वकतिङन्तसमासः ॥

'सह सुपे'ति सूत्रे शब्दकौस्तुभे—'उदात्तवता गतिमता च तिङा-गतेस्समासः' इति वार्तिकार्थसाधनाय महाभाष्यकारेणाश्रितं 'सहे'ति योगविभागं, तदर्थं तद्विषयादिकं चाभिधाय तिङ्समासस्तु छन्दस्येव । 'अत एव 'कर्मणा यमभिप्रैती'त्यत्रैकपद्यं नेति हरदत्तः । एतदपि असार्वत्रिकत्वादेव सिद्धम् । युक्तं चेदं छान्दसत्वेनैव तत्र सुब्लुको वक्तव्यत्वात् । अन्यथा 'एकवचनमुत्सर्गतः करिष्यते' इति भाष्यात्समासादुत्पन्नस्य सोः पर्यभूषदित्यादौ हल्ङ्यादिलोपसम्भवेऽपि यत्प्रकरोतीत्यादौ श्रवणापत्तेः' इत्यादिग्रन्थेन सुबन्तपूर्वकतिङन्तसमासस्य भाषाविषयत्वे सुबुत्पत्तिप्रयुक्तान् दोषानुक्त्वा 'तस्मात् काव्यादौ प्रभवतीत्यादिप्रयोगेषूपसर्गः पृथक्पदमेवेत्यभण्यत । अयमर्थः सिद्धान्तकौमुद्यादिष्वपि स्पष्टः । श्रीनिवासाचार्यविरचितशाकुन्तलव्याख्यायां 'यत्राष्टभिर्द्वादशभिः .... .... पदैर्वाऽपि सा नान्दीति प्रकीर्तिता ॥' इति नान्दीलक्षणं प्रदर्श्य तस्य लक्ष्यप्रदर्शनावसरे 'श्लोकपादं .... पदमूचिरे' इत्यत्रोक्तं 'सुप्तिङन्तं पद'मिति पक्षं प्रशास्महे उपास्महे इत्यत्रैकपद्यं च स्वीकृत्य 'उत्तररामचरिते उन्मत्तराघवे मुरारिप्रारम्भे च द्वादशपदात्मिका' इति यदुदितं यच्च वीरराघवाचार्यविरचितोत्तररामचरितव्याख्यायां 'इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे । वन्देमहि च तां वाणीममृतामात्मनः कलाम्' इति पाठे इदं कविभ्यः इति पदद्वयं नमोवाकमित्येकं पदं चेरीकृत्य अस्या नान्द्या द्वादशपदत्वमुदीरितं तत् पूर्वोक्तव्याकरणग्रन्थाननुगुणं प्रशास्महे इत्यत्र 'निष्प्रत्यूहमुपास्महे' इति मुरारिपद्ये च प्र शास्महे उप आस्महे इति पदविभागस्यैव तत्सम्मतत्वात् । भूषणसारव्याख्याने 'सुपां तिङे'त्यंशस्य विवरणावसरे समयपरिपालकौत्सर्गिकैकवचनस्य तु तथा सुबन्तस्यानभिधानादेवाप्रवृत्तिरिति भावः ।' इति प्रतिपादनात्तु लोके सुबन्तपूर्वकतिङन्तसमासस्वीकारेऽपि सुबुत्पत्तिप्रयुक्तदोषाभावेन प्रशास्महे इत्यादेरैकपद्यं युक्तं भाति । [V. R. S. T.]

# पुस्तकपरामर्शः ॥

Ramanuja's Theory of Knowledge. By Dr. K. C. Varadachari. M.A., Phd., Oriental Institute, Tirupati.

पौरस्त्यपाश्चात्यदर्शनमुख्यानेषु निष्णातोऽयं श्रीमान् वरदाचार्यः भगवद्रामानुजसिद्धान्तानुसारेण प्रमाणपद्धतिनिष्कर्षमस्मिन् भाषान्तरग्रन्थे प्रदर्शयति । अस्मिन् सिद्धान्ते भाषान्तरग्रन्थकारा विरळाः । तेन एतत्प्रक्रियापरिज्ञानं अपरिचितसंस्कृतानां प्रायेण दुःसम्पादम् । अस्यां स्थितौ एवंविधग्रन्थकरणमत्यन्तमुपकारकम् । तत्राप्यनेन आङ्गलभाषायां गाढपरिचयवता शैलीसौष्ठवशालिना श्रीवरदाचार्येण अयमेवंविधो ग्रन्थः कृत इति विदुषां सन्तोषस्थानमेतत् । [सं]

---

—सर्वदा इयं पत्रिका असौ पत्रिकेति क्रीत्वा क्रीत्वा पठसि । को विशेष इति तु न मनागपि ब्रूषे ।

—किं वक्तव्यमस्ति । दिशो दश । देशा बहवः । जना विविधाः । सर्वत्र युद्धम् । शान्तेर्वार्ताऽपि न श्रूयते ।

—किमरे एवं ब्रवीषि । परोक्षे यत्र क्वापि युद्धमिति श्रूयते ।

—किं आयुधैः क्रियमाणमेव युद्धं युद्धं मन्यसे । वाचाऽपि युद्धं भवति । धनैरपि युद्धं भवति । गृहेषु वीथीषु विपणिषु आलयेषु अधिकरणेषु शकटेषु सर्वत्र युद्धं प्रवर्तते । सर्वं युद्धमयं जगत् ।

---

योग्यो राजा निजपथरतो निर्वृतः सर्वलोकः
प्राज्या वृष्टिः परिणतफला सर्वतो भूतधात्री ।
विद्या साध्वी विनयमहिता भूयसी भक्तिरीशे
किं त्वस्माकं पुनरपि भवेदीदृशः कोऽपि कालः ॥
[सं]

SANSKRIT VIDYAPEETHAM TIRUPATI

46

Registered No. M 2300.

Book XVII ॥ श्रीः ॥ No. 11.

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. १७.] कलि ५०४५ तारण-कर्कट साधारण [सं ११

# The UDYANA PATRIKA.

A SANSKRIT MONTHLY.

July 1944

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।
७. एतत्सम्बान्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava, Mimamsakesari Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

1 मेनका ।
2 सुभाषितनीवी ।
3 अभिधेयविशेषः ।
4 मदिरेक्षणा ।
5 सुबन्तपूर्वकतिङन्तसमासः ।
6 विषयसूची ।

कन्यायाः पतिं विना कुतो भवन्त आगमन् । कन्यामादाय गच्छत"
इति साक्रोशमुवाच । कनकाम्बा व्यामुग्धा त्रस्ता च सती आर्य, सः
अनन्तरे शकटे अवश्यमागामिष्यति । अहमस्याः कन्यायाः श्वश्रूः ।
त्वरया शस्त्रचिकित्सा कर्तव्या चेत् अहं पत्रं विलिख्य दास्यामि ।
दयया कर्म कुरुत' इति सानुनयमुक्त्वा प्रार्थयत । हूणस्य असह्य
आवेगोऽजायत । केयं बुद्धिहीना वाक् । त्वं चेत् पत्रं विलिख्य
ददासि तदवकरे प्रक्षेपायैव उपयुज्येत । स चेद्विलिख्य न ददाति
शस्त्रचिकित्सां कर्तुं नाहं सज्जोऽस्मि । सायङ्कालस्यान्तः तमप्या-
दाय आगता भवत । अद्य मे त्वरया बहिर्गन्तव्यम् ।' इति
खण्डितमुक्त्वा किमपि भेषजं सज्जीकृत्य स्वर्णाम्बायाः नासिका-
द्वारा अन्तर्गमयित्वा 'सम्यक् । आदाय गच्छत ।' इति मूर्खं
भाषित्वा बहिरगच्छत् । तस्मिन् पुनरनुनयनेन फलं न भविष्यतीति
स्पष्टमभात् । प्रेङ्खोलिका सपदि शकटं प्राप । तस्मिन्नेव काले
स्वकीयं शकटमारोहन् हूणः कृष्णमभिवीक्ष्य 'नन्वार्य यूयं कस्मिन्
स्थले वासं कुरुथ' इति पप्रच्छ । कृष्णः 'आर्य, शवलै रामस्वामि-
मुदालियार् सत्रे करिष्यामः' इत्याह । तदाकर्णितवान् हूणः अना-
दृतं जगाम । मोटारशकटः शवलै रामस्वामिमुदलियार् सत्रम-
गच्छत् । तत्र वासोचिते द्वे गृहे भाटकेन परिक्रीते अभवताम् ।
तत्र प्रेङ्खोलिका निदधे । कनकाम्बा कृष्णः रङ्गराजुः इति त्रयोऽपि
किंकर्तव्यतामूढाः उत्कण्ठिताः महत्या चिन्तया पीडिताः कोणस्य
एक इत्युपविष्टा अभूवन् । कस्यापि भोजने वा विषयान्तरे वा बुद्धि-
र्न गच्छति स्म । तस्य सायङ्कालस्यान्तः साम्बशिवेन हि आगतेन
भाव्यमिति सधनेन चागन्तव्यमिति मत्वा मत्वा उत्सुकाः परि-
श्रान्ता उपविष्टा अभूवन् । तदा कृष्णः 'ननु पाटि, अयं किल
भिषक् ईषदपि करुणाहीनः पापी भवति । अन्यस्य कस्यचित्सकाशे
नयने किं स्यात् ?' इत्याह ।

सपदि कनकाम्बा 'चेच्छे । तदसाधु । अस्यां किल शस्त्र-
चिकित्सायां एतद्वत् सामर्थ्यशाली नान्यः कश्चिदस्ति । अस्य पुरु-
षकारलेशमप्यानेष्म । अयमेव खल्वेतावन्तं अनादरं करोति । इतः

TIRUPATI

परे वाचमुद्घाट्य भाषणमपि न कुर्युः । अस्तु । सायङ्कालस्यागतः स आगतो भवेत् । हूणश्च हि किमप्यौषधं दत्तवान् । पदेपदे इत्युवाच । तदहःकृत्स्नं साम्बशिवः अस्मिन् शकटे आगमिष्यति अनन्तरशकटे आगमिष्यतीति अभिधायाभिधाय पन्थानं पश्यन्त एव ते अवर्तन्त । पार्क् इत्यस्य धूमशकटस्थानकस्य सत्रपश्चाद्भागे स्थितत्वात् प्रतिशकटागमं रङ्गराजुः स्थानकं गत्वा दीनेन मुखेन प्रतिन्यवर्तत । रात्रिस्समागच्छत् न साम्बशिवः । कनकाम्बा कृष्णो रङ्गराजुः इति त्रयोऽपि अधिवह्निकीटवत् लुठ्यन्ति । हस्तौ पिषन्ति । तस्य सायङ्कालस्यान्तः शस्त्रकर्मणोऽकरणे स्वर्णाम्बायाः प्राणा न तिष्ठेयुरिति यद्भिषगाह तदद्यापि तेषां कर्णयोर्ध्वन्यमानमासीत् । कस्मिन् किल क्षणे तस्या जीवितं सन्तिष्ठेतेति त्रस्ताः पर्यतप्यन्त । तदा तदा कनकाम्बा स्वर्णाम्बाया नाडीं गृहीत्वा अपश्यत् । क्रमेण नाडी तडतडेति प्राह्रियत । मरणकाले तथा द्रुतं नाडीप्रहारो भवतीति कनकाम्बया पूर्वं श्रुतत्वात् तदानीं तस्या मनसो या व्यथा यस्तापः तस्य विस्तरेण वर्णनं न सुकरं कार्यम् । तयाऽनुभूतं नरकवेदनत्येव वक्तव्यम् । तस्यां स्थितौ प्रभातमप्यासीत् । साम्बशिवः पुनरागमिष्यन्निव नाभात् । एकैकोऽपि धूमशकटः वञ्चयति स्म । किं तु स्वर्णाम्बायाः प्राणाः अद्यापि देहे अतिष्ठन् । इतः विलम्बं विना शस्त्रकर्माकरणे तस्मिन् दिने ध्रुवं स्वर्णाम्बाया जीवितमपैष्यतीति कनकाम्बा मेने । स्वर्णाम्बा किं जीविष्यति अथवा मद्रमृत्तिकाया ग्रासो भविष्यतीति चिन्तं चिन्तं कनकाम्बा मग्नमना बभूव । आयत्यां स्वेषां सुखं दुःखं वा तस्मिन्नेकस्मिन्नेव दिने निर्द्धारणीयमिव मत्वा मत्वा विव्यथे । तस्यां स्थितौ डाक्टर् विल्लिअम्स् (कवाटमपावृत्य) अन्तः प्राविशत् । अन्तः स्थितास्त्रयोऽपि सम्भ्रान्ता उत्थाय अतिष्ठन् । कृष्णो हूणाय वन्दनं समार्पयत् । सपदि डाक्टर् ‘ह्यः सायमेव अस्याः पुरुष आगमिष्यतीति किल मिथ्या अवादिष्ट । मां प्रतारयितुमेव खलु अमन्यध्वम् ।’ इत्याह । तस्योत्तरं वक्तुं नैकस्यापि प्रत्यभात् । कनकाम्बा किंचिद्विसंस्थुलीभावानन्तरं ‘आर्य, अस्माकमयं क्रूरः काल इव । अचिन्तिता आपदः सर्वा आगच्छन्ति । वित्तेन साकं ह्यः सायमागमिष्यामि

पुत्रादिष्वप्यसङ्गिनः त्वंशब्दवाच्येषु श्वेतकेत्वादिरूपेषु पुत्रादिष्वपि असङ्गिनः । तत्र च सद्विद्यायां छान्दोग्ये 'उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाचे'त्यारभ्य प्रवृत्तपितापुत्रसंवादान्ते तत्त्वमसीत्यभिधानेन पुत्रादिपरत्वंशब्दादिषु शाब्दबोधसम्बन्धविरहिता इति वाक्यार्थः । तत्रत्यत्वंपदस्य पितृप्रयुक्तस्य पुत्रार्थकत्वात् । आदिपदेन तत्पदासिपदाद्यर्था अपि परस्परानन्वयिनो बोध्यन्ते । विशृंखलधियः परस्परावैशिष्ट्याद्यविषयकनिर्विकल्पकबोधजनकाः शृंखला च सम्बन्धिपरंपरेत्युक्तमेवाधस्तात् । खलाः ब्रह्ममात्रे लीनाः । अन्ततः शुद्धमात्रविषयकबोधोदयात् । योगिनामनुकुर्वन्ति एतादृशासम्बद्धबोधपरत्वेऽपि प्रकृतिप्रत्ययकर्तृक्रियापदादिनिर्देशात् सम्बन्धादिविषयकवाक्यार्थावबोधकपदसमुदायवदवभासन्त इति अमीषामपि खलत्वविवक्षयाऽत्र तत्सूचनम् ।

एवं कुलटाजनदासीजनपरतयाऽपि कश्चिदर्थः । खलाः खे इंद्रिये लीनाः कुलटाजनाः । इतो बहिः पश्य पराञ्चि खानीत्यादिप्रयोगात् खशब्दस्येन्द्रियपरता । परचित्तैकनिरताः परपुरुष एव चित्तेन एकनिरताः न तु स्वभर्तरि । दासीजनपक्षे परकीयचित्तग्रहणलोलुपाः । वित्तेति पाठस्तदर्थे स्वरसः । पुत्रादिष्वप्यसङ्गिनः परपुरुषसक्तानां स्त्रीणां कदाचिद्बहिर्निर्गमनादिसम्भवात् पुत्रादित्यागमपि तदाऽभ्युपगच्छन्तीत्यर्थः । दासीनामपि पुत्रद्यामेव प्रीतिः न तु पुत्रपौत्रभ्रात्रादाविति प्रसिद्धमेव । सामान्यतो दासीजनपरत्वविवक्षया पुंलिङ्गता । विशृंखलधियः अप्रतिबद्धबुद्धयः । स्वबुद्धिसञ्चारस्य गुरुजनादिना प्रतिबन्धकरहिताः तद्वार्ताद्युल्लङ्घिनः अन्यत्र यथेच्छबुद्धयश्च । योगिनामनुकुर्वन्ति गार्हस्थ्ययोगिनः कुलस्त्रीजना इव गृह एव स्थित्वा सांसारिकचरितमाचरन्ति । 'स्त्रीणां च चित्तं पुरुषस्य भाग्यं देवो न जानाति कुतो मनुष्यः' इति न्यायेन पतिव्रताकुलटयोर्वैषम्यग्रहणस्याशक्यत्वादिति भावः । अन्यत्र मनोयोगिन इवाचरन्ति । दासीनां वस्तुतः प्रीतिलेश-

विरहेऽपि आन्तरप्रीतियुक्तवत् नाटनदर्शनादिति भावः । खलाः नीचाः 'क्रूरे नीचेऽधमे खलः' इति विश्वः ।

एवं खलशब्दमुख्यार्थभूतदुर्योधनदुःशासनकर्णशकुनिरूपदुष्टचतुष्टयपरतयाऽप्यर्थबोधः । ते हि सर्वे परचित्तैकनिरताः । स्वगोष्ठीनिष्ठस्य यस्य कस्यचित्परोपद्रवमाचरतः सहायीभवन्त्येवापरे, न तु स्वबुद्ध्या कार्याकार्यविवेकपूर्वकमिति प्रसिद्धमेव । यथा द्रौपदीपरिभवादिप्रवृत्तस्य दुर्योधनस्यानुगामिनोऽभवन्नन्ये । न तु पूर्वमेवैवं कर्तव्यमिति विमृश्य प्रवर्तन्त इति भावः । परवित्तेति पाठे 'सूच्यग्रं न प्रदास्यामी' त्युक्त्या तद्ग्रहणैकसक्ताः इत्यर्थः । पुत्रादिष्वपि कर्णस्य पुत्रस्थानीयेषु दुर्योधनस्य पितृस्थानीयेष्वपि धर्मपुत्रादिषु सर्वथा प्रीतिरहिताः । यद्वा पुत्रशब्दो भामादिवत् नामैकदेशग्रहणात् धर्मपुत्रपर इति द्रष्टव्यम् । खलाः दुष्टा वा नीचा वा । योगिनामनुकुर्वन्ति । कुरूणामन्ति कुर्वन्ति । अन्तिशब्दः अन्तिकार्थकः । 'यो मेऽन्ति दूरे रातीयति तमेतेन जेष'मित्यादौ यो मम समीपे दूरे वा शत्रुत्वमिच्छतीति व्याख्याकरणात् । तथा च अनुकुर्वन्ति कुरुक्षेत्रसमीपमनुसृत्यापि । 'योगिनामि'त्यस्य कुरुक्षेत्रेऽन्वयात् योगिनिवासभूतकुरुक्षेत्रार्थकतालाभः । विशृंखलधियः कार्याकार्यविवेकभयलेशविरहितं वस्त्रापहरणादिरूपात्युत्कटमहापापकरणप्रवृत्तेर्निरर्गळबुद्धयः । योगिनामित्यनेन समीपस्था योगिनोऽपि स्ववार्तोल्लङ्घनभिया न निवारयन्त्येतानिति द्योत्यते । तथा च स्वप्रयोजनलेशमनपेक्ष्य परोपद्रवैकप्रवृत्तिरूपस्य खललक्षणस्यात्र समन्वयो बोद्धव्य इति ।

एवं विभीषणादिपरतयाऽपि । ते च परचित्तैकनिरताः स्वजनं रावणादिकमुपेक्ष्य परस्मिन् विजातीये श्रीरामे निलग्नचित्ताः । पुत्रादिष्वप्यसङ्गिनः 'त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः' इत्युद्घोषेण तेष्वनासक्ताः । विशृंखलधियः धनादिपरित्यागेऽप्यकलुषबुद्धयः । खलाः खे लीनाः

॥ श्रीः ॥

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्ब्रह्मखेदविमर्दिनम् ।
पणातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १७ ] कलि ५०४५ तारण-कर्कट [ सं ११

# अभिधेयविशेषः ॥

(अनुवृत्तम्)

ब्राह्मणो जज्ञे प्रथमो दशशीर्षो दशास्यः ।
स सोमं प्रथमः पपौ स चकारारसं विषम् ॥ 4. 6. 1. ॥

इत्यथर्वमन्त्रे 'प्रथमः पपौ' इत्यत्र

यस्मादयं ब्राह्मणः तस्मात् स तक्षकः प्रथमः क्षत्रियादिजातीयेभ्यः पूर्वभावी सन् सोमं पपौ

इति भङ्ग्यन्तरेण 'प्रथमं पपौ' इत्येवमेव कृत्वा व्याख्यातम् । 'प्रथमो जज्ञे' इति पूर्वार्धेऽपि तथैव व्याख्याने उचितेऽपि प्रकारान्तरं भाष्ये आश्रितम् । ऐकरूप्याय तु 'प्रथमं जज्ञे' इत्येव व्याख्येयम् । इत्थं ऋगादिसंहितासु 'यो जात एव प्रथमो मनस्वान्' 'इयमेव सा या प्रथमा व्यौच्छत्' 'सुपर्णो जातः प्रथमः' इत्येतत्प्रभृतिषु स्थलेषु बृहस्पतिः प्रथमं जायमानः' इतिवदेवार्थो वाच्यः । 'आश्विनो दशमो गृह्यते । तं तृतीयं जुहोति' इति मीमांसकोदाहृते वाक्ये दशमादिपदेष्येतत् समानम् । यथा यथैतच्चिन्त्यते तथा तथेदं भाति यत् प्राचीनवाक्यशैलीं प्रति अवधेयेषु बहुष्वंशेषु अयमप्येकः यत् अद्यतनशैल्यां प्रकारान्तरेण प्रतिपाद्यमानोऽर्थः तत्र कारकविशेषणतया प्रयुक्तेन पदेन प्रतिपाद्यत इति । (अनुवर्ति)

# मदिरेक्षणा ॥

शाकुन्तले वैखानसश्लोके सदृशेक्षणवल्लभाभिरिति क्वचित् पाठः । प्रसिद्धतरस्तु मदिरेक्षणवल्लभाभिरिति । मदिरैः सुन्दरैः ललितैः ईक्षणैः वल्लभाभिः प्रियाभिः हरिणाङ्गनाभिः इति केचिद्व्याचक्षते । मदिरेक्षणवल्लभा शकुन्तला आभिर्हरिणाङ्गनाभिरिति पृथक्पदमिच्छन्तोऽन्येऽपि मदिरे सङ्गा-तमदे मदहेतू मनोहारिणी ईक्षणे यस्यास्तादृशी वल्लभा शकुन्तलेति । अपरे पुनः मदिरा सुरा सेव ईक्षणं यस्यास्तादृशीति । अत्र इतर आचक्षते । 'मदिरो मत्तखञ्जनः' इति कोशः । खञ्जनोपमा चाक्ष्णः कविभिर्निबद्ध्यते । यथा नैषधचरिते—'अपि खञ्जनमञ्जनाञ्चिते' इति । तथा चात्र मदिरस्य मत्तखञ्जनस्य ईक्षणे इव ईक्षणे यस्याः सेति व्याख्यानं श्रेयः । 'सप्तम्युप-मानपूर्वपदस्योत्तरपदलोपश्च'त्यनुशिष्टः समासः । एवंविधस्यातिस्वरसस्य कविसम्मतस्यार्थस्याविज्ञानादन्येषामन्यथा व्याख्यानमिति ।

इदमवधारणमपरे न क्षमन्ते । यद्येवं कोशोऽस्ति यदि चैवमुपमा सम्भवति * तेन तदनुरोधेन काममेवं व्याख्यायताम् । व्याख्यानान्त-रस्य तु तावता को दोषः । अत्र स्वारस्यमिति चेत् किं कुर्मः । भिन्न-रुचिर्हि लोकः । सुरोपमा नयनस्याप्रसिद्धेति चेत् केनोपमा इष्यते । मनोहरार्थमात्रस्येष्टत्वात् । एवं सति खञ्जनोपमैव कालिदासाभिप्रेतेति नास्त्येकान्त इति ।

> अस्मदीयमभिप्रायमत्र वाञ्छन्ति वेदितुम् ।
> सुहृदो बहवो यस्मात् तस्मादेष प्रकाश्यते ॥

---

* इयमुपमा खञ्जनस्वरूपेण न तु तन्नयनाभ्यामिति

> तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागम् ।
> स्फुटकमलोदरखेलनखञ्जनयुगमिव शरदि तटाकम् ॥

इति गीतगोविन्दगाथास्वारस्यादवगम्यते ।

> न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे ।

इत्यादौ भ्रमरस्वरूपेणेव ।

मदिरो मत्तखञ्जन इति कस्मिन् कोशे पठ्यत इति न जानीमः । शब्द-कल्पद्रुमादिषु स्त्रीलिङ्गमेव पठित्वा सुरा मत्तखञ्जन इत्यर्थद्वयमुक्तम् । तत्र प्रमाणतया कीर्तितायां अद्य अस्माकं दुर्लभायां शब्दरत्नावल्यां स्त्रीलिङ्ग एवायं शब्दः खञ्जनपरतया पठित इति तत एव ज्ञातव्यम् । अतो यद्येतन्मूलमेव उक्तकोशपाठकल्पनं तत्र विश्वसनीयम् । अथान्यत्रोपलभ्येत तर्हि यत्रोपलभ्यते स कोशः प्रदर्शनीयः । तदवधि यदि प्रामाणिका न विश्वसन्ति नायं तेषामपराधो भवितुमर्हति । यस्तु शब्दकल्पद्रुमे शाकुन्तल-श्लोकः पठितः 'यदि मदिरायतनयना'मिति स कलकत्तामुद्रिते पुस्तके 'तव कुसुमशरत्वम्' इत्यस्मात् पश्चात् परं पठ्यमानो दृश्यते । परं तु तत्रापि मनोहरे आयते च नयने यस्या इत्येवार्थः कुतो न भवितुमर्हति ।

ननु यावदाकरोपलम्भं मा नामायं शब्दः पुंलिङ्गो भूत् । मदिरेति स्त्रीलिङ्गमेव कृत्वा खञ्जनोपमास्वीकारे काऽनुपपत्तिरिति चेत् तत्रेदमवधेयम् । मदिराशब्दस्य खञ्जनार्थत्वे शब्दकल्पद्रुमः स्वयं न प्रमाणम् । शब्दरत्नावलीनिर्देशात् । सोऽपि कोशः कोशत्वेनैव न प्रमाणम् । पुण्ड-रीकं सिताम्भोज'मित्यमरसिंहानुशासनस्य रक्तवर्णं पुण्डरीकमिति मीमांसा-भाष्यानुरोधेन अनादरणीयत्वस्थितेः । प्राचीनप्रयोगोपजीविनो हि कोश-कारा अपि । तद्विरोधस्य अन्यथाग्रहणस्य वा सम्भावनायां न अपरामृश्य तदुक्तं तथैवेति ग्रहीतुं शक्यते । इयं शब्दरत्नावली १६६६ तमे आङ्गल-संवत्सरे सङ्कलितेति सप्ततेर्वर्षेभ्यः पूर्वं कश्चन विमर्शको लिलेख । ततः प्राक् मदिराशब्दस्य खञ्जनार्थत्वं किं क्वचिदभिहितमित्यन्वेषणीयम् । प्राचीनेषु अद्योपलभ्यमानेषु शब्दकल्पद्रुमकारादिभिर्दृष्टेषु च कोशेषु तन्ना-भिहितमिति स्पष्टम् । उणादिषु मदिराशब्दो व्युत्पादितः । एतत्सूत्र-पाठस्य बह्व्यः शाखा इदानीं मुद्रिताः सुलभाः । तत्र यः कोऽपि वृत्ति-कारः अस्य शब्दस्य पुंलिङ्गत्वं वा पक्ष्यर्थत्वं वा न दर्शयति । 'मुदिरः कामुकाभ्रयोः' इति अनन्तर एव मुदिरपदे विश्वमेदिन्यौ कोशावुदाहरन्तो

वृत्तिकाराः प्रकृते ‘मदिरा सुरा’ इत्येतावन्मात्रमभिधाय विरमन्ति । ‘मदिराक्षि मदाननार्पितम्’ इति रघुवंशश्लोकव्याख्याने मल्लिनाथः मदिरे मत्ते अक्षिणी यस्या इत्याह । मत्तार्थश्च ‘स्त्रियां तु मदिरा मद्ये पाने मत्ते तु वाच्यवत्’ इति पेरुसूरिणा औणादिकपदार्णवे अभिहितः । अस्मिन्नर्थे विशेष्यनिघ्नत्वमपि । अतो नास्ति विस्रम्भार्हं मूलं मदिराशब्दस्य खञ्जनार्थत्वे । कविभिर्नयनविषये निबद्धां खञ्जनोपमां दृष्ट्वा मदिरेक्षणेत्यादौ अज्ञातार्थविशेषस्य मदिरेतिशब्दस्य खञ्जनपरत्वं स्वयमेव जग्राह शब्दरत्नावलीकार इति तु प्रतिभाति । तस्मात् स्त्रीलिङ्गत्वे सुरार्थस्यैव प्रामाणिकत्वात् गौण्या मनोहारित्वमर्थः । सुरायामेव इमं शब्दं क्लीबं केचिदिच्छन्ति । तत्राप्येवमेव । विशेष्यनिघ्नत्वे तु शक्त्या लक्षणया वा मत्ताद्यर्थो वाच्यः । तत्र स्त्रीलिङ्गत्वे समासे ह्रस्वो दुर्वचः । दृश्यते तु स प्रयोगे । यथा विद्धसालभञ्जिकायाम्—

हारोऽयं केरलस्त्रीविहसितशुचिभिः पंक्तिभिर्मौक्तिकानां
सद्यः षाण्मासिकानां मम मदिरदृशा दत्तचन्द्रोदयश्रीः ।

इति । तदेवं विशेष्यनिघ्नोऽयं मदिरेक्षणेत्यत्र मदिरेतिशब्दः मत्ताद्यर्थक इति युक्तमिति प्राप्तम् । तत्र नाट्यशास्त्रेण कश्चन विशेषोऽवगम्यते ।

व्याघूर्णमानमध्या या क्षामान्ताञ्चितलोचना ।
दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे ॥ ८. ७९

इति भरतेन दृष्टेर्मदिरत्वावस्था काचन लक्षिता । तदभिप्रायेणैव नाट्यकलाकोविदेन कालिदासेन मदिरेक्षणेत्यादि प्रयुक्तमिति ।

गीतमञ्जुगिरस्तत्र नृत्तसंवादिविभ्रमाः ।
मञ्चेषु हरिरद्राक्षीत् वरस्त्रीर्मदिरेक्षणाः ॥

इति श्रीमद्यादवाभ्युदयदशमसर्गश्लोकव्याख्याने ‘चक्षुर्विकसितापाङ्गं मदिरं तरुणे मदे’ इति पाठभेदेन उक्तलक्षणश्लोकोदाहरणपूर्वकं मदिरेक्षणापदं व्याख्यातम् । इति ।

---

# सुबन्तपूर्वकतिङन्तसमासः ॥

(V. R. Srinivasa Tatacharya Siromani)

विषयोऽयं प्राक्तनसञ्चिकायां प्राकाश्यत । परन्तु तत्र विशदमुपपादयितुमवकाशो न लब्ध इत्यत्रोपपाद्यते । महाभाष्य 'सहसुपे'ति सूत्रे सहेति योगं विभज्य तस्य सुबन्तं समर्थेन सह समस्यत इत्यर्थमाश्रित्य अनुव्यचलत्, अनुप्राविशत् इति तिङन्तसमासद्वयमुदाह्रियत । अत्र प्रदीपे योगविभागस्येष्टसिद्ध्यर्थत्वात् सुपेत्यस्य भाष्ये लक्षणत्वप्रतिपादनाच्च सहेत्यस्य कतिपयतिङन्तविषयत्वमेवेति प्रत्यपाद्यत । भाष्ये प्रदीपे वा अस्य समासस्य छान्दसत्वं नोक्तम् । अस्मात्समासात् प्रातिपदिकत्वेऽपि सुबनुत्पत्तिः । अतः ऐकपद्यत्वेति प्रदीपोद्योतयोर्न्यगद्यत । पदमञ्जर्यां तदनुसारिषु कौस्तुभादिग्रन्थेषु चास्य लौकिकत्वे सुबुत्पत्तिप्रयुक्तविकारापत्त्या छान्दसत्वे सुब्लुक्सम्भवेन च छान्दसत्वमेवेति निरणीयत । भूषणसारव्याख्याने औत्सर्गिकैकवचनस्याप्यत्राप्रवृत्तिरित्यभ्यधीयत ।

### अयमत्र निर्गलितोऽर्थः ।

अस्य समासस्य छान्दसत्वं न भाष्यसम्मतम् । पदमञ्जर्यादिरीत्या छान्दसत्वेऽपि छान्दसानामपि भाषायां क्वचित्प्रयोगः इति 'वयस्यासु मूर्ध्नो मतुबि'त्यादिप्रमाणमुखेन तत्र निरूपितत्वात् लोके प्रयोगो युज्यत एव । योगविभागस्येष्टसिद्ध्यर्थत्वात् यत्र ग्रन्थकारैः सुबन्तपूर्वकतिङन्तस्यैकपदत्वमुच्यते तत्रायं समास आश्रीयते । अन्यत्र तु समासो न भवति । भाषायां तत्र समासत्वप्रयुक्तस्वरो नाद्रियते । अस्मात्सुपस्तिङो वाऽनुत्पत्त्या सुबन्तत्वतिङन्तत्वान्यतरप्रयुक्तमेकपदत्वमस्य नास्त्येव । परं तु अनेकपदसम्बन्ध्येकीकरणात्मकसंश्लेषरूपसमसनविषयत्वरूपसमासत्वसद्भावमात्रेण तु नान्यामुपास्महे, प्रशास्महे इत्यादेः एकपदत्वेन गणनेति ।

॥ श्रीः ॥

# उद्यानपत्रिका ॥

सप्तदशवर्ष-

# विषयसूची ॥

—o◇o—

# UDYANA PATRIKA

[XVII Year]

## CONTENTS.


1 मेनका । 1, 17, 33, 49, 67.

2 सुभाषितनीवी । 5, 21, 37, 53, 69.

3 संस्कृतग्रन्थजातम् । 9, 25, 41.

4 'वाहि वाते'ति श्लोके विशेषः । 11. V.R.S. Tatacharya Siromani.

5 वाल्मीकिसेवा । 13, 30.

6 पुस्तकपरामर्शः । 15, 66.

7 कल्की वाजिवक्त्रः । 29. V. R. S. T.

8 माठरकौण्डिन्यन्यायः । 44. V. R. S. T.

9 विद्वद्बहुमानः । 47.

10 अभिधेयविशेषः । 57, 71.

11 श्रीरामायणे अङ्गी रसः । 61. V. R. S. T.

12 सुबन्तपूर्वकातिङन्तसमासः । 65, 75 V. R. S. T.

13 मदिरेक्षणा । 72

14 विषयसूची । 76

शास्त्रानुबन्धः ।

कुवलयानन्दः - बुधरञ्जनीसमेतः । 65, 73, 81, 89, 97.





VIDYA PEETHA TIRUPATI.

52

Registered No. M 2300.

Book XVII ॥ श्रीः ॥ No. 12.

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. १७.] कलि ५०४५ तारण-सिंह शास्त्रानुबन्धः[सं १२

# The UDYANA PATRIKA.

A
SANSKRIT MONTHLY.

August 1944

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दययां प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.

# विषयः ॥

शास्त्रानुबन्धः—

कुवलयानन्दः । [बुधरञ्जनीसमेतः] ९७—१०४

प्रस्तुताप्रस्तुतानामेकधर्मान्वयो दीपकम् । यथा कलभमहीपालयोः प्रस्तुताप्रस्तुतयोर्भानक्रियान्वयः ।

यथा वा—

मणिः शाणोल्लीढः समरविजयी हेतिदळितो
मदक्षीणो नागः शरदि सरिदाश्यानपुलिना ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गळितविभवाश्चार्थिषु नृपाः ॥

अत्र प्रस्तुतानां नृपाणामप्रस्तुतानां मण्यादीनां च शोभैकधर्मान्वयः ।

---

धर्मस्य वाक्यार्थगतत्वेन असम्भवापातात् । पदार्थगतत्वव्यवहारस्त्वौपचारिकत्वात् । यथोक्तं सर्वस्वे—'अनेकस्य एकक्रियाभिसम्बन्धौचित्यात् पदार्थगतत्वोक्तिः । वस्तुतस्तु वाक्यार्थगतत्वेन आदिमध्यान्तवाक्यगतत्वेन धर्मस्य वृत्तौ आदिमध्यान्तदीपकाख्याः त्रयो भेदा' इति । पूर्ववदत्राप्यातिप्रसङ्गवारणाय अपेक्षितमूह्यम् । कलभमहीपालयोरिति । क्रमोऽत्र [अ]विवक्षितः । महीपालस्यैव प्रकृतत्वादिति ध्येयम् । भानक्रियान्वय इति । मदप्रतापहेतुकभानक्रियान्वय इत्यर्थः । मदप्रतापयोरपि बिम्बप्रतिबिम्बभावेन अभेदसम्भवादिति भावः ।

मणिरिति । शाणेन शाणयन्त्र[ण] उल्लीढः उल्लेखितः । हेतिदळितः आयुधक्षतः । नागः गजः । आश्या(श्री)नपुळिनेति पाठे प्रवाहमान्द्यात् उद्गतपुळिनेत्यर्थः । श्यैङ् गताविति हि धातुपाठः । आश्यानेत्यत्र आतपादिशोषितपुलिनेत्यर्थः । तनिम्ना कार्श्येन । अर्थिषु गलितैश्वर्याः सर्वस्वदायिन इति यावत् । शोभन्त इति । तनिमहेतुकशोभयेत्यर्थः । करिष्यमाणशङ्कावसरदानाय व्युत्पत्तिं दर्शयति प्रस्तुतेति । यद्वा ननु सर्वस्वे दीपसाम्याद्दीपकमित्युक्तमयुक्तम् । दीपसादृश्यादर्शनात् दीपशब्दस्य 'अग्निर्माणवकः' इत्यत्र अग्निपदवत् गौणतापत्तेश्चेत्यत आह—



SANSKRIT ... TIRUPATI

प्रस्तुतैकनिष्ठः समानो धर्मः प्रसङ्गादन्यत्रोपकरोति प्रासादार्थमारोपितो दीप इव रथ्यायामिति दीपसादृश्याद्दीपकम् । संज्ञायां चेति इवार्थे कन् प्रत्ययः ।

यद्यपि

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

इत्यत्र प्रस्तुताप्रस्तुतानां युगपत् धर्मान्वयः । मदेन भाति

---

प्रस्तुतेति । 'संज्ञायां च'ति सूत्रोपादानम् । इवार्थ इत्यादि तदर्थकथनमुखेन प्रकृतोपपादनम् । 'इवे प्रतिकृतौ' इत्यतः इवे इत्यनुवृत्तेरिति भावः । कन्प्रत्यय इति । 'अवक्षेपणे कन्' इत्यतः तदनुवृत्तेरिति भावः । यत्र धर्मस्य प्रथमं प्रस्तुतान्वयः तत्रैव अप्रस्तुतस्य प्रासङ्गिकत्वमिति मत्वा आशङ्कते यद्यपीति । सुवर्णेति । सुवर्णमेव पुष्पं यस्या इति पृथिव्या लतात्वावगमात् एकदेशविवर्तिरूपकम् । सुवर्णपुष्पामिति क्वचित्पाठः । चिन्वन्ति सम्पादयन्ति (?) । कृतविद्यः पण्डितः । यश्च जानाति सेवितुम् कालोचितसेवाभिज्ञ इत्यर्थः । प्रस्तुतेति । प्रस्तुताप्रस्तुतविवेको दुष्कर इति चेदत्र वदन्ति । अनारभ्य पठितोऽयं श्लोकः । यदा यत्प्रकरणे पठ्यते तदा तस्य प्रस्तुतत्वं इतरयोस्तु अप्रस्तुतत्वमिति । वस्तुतस्तु इदं भारते विदुरवाक्यमिति पौराणिकसाक्षिकम् । तत्र च शूरस्यैव प्रस्ताव इति बोद्धव्यम् । युगपदिति । चिन्वन्तीति बहुवचनान्तस्य शूरादिषु प्रत्येकमन्वयायोगात् त्रय इति तेषां एकपदोपस्थापितत्वाच्चेति भावः । तथा च अत्र प्रासङ्गिकत्वाभावात् दीपकं न स्यात् । न च इष्टापत्ति[ः] । दीपकमेवात्र अलङ्कृति]रिति सिद्धान्तात् । अनुभूयमानचमत्कृतिहेत्वलङ्कारा[न्तरा]भावाच्चेति भावः । प्रस्तुताप्रस्तुतानां युगपत् धर्मान्वय इति वाक्यानन्तरं 'मदेन भाति कलभ इत्यत्र अप्रस्तुतस्यैव प्रथमं धर्मान्वयः' इति शङ्कावाक्यान्तरं पुस्तकेषु दृश्यते । क्वचित्तु न दृश्यते । तत्र अदर्शनं लेखकानां

कलभ इत्यत्र अप्रस्तुतस्यैव प्रथमं धर्मान्वयः । तथाऽपि प्रासङ्गिकत्वं न हीयते । वस्तुगत्या प्रस्तुतोद्देशेन प्रवृत्तस्यैव वर्णनस्याप्रस्तुतेऽप्यन्वयात् । न हि दीपस्य रथ्याप्रासादयोर्युगपदुपकारकत्वेन जामात्रर्थं अर्पितस्य सूपस्यातिथिभ्यः प्रथमपरिवेषणेन च प्रासङ्गिकत्वं हीयते । तुल्ययोगितायां त्वेकं प्रस्तुतमन्यदप्रस्तुतमिति विशेषाग्रहणात् सर्वोद्देशेनैव धर्मोक्तिरिति विशेषः । अयं चानयो-

---

अनवधाननिबन्धनम् । करिष्यमाणसमाधानद्वयानुरूपशङ्काद्वयस्या[त्र] कर्तुमुचितत्वात् । अन्यथा जामात्रर्थमित्यादिद्वितीयसमाधानस्य चोद्यानुगुणत्वेन असाङ्गत्यापाठा(ता)त् । अन्वयचारम्यं १ प्रासङ्गिकत्वे न तन्त्रम् । किन्तु उद्देश्यताशून्यत्वमेव तथेत्याशयेन समाधत्ते तथापीति । प्रासङ्गिकत्वमिति । अप्रस्तुतानामिति शेषः । शङ्काद्वयस्य क्रमेण दृष्टान्तद्वयप्रदर्शनेन समाधानं दृढीकरोति—नहीत्यादिना । नहीत्येतत् प्रासङ्गिकत्वं हीयत इत्यत्रान्वेति । हिरत्र प्रसिद्धौ । अर्पेदि(अपि)तस्य सर्व(पक्व)स्य परिवेषणं पात्रे प्रदानम् । प्रासङ्गिकत्वमिति । रथ्याया अतिथीनां चेति शेषः । ननु ए(अने)कस्य एकधर्मान्वयतौल्यात् दीपकतुल्ययोगितयोर्न भेदः । न चोपमानोपमेयभावतदभावाभ्यां भेदः । उभयत्रापि तस्या आवश्यकतायाः सर्वसम्प्रदायग्रन्थरूढत्वात् इत्यत आह—तुल्येति । विशेषाग्रहणादिति । व्यवस्थाया अकरणादित्यर्थः । उपलक्षणमिदम् । प्रत्युत सर्वेण प्रस्तुतेन अप्रस्तुतेनैव वा भवितव्यमिति व्यवस्थापितत्वाच्चेत्यपि द्रष्टव्यम् । सर्वोद्देशेनैवेति । अत्र एवकारः तन्मध्ये कस्यचित् प्रासङ्गिकत्वव्युदासाय । प्रस्तुततुल्ययोगिताभिप्रायेण इदम् । अप्रस्तुततुल्ययोगितायां तु किञ्चिदुद्देशेनापि धर्मानुक्तेः अप्रस्तुतानामु-

---

१ चरमत्वम् ।

रपरो विशेषः । उभयोरनयोरुपमालङ्कारस्य गम्यत्वाविशेषेऽपि अत्राप्रस्तुतमुपमानं प्रस्तुतमुपमेयमिति व्यवस्थित उपमानोपमेयभावः । तत्र तु विशेषाग्रहणादैच्छिकः स इति ।

इति दीपकालङ्कारः ।

---

## १६ आवृत्तिदीपकम् ।

त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् ।
वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी ॥
उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।
माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः ॥

---

(मनु)द्देश्यत्वादिति द्रष्टव्यम् । धर्मोक्तिरिति । साधारणधर्मोक्तिरित्यर्थः । विशेष इति । दीपकादिति शेषः । अभेदशङ्कानिदानयोर्मध्ये साधारणधर्मान्वये वैषम्यं दर्शयित्वा उपमानोपमेयभावेऽपि तद्दर्शयति—अयं चेति । अनयोः दीपकतुल्ययोगितयोः परस्परमिति शेषः । अत्रेति । दीपक इत्यर्थः । तत्र त्विति । तुल्ययोगितायां त्वित्यर्थः । ऐच्छिकः[अ] व्यवस्थित इत्यर्थः । सङ्कुचन्तीत्यत्र प्रस्तुतेष्वेव, त्वदङ्गमार्दव इत्यत्र अप्रस्तुतेष्वेव प्रस्तुताप्रस्तुतयोश्च परस्परमुपमानोपमेयभावदर्शनादिति भावः । स इति । उपमानोपमेयभाव इत्यर्थः ।

इति दीपकम् ।

---

अथ आवृत्तिदीपकम् ।

त्रिविधमिति । दीपकस्य आवृत्तौ आवृत्तिदीपकम् । तच्च त्रिविधमित्यर्थः । वर्षत्येषेति । वर्षवत् वत्सरवदाचरतीत्यर्थः । द्राघीयसीति भावः । अर्थभेदात् पदमात्रावृत्तिः । उन्मीलन्ति स्फुटन्ति । अस्य

दीपकस्य अनेकोपकारक्षमतया दीपस्थानीयस्य पदस्यार्थस्योभयोर्वाऽऽवृत्तौ त्रिविधमावृत्तिदीपकम्। क्रमेणार्धत्रयेणोदाहरणानि दर्शितानि।

यथा वा—

उत्कण्ठयति मेघानां माला वर्गं कलापिनाम्।
यूनां चोत्कण्ठयत्यद्य मानसं मकरध्वजः॥

---

रूपभेदेऽपि विकासरूपार्थैक्यात् अर्थमात्रावृत्तिः। कुटजोद्गमाः कुटजमुकुलानि। माद्यन्तीत्यादौ उभयावृत्तिः। शिखावलाः मयूराः। ननु दीपकावृत्तावित्यत्र दीपकपदेन आवृत्तिमतः प्रस्तुताप्रस्तुतोपकारक्षमत्वं प्रतीयते। तस्य तदर्थकत्वेन इदानीमेव वर्णितत्वात्। न चेदमुदाहरणे सम्भवति। सर्वेषामम्बुदमालादीनां वर्षासु प्रस्तुतत्वात्। अतः असम्भवेन अ(-वो लक्षण) दोष इत्याशङ्क्य दीपकपदं नोक्तार्थपरं गौरवात्। अपि तु अनेकोपकारक्षममात्रपरं लाघवात्। एतावताऽपि दीपकसादृश्येन दीपकपदप्रवृत्त्युपपत्तेश्च। न चैवं तुल्ययोगितादिष्वतिप्रसङ्गः। योगरूढेरभ्युपगमात्। दीपकपदस्यार्थपरत्वेऽपि प्रतिवस्तूपमावारणाय तस्य (स्या) आवश्यकत्वाच्चेत्याशयेन व्याचष्टे दीपकस्येति। इदं दीपकावृत्ताविति समासप्रविष्टषष्ठ्यन्तव्याख्येयोपादानम्। तस्य विवरणमनेकेत्यादि स्थानीयस्ये [त्यन्तम्।] तत्प्रपञ्चभूतत्रैविध्य(ध्यं) पदस्येत्यादि। न चैवमननुगम इति वाच्यम्। शब्दार्थयोः काव्यशरीरत्वेन अनुगमात्। यदाहुः—'शब्दार्थौ मूर्तिराख्यातौ' इति। उभयोर्वेति। पदार्थयोरित्यर्थः। न चायमावृत्तिद्वयसङ्कर एवास्त्विति न पृथक् विभाग इति वाच्यम्। विजातीयालङ्कारदृष्टस्यैव सङ्करः। अन्यथा मालादीपकादेरपि अनेकरूपसंसृष्ट्यादिरूपत्वेन विभागानुपपत्तेरित्यभिमानदार्ढ्येनैवं विभागकरणात्।

उत्कण्ठयतीति। मेघानां माला। कलापिनां मयूराणां वर्गमुत्कण्ठयति उद्धृतकण्ठं करोति। मयूरा हि मेघदर्शने ऊर्ध्वप्रसारितकण्ठा भवन्तीति भावः। उक्तं कालिदासेन—

शमयति जलधरधारा चातकयूनां तृषं चिरोपनताम्।
क्षपयति च वधूलोचनजलधारा कामिनां प्रवासरुचिम्॥
वदनेन निर्जितं तव निलीयते चन्द्रबिम्बमम्बुधरे।
अरविन्दमपि च सुन्दरि निलीयते पाथसां पूरे॥

एवं चावृत्तीनां प्रस्तुताप्रस्तुतोभयविषयत्वाभावेऽपि दीप(क)च्छायापत्तिमात्रेण दीपकव्यपदेशः।

इति आवृत्तिदीपकम्।

---

"आलोकयति पयोदान् प्रबलपुरोवातताडितशिखण्डः।
केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन॥"

इति। यूनां मानसमुत्कण्ठयति उत्सुकं करोति। शमयतीति। तृषं पिपासां प्रवासरुचिं प्रस्थानकांक्षाम्। वदनेनेति। इदं केवलाप्रस्तुतावृत्तिदीपकम्। वदनवर्णनप्रस्तावात्। वर्षाप्रस्तावात् पूर्ववद्वा। अरविन्दमपि निर्जितमित्यनुषङ्गः। पाथसां जलानाम्। दीपकपदप्रवृत्तौ पूर्वोक्तनिष्कर्षं दर्शयति—एवं चेति। आवृत्तीनां प्रस्तुतमात्रविषयत्वावश्यम्भावे सतीत्यर्थः। न च प्रस्तुताप्रस्तुतविषयत्वेनैव आवृत्तीनां दर्शयितुं शक्यत्वात् किमेतद्दुरभिनिवेशेनेति वाच्यम्। तथात्वे प्रतिवस्तूपमाऽनतिरेकापातात्। न चैवमपि तुल्ययोगितानतिरेकप्रसङ्ग इति वाच्यम्। आवृत्तौ उपमानोपमेयभावगमनावश्यम्भा[-वाभा]वेन तद्भेदोपपत्तेरिति संक्षेपः। दीपच्छायापत्ति रनेकोपकारक्षमत्वम्। मात्रपदेन प्रस्तुतत्वाप्रस्तुतत्वव्यवच्छेदः। दीपकच्छायापत्तेरि(री)ति पाठे दीपकपदं प्रस्तुताप्रस्तुतोपकारक्षमपरम्। अत्र अनेकोपकारमात्रपुरस्कारेण गौणमुक्तं दण्डिना—

अर्थावृत्तिः पदावृत्तिः उभयावृत्तिरित्यपि।
दीपकस्थान एवेष्टमलङ्कारत्रयं यथा॥

इति। वस्तुतस्त्वत्र पूर्वोक्तरीत्या मुख्यमेवेति ध्येयम्।

इति आवृत्तिदीपकम्।

56

## १७ प्रतिवस्तूपमा।

वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता।
तापेन भ्राजते सूरः शूरश्चापेन राजते ॥

यत्रोपमानोपमेयपरवाक्ययोरेकः समानो धर्मः पृथङ्निर्दिश्यते सा प्रतिवस्तूपमा। प्रतिवस्तु प्रतिवाक्यार्थमुपमा समानधर्मोऽस्यामिति व्युत्पत्तेः। यथाऽत्रैव भ्राजते राजत इत्येक एव धर्म उपमानोपमेयवाक्ययोः पृथग्भिन्नपदाभ्यां निर्दिष्टः।

---

### अथ प्रतिवस्तूपमा।

वाक्ययोरिति। दीपके सकृत् धर्मोपादानम्। इह तु असकृदिति सङ्गतिः। सामान्यं साधारणधर्मः। दृष्टान्तालङ्कारव्युदासाय अत्र एकत्वं धर्मविशेषणम्। सूरः सूर्यः। आवृत्तिदीपके अनावृत्तिदीपके च अतिप्रसङ्गं वारयन् व्याचष्टे—यत्रेति। उपमानेति। तथा च उपमानोपमेयभावावश्यम्भावशून्यावृत्तिदीपके नातिप्रसङ्ग इति भावः। न च तत्र तदनावश्यकत्वे किं मानमिति वाच्यम्। 'संग्रामाङ्गणे'ति श्लोके तदभावेऽप्यावृत्तिदीपकं दर्शयिष्यतो ग्रन्थकृत एव तथात्वात्। पृथगिति। [अ]सकृदित्यर्थः। तेन भवति दीपकव्युदासः। न तु भिन्नपदाभ्यामित्यर्थः। पृथक्पदस्य 'वाक्यार्थगतत्वेन सामान्यस्य वाक्यद्वये पृथङ्निर्देशे प्रतिवस्तूपमे'ति प्रतिवस्तूपमासूत्रगतस्य असकृदर्थकत्वप्रदर्शनपरसर्वस्वग्रन्थविरोधात्। एकपदेन निर्देशेऽपि प्रतिवस्तूपमाऽभ्युपगमाच्च। अत एव ग्रन्थकृत् 'विद्वानेवे'त्यत्र' वैधर्म्येण प्रतिवस्तूपमामुदाहरिष्यति। 'देवीं वाच'मित्यत्र च पदावृत्तावेनामाशङ्क्य समाधास्यते। सर्वस्वानुरोधेन व्युत्पत्तिं दर्शयति—प्रतिवस्त्विति। इदं व्याख्येयभूतलक्ष्यनामैकदेशोपादानम्। तस्य विवरणं प्रतीत्यादि। उपेत्यस्य विवरणं समानेति। एक एवेति। दीप्तिरूप इति शेषः। भिन्नेति। प्रकृतोदाहरणाभिप्रायेण स्वरूपकथन-

यथा वा—

स्थिरा शैली गुणवतां खलबुद्धया न बाध्यते।
रत्नदीपस्य हि शिखा वात्ययाऽपि न नाश्यते॥

यथा वा—

तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति।
स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते॥

अत्र यद्यप्युपमेयवाक्ये अनिच्छा उपमानवाक्ये अवीक्षेति धर्मभेदः प्रतिभाति। तथाऽपि वीक्षणमात्रस्यावर्जनीयस्य प्रतिषेधानर्हत्वात् इच्छापूर्वकवीक्षणप्रतिषेधोऽयं अनिच्छापर्यवसित एवेति

---

मिदम्। वामनकाव्यप्रकाशकृतोः मतमनुरुध्येदम्। तौ 'नैकं पदं द्विः प्रयोज्यम्' 'कथितपदत्वस्य दुष्टतया अभिहितत्वात् शब्दभेदेने'ति वदन्तौ शब्दभेद एव अभिन्यविक्षाताम्। तद्धि [कथि)तपदत्वदोषोऽधिकपदस्थल एवेति काव्यप्रकाशसप्तमोल्लासे स्फुटम्। स्फुटतमं तु मधुमतीकाव्यदर्पणयोरिति दिक्।

स्थिरेति। शैली शीलम्। शिखा दीप्तिः। वात्या वातसमूहः। तवेति। निवेशितात्मा निवेशितमनाः। इक्षुरकं कण्टकावृतमस्थिरात्यल्परसं[देवा]र्चनाद्यनर्हं [भ्रमर]स्पर्शमात्रेऽपि म्लानतामनुवानं निर्गन्धं किमपि क्षुद्रपुष्पमिति स्तोत्रभाष्यम्। अवीक्षेति इति भावः (पाठ)। अवर्जनीयस्येति। मधुव्रतेनेति शेषः। इन्द्रियसन्निकर्षे सति सर्पकण्टकादिदर्शनवदिति भावः। प्रतिषेधानर्हत्वादिति। वाक्यस्यायोग्यतापातादिति भावः। इच्छापूर्वकेति। उपसर्गविशिष्टेन ईक्षतिना तथैव विवक्षितत्वादिति भावः। नन्वेवमपि पूर्वत्रेच्छाभावः। इह तु तत्पूर्ववीक्षाभाव इति धर्मभेदः तदवस्थ एवेत्यत आह—अनिच्छेति। सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाध इति न्यायादिति भावः।

983
ADRIYA SANSKRIT VIDYAPEETH
TIRUPATI

VERIFIED 1985
VERIFIED 2001
VERIFIED 1998